ISSN-2395-7921

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

2018



राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्

क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई-७७

Scanned with OKEN Scanner

# विभागीयप्राध्यापकाः



प्रो. सुदेशकुमारशर्मा

प्राचार्यः



प्रो. मदनमोहनझाः,

विभागाध्यक्षः



डॉ.देवदत्तसरोदे



डॉ.वि.एस्.वि.भास्कररेड्डि



डॉ.कुमारः



डॉ.सुनीलकुमारशर्मा



डॉ.विनोदकमारशर्मा



डॉ.सचिनकुमारः

Scanned with OKEN Scanner

Peer Reviewed Refereed Journal ISSN : 2395-7921

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

(सन्दर्भिता मूल्याङ्किता च शोधपत्रिका)

Annual Research Journal of Department of Education

2017 - 18

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम्।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्
सोमय्याभुवि भासते परिसरो विद्याविहारे स्थितः॥

संरक्षकः
आचार्यः परमेश्वरनारायणशास्त्री,
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.) नवदेहली

प्रधानसम्पादकः
आचार्यः सुदेशकुमारशर्मा
प्राचार्यः, क. जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई

सम्पादकाः
आचार्यः मदनमोहनझाः डॉ. वि. यस्. वि. भास्कररेड्डि डॉ. देवदत्तसरोदे

सह-सम्पादकाः
डॉ. कुमारः डॉ. विनोदकुमारशर्मा
डॉ. सुनीलकुमारशर्मा डॉ. सचिनकुमारः

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः (पूर्वम्) मुम्बई - 400077

Scanned with OKEN Scanner

पत्रिकानाम : शिक्षारश्मिः (शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका)

प्रकाशकः : शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम् ( मा. वि.), मुम्बई - 77

© प्रतिलिप्यधिकारः : प्रकाशकाधीनः

ISSN : 2395-7921

संरक्षकः : आचार्यः परमेश्वरनारायणशास्त्री, कुलपतिः

प्रधानसम्पादकः : आचार्यः सुदेशकुमारशर्मा, प्राचार्यः

सम्पादकाः : प्रो. मदनमोहनझाः डॉ. वि. यस्. वि. भास्कररेड्डि
डॉ. देवदत्तसरोदे

सह-सम्पादकाः : डॉ. कुमारः डॉ. विनोदकुमारशर्मा
डॉ. सुनीलकुमारशर्मा डॉ. सचिनकुमारः

सम्पादकमण्डलसदस्याः : आचार्यः मदनमोहनझाः डॉ. देवदत्तसरोदे
डॉ. वि. यस्. वि. भास्कररेड्डि डॉ. कुमारः
डॉ. विनोदकुमारशर्मा डॉ. सुनीलकुमारशर्मा
डॉ सचिनकुमारः सुश्री वैशाली निवडुंगे
शुभलक्ष्मी सामल बिनायक बारिकश्च (छात्रसदस्यौ, द्वितीयवर्षम्)
प्रियदर्शिनी होता फिरोज साहु (छात्रसदस्यौ, प्रथमवर्षम्)

मूल्याङ्कनमण्डलम् : प्रो. ए. पी. सच्चिदानन्दः प्रो. प्रकाशचन्द्रः
प्रो. लोकमान्यमिश्रः प्रो. गोपीनाथशर्मा
प्रो. प्रह्लादजोशी प्रो. वै. एस्. रमेशः
प्रो. रजनी रञ्जन प्रो. के. भारतभूषणः

प्रकाशनवर्षम् : 2018

अनुकृतयः : 200

मुखचित्रविन्यासः : आचार्यः मदनमोहनझाः

अक्षरसंयोजनम् : डॉ. वि. एस्. वि. भास्कररेड्डि

अवधातव्यम् : शोधपत्रिकायाममुष्यां प्रकाशितशोधपत्राणां मौलिकत्वस्य तत्र प्रतिपादितविचारस्य च कृते समग्रमुत्तरदायित्वं शोधपत्रलेखकानामेव भविष्यति, न वा सम्पादकस्य न च प्रकाशकस्य भविष्यतीति विज्ञप्यते।

मुद्रणम् : Rank Printers, Mulund (W), Mumbai.



Scanned with OKEN Scanner

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं
प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

RSkS/VC/Msg/2017-18/165

Date 04.03.2018

## शुभाशंसनम्

मार्गद्वयं तत्त्वबोधनाय योग्यम् । एकत्र शास्त्रचर्चा अपरत्र शास्त्रचिन्तनाय अवसरः इति । तस्मिन् एव प्रसङ्गे विविधा आचार्याः सुतरां प्रेरणामुखेन नूतनगवेषणकार्ये लग्नास्सन्तः सततं किमपि साधयितुं प्रयतन्ते, तेषां शोधमुखलेखाः विचारावगाहः च समाजाय नूतनां गतिं प्रददति । अस्मिन् एव प्रसङ्गे मुम्बईपरिसरस्य **"शिक्षारश्मिः"** इतिनाम्नी पत्रिका यशस्विनां प्राचार्याणां, कार्यकुशलानां विभागाध्यक्षाणां च मार्गदर्शने सततं यशः प्राप्नोतु इति मंगलाशासनं विधीयते, ये केऽपि अस्मिन् साहित्यसर्जनात्मके पूतकार्ये लग्नाः सन्ति तेभ्यः सर्वेभ्यः शुभकामनाः दीयन्ते, भगवती मुम्बादेवी च प्रार्थ्यते इयं पत्रिका विदुषां शोधच्छात्राणां सामाजिकानां च मार्गदर्शनं कुर्यादिति ।

प.ना. शास्त्री
**(प्रो. परमेश्वरनारायणशास्त्री)**

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E-Mail : rskspvc@yahoo.com



Scanned with OKEN Scanner

# सम्पादकीयम्

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ इति महाकवेर्दण्डिनः वचनं शब्दरूपभाषायाः जीवितमाहात्म्यं वर्णयति । यदि भाषा इति किञ्चिद्विशिष्टं साधनं लोके नाभविष्यत् तर्हि लोकव्यवहारो नाभविष्यदित्यत्र नास्ति सन्देहलेशः । भाषां विना परस्परं भावानां विनिमयो न भवेत् मानवानाम् । नैव प्रदर्शयितुं शक्नुयुः पण्डिताः स्वपाण्डित्यपूर्णविचारधाराम् । विना भाषां नैव शक्नुयुः प्राप्तुं मानवाः विभिन्नसंस्कृतीनां, परम्परायाः, सम्प्रदायाणां च परिचयम् । न सुष्ठु शिक्षितः स्याद्बालो विना भाषाम् । अतः लोके भाषां विना नास्ति कश्चिद्विशेषः शिक्षणे इति विश्वस्मिन् भाषाशिक्षणस्य बहुमहत्वपूर्णं स्थानं वर्तते तराम् । न कोऽपि विषयः भाषां विना बोधयितुं शक्यः । अत एवोक्तं दण्डिना वाचामेवप्रसादेन लोकयात्रा प्रवर्तते इति । लोकयात्रायाः मुख्यकारणमेव भाषा ।

भाषासु तासु वेदाधारिता देववाणी सुसंस्कृता स्पष्टा शुद्धा मधुरा व्यवस्थिता कल्याणी विविधविद्यापूर्णा लौकिकभाषाणां बह्वीनां जननीति मन्यमाना चानादिकालात् सर्वलोकानां मङ्गलं कुर्वती आद्रियमाणा लोके दरीदृश्यते । भाषायाः अस्याः अध्ययनाय - गुरुकुलानि, मठाः, आचार्याणामाश्रमाः, नदीसङ्गमतीर्थानि, पाठाशालाः, विद्यालयाः, विश्वविद्यालयाः, विविधविद्याकेन्द्राणि चासन् क्वचित्सन्ति च । यत्र अन्तेवासिनः सपर्यापुरस्सरं सश्रद्धं संस्कृतविद्यामुपासते । अधुना तु शिक्षाव्यवस्था आधुनिकधारायां प्रचलतीत्यतः किञ्चित्परिवर्तिता दृश्यते । साम्प्रतिककाले संस्कृतभाषाशिक्षणाय शास्त्रशिक्षणनिमित्तञ्च संस्कृत-विश्वविद्यालयाः, पाठशालाः, गुरुकुलानि तत्रत्या आचार्याः अध्यापकाः वर्तमानाः वर्तन्ते । योऽनूचानः स नो महान् इति श्रुतिवचनं बिभ्रद् आराष्ट्रे राराज्यमानं राष्ट्रियसंस्कृतसंस्थानम् अहर्निशं संस्कृतभाषां शास्त्राणि च सेवमानं लोककल्याणं विदधानं सारस्वतसेवासमाराधनतत्परं लोके भृशं शोभतेतमाम् । संस्थानस्यैव त्रयोदशपरिसरेष्वन्यतमः महाराष्ट्रराज्यस्य मुम्बानगर्यां वर्तमानः क. जे. सोमैयासंस्कृतविद्यापीठमित्याख्यः प्रथितयशस्कोऽयं परिसरो विविधविभागयुक्तो राराज्यते । सत्सु विभागेष्वनेकेषु शिक्षाशास्त्रविभागो विद्यते विशिष्टो यत्र वर्षद्वयस्य पाठ्यक्रमे त्रिनवतिः छात्राः अधीयानाः वर्तन्ते । विभागोऽयं सर्वत्र ज्ञानं वितन्वन् प्रतिवत्सरमिवास्मिन् हायनेऽपि शिक्षारश्मिरिति अनेकेषां विदुषां छात्राणां च विविधशोधलेखयुक्तां वार्षिकीं शोधपत्रिकां प्राकाशयतीति वक्तुं मोदामहे । राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य कुलपतिवर्यैः आचार्यैः **परमेश्वरनारायणशास्त्रिभिः** प्रदत्ताशीर्वचनैः, मुम्बई-परिसरप्राचार्यैः **प्रो. सुदेशकुमारशर्मभिः**, विभागाध्यक्षैः **प्रो. मदनमोहनझावर्यैः** प्राप्तप्रोत्साहनेन, विविधश्रेष्ठशिक्षाशास्त्रिणामाचार्याणां शुभाशंसवचोभिः च सम्प्रेरितेयं पत्रिका प्रकाशमेष्यतीति वयममन्दमानन्दमनुभवामः ।

इत्थं

सम्पादकाः



Scanned with OKEN Scanner

# विषयानुक्रमणिका


| क्र.सं | शोधपत्रस्य शीर्षकम् | लेखकः | पृष्ठसंख्या |
|---|---|---|---|
| 1. | उत्तरम् | प्रो. मदनमोहनझाः | 01 |
| 2. | सङ्गणकसहकृतभाषाशिक्षणम् | डॉ. देवदत्तसरोदे | 08 |
| 3. | सूचनाधिकारस्य जागरणे शिक्षायाः भूमिका | डॉ. वि. एस्. वि. भास्कररेड्डि | 18 |
| 4. | भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधयः | डॉ. विनोदकुमारशर्मा | 25 |
| 5. | संस्कृतभाषाधिगमे भाषाप्रयोगशालायाः भूमिका | डॉ. सचिनकुमारः | 31 |
| 6. | समासानामधिगमे रेखीयाभिक्रमस्योपयोगिता | डॉ. कुमारः | 37 |
| 7. | भाषाशिक्षण में सूक्ष्मशिक्षण की उपयोगिता | डॉ. सुनीलकुमारशर्मा | 43 |
| 8. | Language laboratory: An Innovative technique | Dr. Shweta Sood | 51 |
| 9. | Significance of Evaluation and Assessment in Language proficiency | Dr. Leena | 57 |
| 10. | Using Computers in Language Teaching | Dr. SubhashChander Meena | 62 |
| 11. | How to enhance Sanskrit E-Learning by using Blog | Dr. Arti Sharma | 65 |
| 12. | Creating Sanskrit Web pages by using Hypertext Markup Language | Ms. Vaishali Nivadunge | 70 |
| 13. | संस्कृतशिक्षण में नवाचार : ई- अधिगम की भूमिका | डॉ. प्रेमसिंह सिकरवारः | 75 |
| 14. | भाषाशिक्षणशास्त्रशिक्षणयोः नवाचाराः | डॉ. गणपति वि. हेगडे | 82 |
| 15. | भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधयः | डॉ. मनमोहनतिवारी | 86 |
| 16. | भाषाशिक्षणे सूक्ष्मशिक्षणम् | डॉ. माधवदत्तपाण्डेयः | 90 |
| 17. | भाषाशिक्षणे सङ्गणकयन्त्रम् | अलोकमण्डलः | 94 |
| 18. | भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधीनाम् आलोचनात्मकमध्ययनम् | पलाशमण्डलः | 103 |
| 19. | भाषाशिक्षणे संङ्गणकस्य अनुप्रयोगः | जीतेन्द्रकुमारगुप्तः | 108 |
| 20. | भाषाशिक्षणे मनोवैज्ञानिकसम्प्रत्ययानाम् अनुप्रयोगः | रामजियावनप्रजापतिः | 111 |
| 21. | साकल्यशिक्षा साकल्यविद्यालयस्य च सम्प्रत्ययः संसाधनानि उपलब्धता च | मम्मटवर्गः | 115 |




Scanned with OKEN Scanner

| | | |
|---|---|---|
| 22. मानवाधिकाराणां संरक्षणे राष्ट्रियमानवाधिकारायोगस्य भूमिका | आनन्दवर्धनवर्गः | 121 |
| 23. सक्रियपाठ्यचर्यानुभवोत्पादने शिक्षकस्य भूमिका | वामनवर्गः | 129 |
| 24. अधिगममूल्याङ्कने केन्द्रीयप्रवृत्तिमापनानाम् अनुप्रयोगः | कुन्तकवर्गः | 134 |
| 25. अष्टादशशास्त्राणां परिचयः | दण्डिवर्गः | 143 |
| 26. व्यक्तित्वस्य सिद्धान्ताः | पाणिनिवर्गः | 158 |
| 27. पर्यावरणपरिरक्षणे विविधाभिकरणानां भूमिका | भर्तृहरिवर्गः | 166 |
| 28. संस्कृतभाषाशिक्षणकौशलानि तत्संवर्धनोपायाश्च | कात्यायनवर्गः | 170 |
| 29. भाषाशिक्षणे अन्तर्जालस्य प्रयोगः शैक्षिकोपग्रहश्च | पतञ्जलिवर्गः | 177 |
| 30. भारतीयसंविधाने निहितानां शिक्षासम्बद्धानाम् अनुसूचीनाम् अधिनियमानाञ्च संग्रहणम् | जयादित्यवर्गः | 183 |


*****

Scanned with OKEN Scanner

# सूचनाऽधिकारस्य जागरणे शिक्षायाः भूमिका

✍ डॉ. वि एस् वि भास्कर रेड्डि *

**प्रस्तावना -**

सूचनाऽधिकारः (2005) भारतीयनागिरकाणां सूचनाप्रदानाय व्यावहारिकशासनस्य स्थापनाय च आधिकारिक-स्वतन्त्रताऽधिनियमस्य (2002) स्थाने भारतसंसदा पारित एक अधिनियमो भवति। अधिनियमोऽयम् आधिकारिकगोपनीयताऽधिनियमे (1923) निर्दिष्टप्रतिबन्धेभ्यो आरमतां प्रददाति, बहुत्र तस्याऽधिनियमस्य (1923) प्रतिबन्धाः सूचनाऽधिकाराऽधिनियमस्य पुरतः समक्षे वा स्वाभाविकतया निरस्ताः निस्तब्धाश्च जायन्ते । यत अयमधिकारः भारतीयसंविधानस्य 19 (1) अनुच्छेदानुसारं मौलिकाऽधिकारेषु अन्तर्भवति। अतः प्रत्येकं भारतीयः अस्याऽधिकारस्योपयोगः मौलिकाऽधिकारत्वेन अनुप्रयोगं कर्तुं शक्नोति। अधिनियमोऽयं 12-10-2005 दिनाङ्कादारभ्य जम्मू-कश्मीरराज्यं विहाय सम्पूर्णभारते अस्तित्वे क्रियान्वयने च वर्तते।

अधिनियमस्याऽस्य प्रावधानाऽनुसारं कोऽपि भारतीयनागरिकः सार्वजनिकप्राधिकरणेभ्यो (सर्वकारीय-मन्त्रालयेभ्यो विभागेभ्यो संस्थाभ्यो संगठनेभ्यो कार्यालयेभ्यो साधनेभ्यो निकायेभ्य अभिकरणेभ्य उपक्रमेभ्यो तन्त्रेभ्यो यन्त्राङ्गादिभ्यो), सर्वकारेण वित्तपोषितेभ्यो निर्सर्वकारीयसंस्थाभ्यो निकायेभ्यश्च निर्दिष्टसमयसीमाभ्यन्तरे अपेक्षितानां सूचनानां सूचनाऽभिलेखनानां ई-सूचनानाञ्च प्राप्तये अनुरोधं कर्तुं शक्नोति । अस्य सूचनाऽधिकाराऽऽन्दोलनस्य सूचनाऽधिकारस्य च श्रेयः श्रीमतः अन्ना हजारे महोदयस्य, श्रीमतः अरविन्द केजरीवालस्य च भवति।

**सूचनाऽधिकाराऽधिनियमस्य परिधिः -**

अस्याऽधिनियमस्य परिधौ कार्यपालिका, न्यायपालिका, विधानपालिकादि संवैधानिकप्राधिकरणानि, संसदः विधानसभायाश्चाऽधिनियमानुसारं संस्थापिताः मन्त्रालयाः विभागाः कार्यालायाः संस्थाः उपक्रमाः निकाया अभिकरणानि साधनानि संगठनानि तन्त्राणि प्राधिकरणानि, संघसर्वकारेण राज्यसर्वकारैः वा प्रत्यक्षतया परोक्षतया च स्वामित्वसम्बद्धाः नियन्त्रिताः वित्तपोषिताः संस्था उपक्रमाः निकायाः निर्सर्वकारीयनिकायाश्च समायान्ति। परन्तु अस्याऽधिनियमस्य परिधौ -

1. संघसर्वकारेण आंशिकतया वित्तपोषिते सत्यपि राजनैतिकदलानि (2013 तः) नैव सामायान्ति।
2. सुरक्षाबल-सीमाबल-सशक्तबल-वायुसेना-नौसेनादि भारतीयप्रतिरक्षानिकायाश्च नैव सामायान्ति।
3. अनुसन्धानविश्लेषणविभागः (RAW), आसूचनाकेन्द्रम् (IB), अन्यगुप्तचरविभागादयः अस्य परिधौ नैव सामायान्ति। यतः एते सर्वे प्रतिरक्षात्मकदृष्ट्या गोपनीयतादृष्ट्या च संवेदनशीलाः भवन्ति।

* सहायकाचार्यः (वरिष्ठः), शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि) मुम्बई परिसरः



Scanned with OKEN Scanner

4. कस्यचिदपि व्यक्तिविशेषस्य निजजीवनेन सह सम्बद्ध-सूचनानां प्रदाने च अयमधिनियमः निश्शक्तो भवति।

**सूचनाऽधिकाराऽधिनियमस्य शासनं प्रक्रिया च -**

भारते सूचनाऽधिकारस्य निरीक्षणं पर्यवेक्षणं शासनं नियन्त्रणं विनिमयञ्च प्रमुखतया निकायद्वयेन क्रियते। यथा —

1. **केन्द्रीयसूचनाऽऽयोगः** (CIC/Central Information Commission) — अत्र एकः मुख्याऽऽयुक्तः निर्दिष्टसंख्यायां सदस्याश्च भवन्ति। राष्ट्रपतेः अधीने विद्यमानाः अनुष्ठानरताः कार्यरताः सञ्चाल्यमानाः केन्द्रीयविभागाः मन्त्रालयाः निकायाः तन्त्रादयः सूचनाऽधिकारस्य सन्दर्भे केन्द्रीयसूचनाऽऽयोगस्य परिधौ भवन्ति।

2. **राज्यसूचनाऽऽयोगः** (SIC/ State Information Commission) — अत्राऽपि एकः मुख्याऽऽयुक्तः निर्दिष्टसंख्यायां सदस्याश्च भवन्ति। तत्तत् राज्येषु राज्यपालस्याऽधीने विद्यमानाः अनुष्ठानरताः कार्यरताः सञ्चाल्यमानाः राज्यविभागाः मन्त्रालयाः निकायाः तन्त्रादयः सूचनाऽधिकारस्य सन्दर्भे राज्यसूचनाऽऽयोगस्य परिधौ भवन्ति।

आयोगद्वयमपि (CIC & SIC) स्वतन्त्रः सार्वभौमिकश्च निकाय एव भवति। अत्र न वा संघसर्वकारस्य हस्तक्षेपाय न च राज्यसर्वकारस्य हस्तक्षेपाय अधिकारः भवति। एवमेव राज्यसूचनाऽऽयोगस्योपरि केन्द्रीयसूचनाऽऽयोगस्य नैव अधिकारः, केन्द्रीयसूचनाऽऽयोगस्योपरि राज्यसूचनाऽऽयोगस्य च अधिकारः नैव भवति।

**सूचनाप्राप्तये नियमाः शुल्कश्च**

सार्वजनिकप्राधिकरणेभ्यो सूचनानां प्राप्त्यर्थं तस्याधिनियमे केचन नियमाः प्रावधानानि च निर्दिष्टानि सन्ति, यथा -

1. सूचनाप्राप्तकर्ता भारतीयनागरिकः स्यात्।
2. सूचनाऽऽवेदनपत्रेण साकं सूचनाधिकारिणः नाम्नि दशरूप्यात्मकः पत्रालयाऽऽदेशः (IPO) / अपेक्षापत्रं (DD) / वित्तकोशीयपत्रं (Bankers cheque) वा प्रेषणीयं भवति।
3. यदि सूचनाप्राप्तकर्ता वञ्चितसमुदायिकस्य, दारिद्र्यरेखाया अधौ च निवसतां जनानां अन्तर्भवति चेत् तस्य कृते उपर्युक्तनियमः:- 2 नैव अनुवर्तते।
4. यदि सूचनाप्राप्तकर्ता निरक्षरो भवति चेत् सूचनाधिकारिणा एव स्वयम् अपेक्षितसूचनाः लेखनीयाः भवन्ति।
5. यदि 30 दिवसाभ्यन्तरे एव सूचना प्रदीयते चेत् सूचनायै प्रत्येकं पत्रायः रूप्यकद्वयं प्राप्तकर्त्रा प्रदेयं भवति। निर्दिष्टसमयसीमात्परं शुल्को नैव भविष्यत्यत्र।



Scanned with OKEN Scanner

6. निर्दिष्टसमयावध्यपी सूचना अप्राप्ते सति प्रथमाऽप्पीलीयाऽधिकारिणं प्रति उपालभ्यं कर्तुं शक्यते।
7. प्रथमाऽप्पीलीयाऽधिकारिणं प्रति उपालभ्यात्परमपि सूचना अप्राप्ते सति द्वितीयाऽप्पीलीयाऽधिकारिणं प्रति उपालभ्यं कर्तुं शक्यते। अत्र 100 % सूचनाप्रदानाय, विलम्बकारणेन वित्तीयदण्डाय च आदेशः क्रियते।
8. संपसर्वकारेण सम्बद्धसूचनार्थं आवदेनं rtionline.gov.in इति माध्यमेनापि कर्तुं शक्यते।

**सूचनाऽधिकारेण किं प्राप्तुं शक्यते।**

1. सर्वकारेण सार्वजनिकप्राधिकरणेन सह सम्बद्धानां सूचनानां प्राप्तये अनुरोधं कर्तुं शक्यते।
2. सार्वजनिकप्राधिकरणेन सह सम्बद्धानाम् अभिलेखानां परिपत्राणाञ्च प्राप्तये अनुरोधं कर्तुं शक्यते।
3. सार्वजनिकप्राधिकरणीयाऽभिलेखानां सूचनापत्राणां सूचनास्रोतसां निरीक्षणं कर्तुं शक्यते।
4. सार्वजनिकप्राधिकरणीयाऽभिलेखानां सूचनापत्राणां स्रोतसाञ्च प्रतिलिपीः प्राप्तुञ्च शक्यते।
5. सार्वजनिकप्राधिकरणेषु संगणकयुक्त्या निर्मितानाम् उत्पादितानाञ्च ई-सामग्रीमपि प्राप्तुं शक्यते।
6. सार्वजनिकप्राधिकरणीयाऽनुष्ठानसम्बद्धानां ई-सूचनानां निरीक्षणं कर्तुं, प्राप्तुञ्च शक्यते।
7. सार्वजनिकप्राधिकरणीयाऽनुष्ठानानां कार्याणाञ्च निरीक्षणं कर्तुं शक्यते।
8. सार्वजनिकप्राधिकरणीयाऽनुष्ठानसम्बद्धं सामाग्रीसम्बद्धञ्च न्यादर्शं प्राप्तुं शक्यते।
9. सार्वजनिकप्राधिकरणीयाऽनुष्ठानेषु विद्यामानां वास्तविकस्थितिं ज्ञातुं शक्यते।
10. सार्वजनिकप्राधिकरणीयाऽनुष्ठानेषु जायमानस्य अलसत्वस्य विलम्बस्य च प्रश्नं कर्तुं शक्यते।

**सूचनाऽधिकारस्य आवश्यकता -**

भारतदेशः लोकतान्त्रिकः समाजवादश्च भवति। 70 वर्षात्मकस्य लोकतान्त्रिके देशेऽस्मिन् इदानीमपि द्रव्यस्य शक्तेः संसाधनानां विकेन्द्रीकरणं पूर्णतः नैव जातं वर्तते। इदानीमपि दरिद्रनारायणाः सामाजिकवञ्चिताः मौलिकाऽधिकारवञ्चिताश्च जनाः बहुसंख्यकाः दृश्यन्त एव। सर्वेषां सौविध्यानाम् अवसराणां प्रकल्पमानेषु सर्वकारीयतन्त्रांशेषु साधनेषु सार्वजनिकप्राधिकरणादिषु कुत्र किं जायमानं वर्तत इति ज्ञातुं अधिकारिकगोपनीयताऽधिनियमः (1923) प्रतिबन्धक आसीत्। अस्याऽधिनियमस्य क्रियान्वयनेन सः प्रतिबन्धकः समाप्तो वर्तते। अस्याऽधिनियमस्य क्रियान्वयनाय महती आवश्यकता वर्तते। ते च अंशाः यथा -

1. मौलिकाऽधिकाराणां सन्दर्भे जनसामान्यस्य सशक्तीकरणाय जागरणाय च सूचनाऽधिकारस्य आवश्यकता वर्तते।
2. जनेषु प्रश्नकरणवृत्तेः जागरणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
3. राजनैतिकदलेषु उत्तरदायित्वस्य वर्धनाय सूचनाऽधिकारस्य आवश्यकता वर्तते।



Scanned with OKEN Scanner

4. विविधसर्वकारीयानुष्ठानेषु उत्तरदायित्वस्य वर्धनाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
5. सर्वकारीय-क्रियाकलापेषु पारदर्शितायाः, निष्पक्षिकतायाश्च वर्धनाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
6. सर्वकारीय-क्रियाकलापेषु उत्तरदायित्वस्य वर्धनाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
7. सर्वकारीय-क्रियाकलापेषु अवैधरीत्या अनैतिकरीत्या च जायमानस्याः पारस्परिकलब्धेः (Quid Pro ko) दूरीकरणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
8. सर्वकारीय-क्रियाकलापेषु आश्रितपक्षपातस्य, आश्रिताऽनुरागस्य, बन्धुप्रीतेः भयस्य च दूरीकरणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
9. उत्कोचस्य निर्मूलनाय, भ्रष्टाचारमुक्तभारतस्य निर्माणाय च सूचनाऽधिकारस्य आवश्यकता वर्तते।
10. सार्वजनिक-व्यवहारेषु दास्यवादपरम्परायाः दूरीकरणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
11. प्रजाभिः समर्पितस्य करस्य सद्विनियोगः जायते वा, न वा इति निर्धारणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
12. जनानां सौविध्यप्रकल्पने दृश्यमानस्य अलसत्वस्य दूरीकरणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।

## सूचनाऽधिकारस्य जागरणम्

सूचनाऽधिकाराऽधिनियमः (2005) भारतीयनागरिकानां कृते वरदानविशेषः, तेषां हस्ते पाशुपतास्त्रञ्च भवति, यतः सार्वजनिककार्यालयेभ्यो सार्वजनिकप्राधिकरणेभ्यश्च सूचनाभिलेखीय-प्रतिलिपीनां जालीयसूचनानां तन्त्रसूचनानां सूचनासेवानाञ्च प्राप्तये अधिकारः प्रददाति।

सार्वजनिकप्राधिकरणादिषु भ्रष्टाचारः सत्ताऽधिकारवृत्तिः / अधितन्त्रता (Red tapism), आश्रितपक्षपातः अनैतिकरीत्या पारस्परिकलब्धिः आश्रिताऽनुरागादि असामाजिकक्रियाकलापाः स्वतन्त्रभारतेऽपि प्रायः सर्वत्र परिदृश्यन्ते। स्वातन्त्र्यादारभ्य अद्यावधिपर्यन्तं सर्वेषां नागरिकाणां कल्याणाय जीवनहिताय च भारतसर्वकारेण विविधराज्यसर्वकारैश्च विविधप्रकारककल्याणयोजनानां क्रियान्वयनं कृतं क्रियामाणञ्च वर्तते। परन्तु दरिद्रनारायाणा अशिक्षिताः विविधप्रकारकसर्वकारीयसौविध्येभ्यः अवसरेभ्यश्च वञ्चिताः जनाः स्वतन्त्रे लोकतान्त्रिके च भारते बहुसंख्यकाः परिलक्ष्यन्ते। अर्थात् एतेसां योजनानां फलं सकारात्मकं नास्तीति सुस्पष्टतया ज्ञायत एव, सार्वजनिकप्राधिकरणेषु किं जातं जायमानञ्च वर्तत इति कोऽपि न जानन्ति स्म।

Scanned with OKEN Scanner

सूचनाऽधिकाराऽधिनियमस्य क्रियान्वयनात्परं सार्वजनिकप्राधिकरणेषु किं जातं जायमानञ्च वर्तते इति ज्ञातुं प्रत्येकं भारतीयनागरिकस्य अधिकारः वर्तते। अनेन सार्वजनिकप्राधिकरणीयक्रियाकलापेषु मुक्तता (Openness), पारदर्शिता (Transparency) उत्तरदायित्वादि (Accountability) लोकतान्त्रिकगुणाः समागताः वर्तन्ते। ग्रामीणक्षेत्रे निवसन्तः, अशिक्षिताः सामाजितया वञ्चिताश्च जनाः इदानीमपि सूचनाऽधिकाराऽधिनियमविषये न्यूनतया एव जानन्ति। एतादृशानां जनानां व्यवहारे जीवने च सूचनाऽधिकारस्य महत्वस्य वैशिष्ट्यस्य च वर्धनाय प्रयासाः विधेयाः भवन्ति, तस्य साफल्यं केवलं शिक्षाया उपरि एव निर्भरं भवति।

**सूचनाऽधिकारस्य जागरणे शिक्षा**

सूचनाऽधिकारस्य प्रचारे प्रसारे संरक्षणे जागरणे च शिक्षा महत्वपूर्णं साधनं भवति। मौलिकाऽधिकाराणां सूचनाऽधिकारस्य च विषये जनसामान्यस्य सशक्तीकरणाय जागरणाय च शिक्षा गतिशीला कुञ्चिका भवति। अनया शिक्षया

- सार्वजनिकप्राधिकरणेषु जायमानां वास्तविकस्थितिं ज्ञातुम् अपेक्षितायाः प्रश्नकरणवृत्तेः विकासः कारयते।
- सूचनाऽधिकारस्य वास्तविकविचाराणां वैशिष्ट्यस्य औन्नत्यस्य च ज्ञापने शिक्षा महत्वपूर्णा साधना भवति।
- सूचनाऽधिकारस्य गुणानां लाभानाञ्च ज्ञापने जनजागरणे च शिक्षा महत्वपूर्णा साधना भवति।
- भारतीयनागरिकाणां राजनैतिकाऽधिकाराणाम् मौलकाऽधिकारणाञ्च अवबोधे शिक्षा महत्वपूर्णा साधना भवति।
- सूचनाऽधिकारस्य विनियोगाय अपेक्षितानाम् आवश्यककौशलानाम् उन्नयने शिक्षा महत्वपूर्णा साधना भवति।
- सूचनाऽधिकारस्य प्रोत्साहने संरक्षणे क्रियान्वयने जागरणे च अपेक्षितानाम् आवश्यककौशलानाम् अभिवृत्तीनाञ्च उन्नयने शिक्षा महत्वपूर्णा साधना भवति।
- प्रत्येकं भारतीयः सूचनाऽधिकारस्य महत्वं ज्ञापने शिक्षा महत्वपूर्णा साधना भवति।
- सार्वजनिकप्राधिकरणेषु जायमानस्य भ्रष्टाचारस्य निर्मूलने सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सार्वजनिकप्राधिकरणीयानुष्ठानेषु कार्यक्रमेषु पारदर्शितायाः वर्धने सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सार्वजनिकप्राधिकरणीयानुष्ठानेषु उत्तरदायित्वस्य विकासे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।



Scanned with OKEN Scanner

- सर्वकारीय-क्रियाकलापेषु उत्पादनेषु सामग्र्यादिषु गुणवत्तायाः विकासे सूचनाऽधिकारस्य भूमिकां वर्धयते।
- राजनैतिकदलेषु उत्तरदायित्वस्य वर्धने सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- विविधसर्वकारीयानुष्ठानेषु उत्तरदायित्वस्य वर्धने सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सर्वकारीय-क्रियाकलापेषु पारदर्शितायाः, निष्पक्षिकतायाश्च वर्धने सूचनाऽधिकारस्य वर्चस्वं वर्धयते।
- सर्वकारीय-क्रियाकलापेषु उत्तरदायित्वस्य वर्धने सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सर्वकारीय-क्रियाकलापेषु अवैधरीत्या अनैतिकरीत्या च जायमानायाः पारस्परिकलब्धेः (Quid Pro ko) दूरीकरणे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सर्वकारीय-क्रियाकलापेषु आश्रितपक्षपातस्य, आश्रिताऽनुरागस्य, बन्धुप्रीतेः भयस्य च दूरीकरणे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- उत्कोचस्य निर्मूलनाय, भ्रष्टाचारमुक्तभारतस्य निर्माणे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सार्वजनिक-व्यवहारेषु दास्यवादपरम्परायाः दूरीकरणे सूचनाऽधिकारस्य औन्नत्यं वर्धयते।
- प्रजाभिः समर्पितस्य करस्य सद्विनियोगः जायते वा, दुर्विनियोगः जायते वा इति निर्धारणे सूचनाऽधिकारस्य वर्चस्वं भूमिकाम् औन्नत्यञ्च वर्धयते।
- जनानां सौविध्यप्रकल्पने दृश्यमानस्य अलसत्वस्य दूरीकरणे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- भारते सुशासनस्य परम्परायाः विकासे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।

**निष्कर्षाः—**

सूचनाऽधिकाराऽधिनियमः (2005) भारतीयनागरिकानां कृते वरदानविशेषः, तेषां हस्ते पाशुपतास्त्रञ्च भवति, यतः सार्वजनिककार्यालयेभ्यो सार्वजनिकप्राधिकरणेभ्यश्च सूचनाऽभिलेखीय-प्रतिलिपीनां जालीयसूचनानां तन्त्रसूचनानां सूचनासेवानाञ्च प्राप्तये अधिकारः प्रददाति। अस्यऽधिकारस्याऽनुप्रयोगेन सार्वजनिकप्राधिकरणादिषु बन्धुप्रीतिः भेदभावाः आश्रितपक्षपातः अनैतिकरीत्या अवैधरीत्या च जायमाना पारस्परिकलब्धिः उत्कोचः भ्रष्टाचारः सत्ताऽधिकारवृत्तिः / अधितन्त्रता (Red tapism), आश्रिताऽनुरागादि असामाजिकक्रियाकलापाः प्रायः विनश्यन्ते।

सार्वजनिकप्राधिकरणीयक्रियाकलापेषु मुक्तता (Openness), पारदर्शिता (Transparency) उत्तरदायित्वादि (Accountability), सुशासनादि (Good Governance) लोकतान्त्रिकगुणाः समागताः वर्तन्ते। अनेन सर्वजनहितं सर्वजनकल्याणं सशक्तभारतस्य निर्माणञ्च जायत इति कथने नास्ति लेशमात्रमपि



Scanned with OKEN Scanner

अतिशयोक्ति। परन्तु अस्याऽधिकारविषये जनजागरणं जनचैतन्यञ्चाऽनिवार्यं भवति। तदर्थं जनानां मानसपटले अधोलिखिताऽभिवृत्तेः विकासः करणीयः भवति, यत् -

अधिकाराः ईश्वरप्रसादिताः । अधिकाराय याचनां मा कुरु ।
अधिकाराय सन्धिं मा कुरु । अधिकाराय सततं संघर्षं कुरु ।
अनेन भवतो नाशो नष्टं वा न जायते, केवलं दासजीवनात्मुक्तिर्विना ।। इति।।

— इति शम् —

**अनुशीलिताः (References) -**


1. https://en.wikipedia.org/wiki/Right_to_Information_Act,_2005
2. https://rtionline.gov.in/
3. Sandy Feinzig and Swasti Rana: The Importance of Right to Information in Education: Putting a Human Face on a Fundamental Right
4. CIC : Using the Right to Information as an Anti-Corruption Tool (brochure)
5. RTI is a Powerful tool that Strengthens Democracy and Promotes good Governance by Enhancing People's Participation: Vice President press note, dated 11-07-20176
6. Mrs. Sampoorna Reddy : The Role of youth towards corruption free society
7. Mandakini Devasher Surie : Right to Information in India: An Effective Tool to Tackle Corruption


Scanned with OKEN Scanner



शिक्षाशास्त्रविभागीयप्रथमवर्षस्य छात्राः

Scanned with OKEN Scanner

# श्रीवैष्णवी

(वार्षिकी शोधपत्रिका)

संरक्षकः
**प्रो. परमेश्वरनारायणशास्त्री**
कुलपतिः

प्रधानसम्पादकः
**प्रो. वासुदेव शर्मा**
प्राचार्यः (प्र.)

सम्पादकौ
**डॉ. दे. दयानाथः**
**डॉ. दयानिधिशर्मा**

सहसम्पादकौ
**डॉ. आशीषकुमारः**
**डॉ. सुमनचन्द्रपन्तः 'सुमन्तः'**


## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः समविश्वविद्यालयः)
श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः - 181122

2019

प्राचीनवैयाकरणेरुच्यते समासे क्लृप्तशक्तिः विद्यते। तया एव क्लृप्तशक्त्या समासार्थबोधो भवति। तत्त्वचिन्तामणिकारेणोक्तम्–राज्ञः पुरुष इत्यादौ विग्रहे समासाभिधानाल्लुप्ता स्मृता षष्ठ्येव सम्बन्धस्मारिका अतो न लक्षणा न वा शक्तिरित्येके। अतः तत्र क्लृप्तशक्त्या एवार्थबोधो भवतीति आशयः।

परन्तु नवीनानां मते समासे समुदायशक्तिः वर्त्तते। तेषां मते अवयववर्त्तिन्या शक्तया लक्षणया वा कार्यनिर्वाहः न स्यादिति मत्त्वा सर्वस्मिन् समासे समुदायशक्तिमभ्युपयन्ति वैयाकरणाः। तेषां मते राजपुरुषः इत्यत्र राजविशिष्टपुरुष इत्यादौ समुदायार्थशक्तिः अवयवार्थशक्तेः भिन्न। यथा पङ्कजादिशब्दे अवयवशक्तिततो भिन्नैव पद्मत्वावच्छिन्ननिरूपितासमुदायशक्तिः। अत उच्यते– "समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्" इति। एवञ्च चित्रगवादिपदेऽपि स्वामित्वेन उपस्थितये समुदायशक्तिकल्पनं भवति। साम्प्रतं महाभाष्यकारस्य मतमिह उपस्थाप्यते।

**विषयप्रवेशः–**

महाभाष्ये पतञ्जलिना समासे समुदायशक्तिरस्तीति साक्षान्नोक्तम्। परन्तु एकार्थीभाव-जहत्स्वार्थसमुदायसामर्थ्यादीनां शब्दानां प्रयोगदर्शनाद् ज्ञायते यत् तेन समासे समुदायशक्तिः स्वीक्रियते। 'समर्थः पदविधिः' इति सूत्रस्य भाष्यपर्यालोचनादेव प्रतिपाद्यते यत् समासे समुदायशक्त्याऽर्थबोधो भवतीति पतञ्जलेरभिप्रायः।

सामर्थ्यं द्विविधम्। एकार्थीभावरूपं व्यपेक्षारूपञ्च। यत्र समुदायशक्त्याऽर्थबोधः तत्रैकार्थीभावरूपं सामर्थ्यम्। भाष्यकारमते एकार्थीभावसामर्थ्येऽधिकारे समासः संगृहीतो भवति। व्यपेक्षारूपसामर्थ्येऽधिकारे सर्वः संगृहीतो भवति। समासस्त्वेको संगृहीतो भवति। तथा चोक्तं भाष्याकारेणतथेदमपरं द्वैतं भवति–एकार्थीभावो वा सामर्थ्यं स्याद् व्यपेक्षा वेति। एकार्थीभावे सामर्थ्येऽधिकारे च सति समास एकः संगृहीतो भवति। विभक्तिविधानं पराङ्गवद्भावश्च संगृहीतो भवति। समासस्त्वेको संगृहीतः। अन्यत्र खल्वपि समर्थग्रहणानि युक्तग्रहणानि च कर्त्तव्यानि भवन्ति। क्वान्यत्र इसुसोः सामर्थ्ये न च वा हाहैवयुक्ते इति। व्यपेक्षायां पुनः सामर्थ्ये परिभाषायां च सत्यां यावान् व्याकरणे पदगन्धो नाम सर्वः संगृहीतो भवति। समासस्त्वेके संगृहीतः।

समर्थः पदविधिः इति शब्दानुशासनेन पदोद्देश्यकसमासादिविधेः सामर्थ्ये विधाननिर्देशाद् अधिकारे एकार्थीभावः सामर्थ्यमधिकारः इत्येकः पक्षः। व्यपेक्षा सामार्थ्याधिकारः इति द्वितीयः पक्षः। द्विविधं सामार्थ्यमधिकारः इति तृतीयः पक्षः। एवमेव परिभाषायामपि एकार्थीभावः सामर्थ्यपरिभाषा चेत्येकः पक्षः। व्येपेक्षा सामर्थ्यं सामर्थ्यं परिभाषा चेति द्वितीयः पक्षः। द्विविधं सामर्थ्यं परिभाषा चेति तृतीयः पक्षः इत्येवं षट्पक्षीसम्भवे तत्रैकार्थीभावः, सामर्थ्यं, परिभाषा चेत्येवं सूत्रमभिन्नतरकं भवति

प्राचीनवैयाकरणेरुच्यते समासे क्लृप्तशक्तिः विद्यते। तया एव क्लृप्तशक्त्या समासार्थबोधो भवति। तत्त्वचिन्तामणिकारेणोक्तम्-राज्ञः पुरुष इत्यादौ विग्रहे समासाभिधानाल्लुप्ता स्मृता षष्ठ्येव सम्बन्धस्मारिका अतो न लक्षणा न वा शक्तिरित्येके। अतः तत्र क्लृप्तशक्त्या एवार्थबोधो भवतीति आशयः।

परन्तु नवीनानां मते समासे समुदायशक्तिः वर्त्तते। तेषां मते अवयववर्त्तिन्या शक्तया लक्षणया वा कार्यनिर्वाहः न स्यादिति मत्त्वा सर्वस्मिन् समासे समुदायशक्तिमभ्युपयन्ति वैयाकरणाः। तेषां मते राजपुरुषः इत्यत्र राजविशिष्टपुरुष इत्यादौ समुदायार्थशक्तिः अवयवार्थशक्तेः भिन्न। यथा पङ्कजादिशब्दे अवयवशक्तिततो भिन्नैव पद्मत्वावच्छिन्ननिरूपितासमुदायशक्तिः। अत उच्यते- "समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्" इति। एवञ्च चित्रगवादिपदेऽपि स्वामित्वेन उपस्थितये समुदायशक्तिकल्पनं भवति। साम्प्रतं महाभाष्यकारस्य मतमिह उपस्थाप्यते।

**विषयप्रवेशः-**

महाभाष्ये पतञ्जलिना समासे समुदायशक्तिरस्तीति साक्षान्नोक्तम्। परन्तु एकार्थीभाव-जहत्स्वार्थसमुदायसामर्थ्यादीनां शब्दानां प्रयोगदर्शनाद् ज्ञायते यत् तेन समासे समुदायशक्तिः स्वीक्रियते। 'समर्थः पदविधिः' इति सूत्रस्य भाष्यपर्यालोचनादेव प्रतिपाद्यते यत् समासे समुदायशक्त्याऽर्थबोधो भवतीति पतञ्जलेरभिप्रायः।

सामर्थ्यं द्विविधम्। एकार्थीभावरूपं व्यपेक्षारूपञ्च। यत्र समुदायशक्त्याऽर्थबोधः तत्रैकार्थीभावरूपं सामर्थ्यम्। भाष्यकारमते एकार्थीभावसामर्थ्येऽधिकारे समासः संगृहीतो भवति। व्यपेक्षारूपसामर्थ्येऽधिकारे सर्वः संगृहीतो भवति। समासस्त्वेको संगृहीतो भवति। तथा चोक्तं भाष्याकारेणतथेदमपरं द्वैतं भवति-एकार्थीभावो वा सामर्थ्यं स्याद् व्यपेक्षा वेति। एकार्थीभावे सामर्थ्येऽधिकारे च सति समास एकः संगृहीतो भवति। विभक्तिविधानं पराङ्गवद्भावश्च संगृहीतो भवति। समासस्त्वेको संगृहीतः। अन्यत्र खल्वपि समर्थग्रहणानि युक्तग्रहणानि च कर्त्तव्यानि भवन्ति। क्वान्यत्र इसुसोः सामर्थ्ये न च वा हाहैवयुक्ते इति। व्यपेक्षायां पुनः सामर्थ्ये परिभाषायां च सत्यां यावान् व्याकरणे पदगन्धो नाम सर्वः संगृहीतो भवति। समासस्त्वेके संगृहीतः।

समर्थः पदविधिः इति शब्दानुशासनेन पदोद्देश्यकसमासादिविधेः सामर्थ्ये विधाननिर्देशाद् अधिकारे एकार्थीभावः सामर्थ्यमधिकारः इत्येकः पक्षः। व्यपेक्षा सामार्थ्याधिकारः इति द्वितीयः पक्षः। द्विविधं सामार्थ्यमधिकारः इति तृतीयः पक्षः। एवमेव परिभाषायामपि एकार्थीभावः सामर्थ्यपरिभाषा चेत्येकः पक्षः। व्येपेक्षा सामर्थ्य सामर्थ्यं परिभाषा चेति द्वितीयः पक्षः। द्विविधं सामर्थ्यं परिभाषा चेति तृतीयः पक्ष इत्येवं षट्पक्षीसम्भवे तत्रैकार्थीभावः, सामर्थ्यं, परिभाषा चेत्येवं सूत्रमभिन्नतरकं भवति

इत्येकार्थीभावरूपसामर्थ्य एव समासविधिः स्वीक्रियते इति भाष्यवचनाद् ज्ञायते यत् भाष्यकारेण पतञ्जलिना समासे समुदायशक्तिः एकार्थीभावरूपञ्च सामर्थ्यं स्वीक्रियते।

सामर्थ्यमेकार्थीभावरूपं व्यपेक्षाभावरूपं वा स्तु। परन्तु समर्थग्रहणस्य का प्रयोजनीयता? तदुत्तरे पतञ्जलिनोक्तम्- समर्थः पदविधिः इत्यत्र समर्थग्रहणादेव कष्टश्रितः शङ्कुलाखण्डः इत्यादि द्वितीयादितत्पुरुषसमासाः सम्भवन्ति। तथा चोक्तम्- अथ समर्थग्रहणं किमर्थम्? वक्ष्यति- द्वितीया श्रितादिभिः समस्यते, कष्टश्रितो, नरकाश्रित इति। समर्थग्रहणं किमर्थम्? पश्य देवदत्त कष्टश्रितो विष्णुमित्रो गुरुकुलम्। तृतीया तत्कृतार्थेन गुणवचनेन। उपादानविकलः, शङ्कुलाखण्डः, किरिकाणः। समर्थग्रहणं किमर्थम्? तिष्ठ त्वं शङ्कुलया, खण्डो धावति मुसलेन। किं त्वं करिष्यसि शङ्कुलया खण्डो विष्णुमित्र उपलेन। चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। गोहितम्। वृषभहितम्। अश्वहितम्। समथग्रहणं किमर्थम्? सुखं गोभ्यो - हितं देवदत्ताय। पञ्चमी भयेन। वृकभयं, चोरभयम्। समर्थग्रहणं किमर्थम्? गच्छ त्वं, मा वृकेभ्योभयं देवदत्ताद् यज्ञदत्तस्य। षष्टी सुबन्तेन समस्यते। राजपुरुषः, समर्थग्रहणं किमर्थम्? भार्या राज्ञः पुरुष देवदत्तस्येति। सप्तमी शौण्डैः, अक्षशौण्डः, स्त्रीशौण्डः। समर्थग्रहणं किमर्थम्? कुशलो देवदत्तो क्षेषुः शौण्डः पिबति पानागारे।

पतञ्जलिमते सामर्थ्यमेकार्थीभावरूपम्। परन्तु अत्र शङ्का जायते यत् सामर्थ्यं यदि एकार्थीभावरूपं भवति तर्हि अनेकमन्यपदार्थे, चार्थे द्वन्द्वः इत्यादिभिः सूत्रैः विहितानां यथार्थभिधानं भवति तत्किं स्वाभाविकं भवति आहोस्विद् वाचनिकमित्यस्मिन् विषये पतञ्जलिनोक्तम्-अर्थतस्मिन्नेकार्थीभावकृते विशेषे किं स्वाभाविकं शब्दैरर्थाभिधानात् आहोस्विद् वाचनिकम्। स्वाभाविकमर्थानादेशनात्। स्वाभाविकमित्याहकुत एतत् अर्थानादेशानात्। न ह्यर्था आदिश्यन्ते। कथं पुनरर्थानादिशन्नेवं ब्रूयात्- नार्था आदिश्यन्ते इति, यदाह भगवान् अनेकमन्यपदार्थे चार्थे द्वन्द्व अपत्ये रक्ते निर्वृत्ते इति।

नैतान्यर्थादेशनानि। स्वभावत एतेषां शब्दानामेतेष्वभिनिविष्टानां निमित्तत्वेनाऽन्वाख्यान क्रियते। तद्यथाः कूपे हस्तदक्षिणः पन्थाः, अभ्रे चन्द्रमसं पश्येति। स्वभावतस्तत्रस्थस्य पथश्चन्द्रमसश्च निमित्तत्वेनाऽन्वाख्यानं क्रियते। एवमेहापि चार्थे यः स द्वन्द्वसमासोऽन्य-पदार्थे यः स बहुव्रीहिरिति। किं पुनः कारणमर्था नादिश्यन्ते। तच्च लघ्वर्थम्। लघ्वर्थ ह्यर्था नादिश्यन्ते। अवश्यं ह्यनेनार्थानादिशता केनचिच्छब्देनाऽर्थनिर्देशः। कर्त्तव्यः स्यात् तस्य च तावत्केन कृतो योनासौ क्रियते। अथ तस्य केन कृतः, तस्य केन कृतः, तस्य केन कृतः, तस्य केन इत्यनवस्था च स्यात्। असम्भवः खल्वर्थादेशनस्य।

पतञ्जलिमते समासार्थाभिधाने जहत्स्वार्थाजहत्सार्थभेदेन वृत्तिद्वयं सम्भवति जहत्स्वार्थवृत्तौ समासघटितपदानि स्वमवयवार्थं परित्यज्य अपरमर्थं प्रकाशयन्ति अजहत्स्वार्थवृत्तौ तु समासाधटितपदानिस्वमवयवार्थमपरित्यज्यापरमर्थं बोधयन्ति। एव

विधामुभयविधां वृत्तिं निरूप्य व्यवस्थापयति भाष्यकारः। तथाहि- अथ तेषामेव ब्रुवतां किं जहत्स्वार्था वृत्तिर्भवति, आहोस्विदजहत्स्वार्था। किं चात यदि जहत्स्वार्था वृत्तिः उभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनं प्राप्नोति औपगवमानय इत्युक्तेऽपत्यमात्रस्य। अथाजहत्स्वार्था वृत्तिः उभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। का पुनर्वृत्तिर्न्याय्या। जहत्स्वार्था युक्तं पुनर्यज्जहत्स्वार्था नाम वृत्तीः स्यात्। बाढं युक्तम्। एवं हि दृश्यते लोकेपुरुषो यं परकर्मणि प्रवर्त्तमानः स्वं कर्म जहाति। एवं युक्तं यद्राजा पुरुषार्थे वर्त्तमानः स्वमर्थं जह्यात्। उपगश्चापत्यार्थे वर्त्तमानः स्वमर्थं जह्यात्। ननु चोक्तं- राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति, औपगवमानयेत्युक्तेऽपत्य-मात्रस्येति नैष दोषः। जहदप्यसौ स्वार्थं नात्यन्ताय जहाति, यः परार्थविरोधी स्वार्थस्तं जहाति। तद्यथा- तक्षा राजकर्मणि प्रवर्त्तमानः स्व तक्षकर्म जहाति, नतु हिक्कतश्वसितसितकण्डूयितानि। न चायमर्थः परार्थविरोधी विशेषणं नाम, तस्मात्तत्र हास्यति।

अथवाऽन्वयाद्विशेषणं भविष्यति। तद्यथा- घृतघटः तैलघट इति। निषिक्ते घृते तैले वान्वयाद्विशेषणं भवति-अयं घृतघटो यं तैलघट इति। विषय उपन्यासः। भवति हि तत्र या च यावती चार्थमात्रा। अङ्ग। हि भवानग्नौ निष्टप्य घृतघटं तृणकूर्चेन प्रक्षालयतु न गंस्यते स विशेषः।

यथा तर्हि मल्लिकापुटः चम्पकपुट इति। निष्कीर्णास्वपि सुमनः स्वन्वयाद्विशेषणं भवति- अयं मल्लिकापुटः, अयं चम्पकपुट इति। अथवा समर्थकारो यं वृत्तौ क्रियते। भेदसंसर्गौ वा सामर्थ्यमिति। कः पुनर्भेदः सामर्थ्य नाम भेदः संसर्गो वा। अपर आह- भेदसंसर्गौ वा सामर्थ्यमिति। कः पुनर्भेदः संसर्गो वा। इह राज्ञ इत्युक्ते सर्वं स्वं प्रसक्तम्। पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। इहेदानीं राजपुरुषामानयेत्युक्ते राजा पुरुषं निर्वयत्यन्येभ्यः स्वामिभ्यः पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यः। एवमेतस्मिन्नुभयतो व्यवच्छिन्ने यदि स्वार्थं जहाति कामं जहातु, न जातुचित्यपुरुषमात्रस्यानयनं भविष्यति। अथवा पुनरस्तु अजहत्स्वार्था वृत्तिः। युक्तं पुनरिदं यदजहत्स्वार्था नाम वृत्तिः स्यात्। बाढं युक्तम्। एवं हि दृश्यते लोके - भिक्षुकोऽयं द्वितीयां भिक्षां सामासाद्य पूर्वां न जहाति। संचयायैव प्रवत्तते। ननु चोक्तम्-उभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोतीति। कस्याः पुनर्द्विवचनं प्राप्नोति। प्रथमायाः। न प्रथमासामर्थ्ये राजा। षष्ठ्यास्तर्हि प्राप्नोति। न षष्ठीसमर्थः पुरुषः। प्रथमाया एव तर्हि प्राप्नोति। ननु चोक्तम्- न प्रथमा समर्थो राजेति। अभिहितः सोऽर्थोऽन्तर्भृतः प्रातिपादिकार्थः सम्पन्नः। तत्र प्रातिपादिकार्थे प्रथमेति प्रथमाया एव द्विवचनं प्राप्नोति।

'पृथगर्थानामेकार्थीभावः समर्थवचनम्' इति वार्त्तिकस्य भाष्यरचना-

वार्त्तिककारस्य 'पृथगर्थानामेकार्थीभावः समर्थवचनम्' इति वार्त्तिकस्य भाष्यरचना-वेलायां भाष्यकारेणोक्तम्-पृथगर्थानां पदानामेकार्थीभावः समर्थमित्युच्यते, क्व पुनः

पृथगर्थनि क्वैकार्थानि। वाक्ये पृथगर्थानि राज्ञः पुरुष इति, समासे पुनः एकार्थानि राजुपरुष इति।

कात्यायनेन इव पतञ्जलिनाऽपि वाक्यसमासयोः भेदो निर्णीतः। वाक्यसमासयोः भिन्नत्वात्त- योरर्थाभिधाने भिन्नत्वं दृश्यते। वाक्येऽवयवशक्त्याऽर्थबोधः समासे तु समुदायशक्त्या अथबोधो इति नियमोऽपि समासे समुदायशक्तिं स्थापयति। यथा- ऋद्धस्य राज्ञः पुरुषः इत्यत्र राज्ञि ऋद्धत्वविशेषणमन्वेति। परन्तु ऋद्धस्य राजपुरुष इत्यत्र राज्ञि पुरुषविशेषणे ऋद्धत्वविशेषणं नान्वेति। विशिष्टस्यैकपदार्थतया राज्ञः पदार्थैकदेशत्वात्। तथा च नियमः- पदार्थः पदार्थेनान्वेति न तु तदेकदेशेन। एतस्माद् ज्ञायते यत् समासे पतञ्जलिना विशिष्टैकार्थः स्वीक्रियते। स चार्थः समुदायशक्तिं विना न सम्भवति इति समासे समुदायशक्तिरिति तस्याभिप्रायः।

यदि समासे व्यपेक्षालक्षणं सामर्थ्यं स्वीक्रियते तर्हि गौरवदोषो जायते। तत्र व्यपेक्षायां सामर्थ्ये नानाकारकान्निघातयुष्मदस्मदादेशप्राप्तिः भवति। तेषां निषेधः कर्त्तव्यः। एतेन गौरवं जायते। तथा चोक्तं पतञ्जलिनाअर्थतस्मिन्व्यपेक्षायां सामर्थ्ये योऽसावेकार्थी-भावकृतो विशेषः स वक्तव्यः। तत्र नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेधः। तत्रैतस्मिन् व्यपेक्षायां सामर्थ्ये नानाकारकान्निघातयुष्मदस्मदादेशाः प्राप्नुवन्ति तेषां प्रतिषेधो वक्तव्यः। निघातः- अयं दण्डो हरानेन। अस्ति दण्डस्य हरतेश्च व्यपेक्षेति कृत्वा निघातः प्राप्नोति। युष्मदस्मदादेशाः ओदनं पच तव भविष्यति। ओदनं पच मम भविष्यति। अस्त्योदनस्य युष्मदस्मदोश्च व्यपेक्षेति कृत्वा वाम्नावादयः प्राप्नुवन्ति तेषां प्रतिषेधो वक्तव्यः। किमुच्यते- नानाकारकादिति, यदा नैवासज्य ह्रियते। नापि ब्रुमः- अन्येनासज्य ह्रियत इति किं तर्हि शब्दप्रमाणका वयम्। यच्छब्द आह तदस्माकं प्रमाणम्। शब्दश्चेह सत्तामाह- अयं दण्डः। अस्तीति गम्यते। स दण्डः कर्त्ता भूत्वा अन्येन शब्देनाभिसंबध्यमानः करणं सम्पद्यते। तद्यथा- कश्चित्कंचित्पृच्छति-क्व देवदत्तः इति। स तस्मै आचष्टे- असौ वृक्षे इति। कतरस्मिन्। यस्तिष्ठतीति। स वृक्षोऽधिकरणं भूत्वा अन्येन शब्देनाभिसंबध्यमानः कर्त्ता संपद्यते।

इत्थं पतञ्जलिना समासे एकार्थीभावलक्षणं सामर्थ्यं समुदायशक्तिश्च स्वीक्रियते इति ज्ञायते।

**उपसंहारः-**

महर्षिपाणिनिना पदोद्देश्यकविधीनां सामर्थ्ये विधानार्थं समर्थः पदविधिः इति सूत्रं प्रणीतम्। सामर्थ्यञ्च लोके वाक्यात्मकं समासात्मकं द्विविधं दृश्यते। तदेवानुसृत्य वार्त्तिककारस्य पृथगर्थानामेकार्थीभावः समर्थवचनम्, परस्परव्यपेक्षां सामर्थ्यमेके इति वचनद्वयी प्रतिष्ठते। तदनुयायिभिः महाभाष्यकारैः च तथेदमपरं द्वैतं भवति- एकार्थीभावो

वा सामर्थ्यं व्यपेक्षा वेत्याद्युक्तिभिः समासस्यैकार्तीभावात्मकता वाक्यस्य च व्यपेक्षात्मकता प्रतिपादिता।

ग्रन्थऋणम्–

1. डा. जयकान्तसिंहशर्मा, समासशक्तिसमीक्षा, मान्यताप्रकाशन, दिल्ली, 2005
2. पण्डितमाधवशास्त्रभण्डारी, वैयाकरणसिद्धान्तलघुमञ्जुषा, चोखम्बासंस्कृतसीरीज, वाराणसी, 1989
3. भार्गवशास्त्री जोशी, व्याकरणमहाभाष्यम्, चौखम्बासुरभारतीप्रकाशन, वाराणसी, 2007
4. श्रीगुरुप्रसादशास्त्री, लघुशब्देन्दुशेखरः, चौखम्बासुरभारतीप्रकाशन, वाराणसी, 2013
5. श्रीगोपालदत्तपाण्डेय, सिद्धान्तकौमुदी, बालमनोरमाव्याख्योपेतो. चौखम्बासुरभारती–प्रकाशन, वाराणसी, 2013

षष्ठोऽङ्कः 2018-19

ISSN 2395-7921

# शिक्षारश्मिः

समीक्षिता मूल्याङ्किता च वार्षिकशोधपत्रिका

A Peer Reviewed Refereed Annual Research Journal

प्रधानसम्पादकः

प्रो. सुदेशकुमारशर्म्मा

सम्पादकः

डा. देवदत्तसरोदे

शिक्षाशास्त्रविभागः

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 77

Scanned with OKEN Scanner



प्रो. सुदेशशर्मा
प्राचार्यः



डा. देवदत्तसरोदे
विभागाध्यक्षः



डा. वि.एस्.वि. भास्कररेड्डी



डा. कुमारः



डा. विनोदकुमारशर्मा



डा. सचिनकुमारः



डा. मनीषकुमारचाण्डकः



डा. जितेन्द्रकुमाररायगुरुः

Scanned with OKEN Scanner

Peer Reviewed Refereed Journal

ISSN : 2395-7921

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

## Annual Research Journal of Department of Education

(समीक्षिता मूल्याङ्किता च शोधपत्रिका)

2018 - 19

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम्।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्
सोमय्याभुवि भासते परिसरो विद्याविहारे स्थितः।।

संरक्षकः
आचार्यः परमेश्वरनारायणशास्त्री
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.) नवदेहली

प्रधानसम्पादकः
आचार्यः सुदेशकुमारशर्म्मा
प्राचार्यः, क. जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई

सम्पादकः
डॉ. देवदत्तसरोदे

राष्ट्रियसंस्कृतसंस्थानम्
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्
(मानितविश्वविद्यालयः)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः (पूर्वम्) मुम्बई - 400077

Scanned with OKEN Scanner

पत्रिकानाम : शिक्षारश्मिः (शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका)
प्रकाशकः : शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम् ( मा. वि.), मुम्बई - 77
© प्रतिलिप्यधिकारः : प्रकाशकाधीनः
ISSN : 2395-7921
संरक्षकः : आचार्यः परमेश्वरनारायणशास्त्री, कुलपतिः
प्रधानसम्पादकः : आचार्यः सुदेशकुमारशर्मा, प्राचार्यः
सम्पादकः : डॉ. देवदत्तसरोदे, विभागाध्यक्षः
सम्पादकमण्डलम् : डॉ. वि. एस्. वि. भास्कररेड्डि
डॉ. कुमारः
डॉ. विनोदकुमारशर्मा
डॉ. सचिनकुमारः
डॉ. मनिष चाण्डकः
डॉ. जितेन्द्रकुमाररायगुरुः

मूल्याङ्कनकर्तृमण्डलम्

- प्रो. प्रकाशचन्द्रः
प्राचार्यचरः, क.जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई
- प्रो. सुदेशकुमारशर्म्मा
प्राचार्यः, क.जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई
- प्रो. बोधकुमारझा
विभागाध्यक्षः, व्याकरणविभागः,
क.जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई
- डॉ. मुरलीकृष्णः
सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पुनर्वीक्षकमण्डलम्

- प्रो. एन. एन. जोशी
आचार्यचरः, क.जे. सोमैयाकलावाणिज्यमहाविद्यालयः, मुम्बई
- प्रो. लोकमान्यमिश्रः
विभागाध्यक्षः, शिक्षाविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि)
लखनऊपरिसरः, लखनऊ
- प्रो. प्रह्लादजोशी
विभागाध्यक्षः, शिक्षाविभागः, आर्. एस्.वि.पि., तिरुपतिः
- प्रो. जयकृष्णन्
आचार्यः, शिक्षाविभागः,
श्रीलालबहादुरशास्त्रीसंस्कृतविद्यापीठम्, नवदेहली

प्रकाशनवर्षम् : 2019
अनुकृतयः : 200
मुखचित्रविन्यासः : डॉ. जितेन्द्रकुमाररायगुरुः
अवधातव्यम् : शोधपत्रिकायाममुष्यां प्रकाशितशोधपत्राणां मौलिकत्वस्य तत्र प्रतिपादित-विचारस्य च कृते समग्रमुत्तरदायित्वं शोधपत्रलेखकानामेव भविष्यति, न वा सम्पादकस्य न च प्रकाशकस्य भविष्यतीति विज्ञाप्यते ।
मुद्रणम् : RANK PRINTERS, MULUND (W), MUMBAI

Scanned with OKEN Scanner



# सम्पादकीयम्

**अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम।**
**सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः॥** यजुर्वेद 7.14

**'सा प्रथमा संस्कृतिर्विश्ववारा'** इति अध्वर्युवेदस्य आर्षोक्तरीत्या भारतीया संस्कृतिः विश्वजनैः वरणीया सेवनीया च विद्यते। सेयं भारतीया संस्कृतिः विश्वजनीना परममहनीया पुराकालात् परमश्रद्धास्थानं बिभ्राणा विलसति। एतस्याः संस्कृतेः आधारभूता संस्कृतभाषा विद्यते। सैषा संस्कृतभाषा भारतस्य प्रतिष्ठाऽपि अस्ति। तथा चोक्तम् -**'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा '।**

विश्वस्मिन् विश्वेऽविशं संस्कृतस्य संस्कृतशास्त्राणाञ्च ज्ञानं विज्ञानञ्च विकचीकर्तुं **राष्ट्रियसंस्कृतसंस्थानं** संस्कृतजगति उदयाचलारूढो भानुरिव भृशं भ्राजते । अस्यैव द्वादशसु परिसरेष्वन्यतमः परिसरः मुम्बानगर्यां **राष्ट्रियसंस्कृतसंस्थानम्, क.जे. सोमैया संस्कृतविद्यापीठमि**त्याख्यया प्रथितयशस्कोऽयं वेविद्यते । अत्र साहित्यम्, व्याकरणम्, ज्योतिषम्, शिक्षाशास्त्रम्, मुक्तस्वाध्यायकेन्द्रमिति विभागपञ्चकं विलसति । इह शिक्षाशास्त्रविभागे वर्षद्वयस्य शिक्षाशास्त्रिपाठ्यक्रमे ९७ छात्राः अधीयानाः सन्ति । संस्कृतशिक्षणं शास्त्रशिक्षणं कथं विधेयम्? एतदर्थं शिक्षाशास्त्रविभागः प्राचीनाधुनिकरीतिं समासाद्य शिक्षणम्, अनुसन्धानं , प्रकाशनम् इत्येतत् कार्यत्रयम् अनुतिष्ठति। तत्र प्रकाशनकार्ये **शिक्षारश्मिः** इति वार्षिकी शोधपत्रिका आङ्ग्लहिन्दीसंस्कृतमिति तिसृभिः भाषाभिः भूषिता शिक्षाशास्त्रज्ञानसुषमामाविष्कुर्वती विलसति इति विदितचरमेव प्रेक्षावतां शेमुषीजुषाम् ।

शिक्षाशास्त्रमित्युच्यमाने तत्र का नु खलु शिक्षेति स्वाभाविकी जिज्ञासा जागर्त्येव। प्रकृतप्रसङ्गे शिक्षा नाम मानवस्य सर्वाङ्गीणविकासः इति आमनन्ति शिक्षाविपश्चिद्वराः । शीलनिर्माणमेव शिक्षा इति अपरे शिक्षाविदः, उत्तमव्यक्तित्वनिर्माणमेव शिक्षा इति केचित्। उत्तमव्यक्तित्वस्य मूलं कारणं भवति तदीयजनस्य शीलम्। अत एव **सर्वेषामपि *सर्वकारणमिदं शीलं परं भूषणम्*'** *इति* शीलं परमभूषणत्वेन परिकीर्तितं भर्तृहरिणा नीतिशतके । शिक्षामुखेन शीलं, व्यक्तित्वञ्च संवर्धयितुं शिक्षणकर्मणि मनोवैज्ञानिकप्राविधिकतत्त्वानाम् आलम्बनं नितान्तमपेक्षितम्, अतः सर्वमेतत् मनसि निधाय अमुमेव विषयं केन्द्रीकृत्य देशस्य दिग्दिगन्तरालेषु निवसतां शिक्षाशास्त्रनदीष्णानां संस्कृतशास्त्रसारस्वतसमाराधनतत्पराणां विदुषां नैके शोधलेखाः समधिगताःसन्ति। एतान् सर्वान् महता प्रयत्नेन सुचारुतया सम्पाद्य प्रज्ञाप्रसूतैर्लेखनैर्गुणवतीयं **शिक्षारश्मि**रित्याख्या शोधपत्रिका प्रतिवत्सरमिव अस्मिन् हायनेऽपि प्राकाश्यन्नीयते इति अमन्दमानन्दमनुभवामो वयम् । अत्र विद्यमानं शिक्षाशास्त्रविषयवैविध्यं, भाषावैविध्यं च नूनम् अभिज्ञशास्त्राधिजिगासूनां मनांसि प्रसह्य आवर्जयति इत्यत्र नास्त्यल्पीयान् अपि आरेकः । पत्रिकायामस्यां नैकशास्त्रकोविदैः आचार्यैः, शिक्षाशास्त्रिभिः, शोधच्छात्रैः, छात्राध्यापकैः प्रयत्नेन लिखिताः शिक्षासम्बद्धाः लेखाः प्रकाश्यमानाः सन्ति । प्रयत्नोऽयं कियत्साफल्यमञ्चतीति अधरोत्तरं व्यक्तीकर्तुं विद्वद्वरेण्या एव प्रमाणम् ।
राष्ट्रियसंस्कृतसंस्थानम् इति मानितविश्वविद्यालयस्य वदान्यैः कुलपतिवर्यैः मान्यैः **परमेश्वरनारायणशास्त्रिभिः** प्रदत्ताशीर्वचनैः, अन्यैः आचार्यैः रातैः शुभाशंसवचोभिः अभिप्रेरणाभिः प्रचोदिताः वयं हर्षातिरेकमनुभवामः ।

परिसरस्य प्राचार्याः **सुदेशकुमारशर्ममहोदयाः**, काले काले समुपदिशन्तः, सहायं कुर्वाणाः जटिलमेतत्कार्यं सरलमकार्षुः। विभागीयाध्यापकाः, छात्राः, कर्मचारिणश्च महता प्रयत्नेन पत्रिकासम्पादनप्रकाशननियोगमिमं द्राक् पूर्णतामनैषुः , अतः समेभ्यः कार्तज्ञ्यवचांसि वितीर्य विरम्यते विस्तरात् ।

**डा.देवदत्तसरोदे**



Scanned with OKEN Scanner

# विषयानुक्रमणिका


| क्रं.सं | शोधपत्रस्य शीर्षकम् | लेखकः | पृष्ठसंख्या |
|---|---|---|---|
| 1. | शिक्षणाधिगमयोः मनोवैज्ञानिकप्राविधिकतत्त्वानामनुप्रयोगः | श्री. पी. नागमुनिरेड्डी | 1 |
| 2. | संस्कृतशास्त्रेषु विद्यमानाधिगमतत्त्वस्य तदुपकारकोपायानाञ्च विचारः | डॉ. देवदत्तसरोदे | 6 |
| 3. | अन्तर्जालाश्रित-शिक्षणाधिगमप्रक्रिया | डॉ. हरिप्रसादः के. | 17 |
| 4. | शिक्षणाधिगमयोः मनोवैज्ञानिक-प्राविधिकतत्त्वानामनुप्रयोगः | डॉ. वेङ्कटरमणभट्टः | 22 |
| 5. | शिक्षणाधिगमयोः प्राविधिकतत्त्वानां प्रयोगे गुणदोषविमर्शः | डॉ. कुमारः | 25 |
| 6. | व्यक्तित्वम् | डॉ. विनोदकुमारशर्मा | 30 |
| 7. | संस्कृतभाषाधिगमे मोबाइलसहकृतभाषाधिगमस्य अनुप्रयोगः | डॉ. सचिनकुमार | 35 |
| 8. | भाषायाः उद्गमे विविधसिद्धान्ताः | डॉ. बिचित्ररञ्जनपण्डा | 41 |
| 9. | भर्तृहरिकृते वाक्यपदीये भाषावैज्ञानिकतत्त्वानि | डॉ. मनीषजुगरान | 47 |
| 10. | शिक्षणाधिगमयोः मनोवैज्ञानिकप्राविधिक-तत्त्वानामनुप्रयोगे शिक्षकः | डॉ. डम्बरुधरपतिः | 57 |
| 11. | शिक्षणाधिगमप्रक्रियायाम् अधिगमसिद्धान्तानां विनियोगः | डॉ. रुद्रनारायणनरसिंहमिश्रः | 62 |
| 12. | शिक्षणाधिगमयोः शास्त्रेषु उपनिषत्सु च वर्णिताः मनोवैज्ञानिकाभिगमाः | डॉ. गणपति वि. हेगडे | 66 |
| 13. | भारते अध्यापकशिक्षा | डॉ. महेशकुमारपाणिग्राही | 73 |
| 14. | साम्प्रतिकशिक्षाक्रमे मूल्यसम्वर्धने गैर्वाण्याः उपादेयता | डॉ. प्रभलविद्याधरः | 83 |
| 15. | शिक्षणकर्मणि अन्तर्जालस्य विनियोगः | Dr. S.T.P Kanakvali | 88 |
| 16. | शिबिरविधिः | एस्.वैष्णवी | 95 |
| 17. | शारीरिक शिक्षा में आईसीटी | Dr. Shankar B. Andhale | 101 |
| 18. | Implematation of Inclusive Education in India : Issues and Challenges | Dr.V.S.V. Bhaskar Reddy | 106 |

19. Application of MOOCs & SWAYAM in Teaching Learning Process — Dr. J. K. Rayaguru — 113

20. Use of Internet in Teaching Learning Process — Dr. Manish K. Chandak — 119

21. Role of SWAYAM in Online Teaching-Learning Process — Dr. Prem Singh Sikarwar — 126

22. Virtual Classroom: An Interactive Model for E-learning — Dr. Shweta Sood — 132

23. Innovative Perspective of Applying Technology in Sanskrit Education — Dr. Namrata Patel — 137

## प्रज्ञानखण्डः

24. शास्त्रशिक्षणविधयः शास्त्रसंरक्षणोपायाश्च — गान्धिवर्गः — 144

25. विविधमनोवैज्ञानिकानां मतानुसारं व्यक्तित्वस्य सिद्धान्ताः — भामहवर्गः — 155

26. भारतीयपाश्चात्यदर्शनयोः संवर्णितानां शैक्षिकतत्त्वानां समालोचनम् — दण्डिवर्गः — 165

27. आधुनिकभारते संस्कृतशिक्षणस्य आवश्यकता उपहृतयश्च — कुन्तकवर्गः — 176

28. शिक्षणे अधिगममूल्याकलनयोः महत्त्वम् — सावरकरवर्गः — 182

29. केन्द्रीय हिंदी निदेशालय का हिंदी के विकास में योगदान — जगन्नाथवर्गः — 187

***********



Scanned with OKEN Scanner

# Application of MOOCs & SWAYAM in Teaching Learning Process

✍ Dr. Jitendra Kumar Rayaguru *


## ABSTRACT

This research paper emphasizes the use of MOOCs and SWAYAM in Teaching Learning Process. The trend of Teaching Learning Process in India is changing day by day. In the trend of Traditional way of Teaching Learning Process, distance learning came into existence in the form of Correspondence courses in the 19th century, later Audio-visual broadcast of courses and early forms of e-learning. At present digital age of learning is the happening with the increase in online and distance education through open learning opportunities and the development of MOOCs in SWAYAM platform. MOOCs and SWAYAM platforms are one of the most prominent trends in higher education in recent years. With time and place flexibility, MOOCs gathers scholars and 'like-minded fellow learners around the globe'. This study provides an overview about MOOCs and SWAYAM, about how technology has changed over the years the face of distance learning and how relevant and beneficial these courses might be for distance learners. Studies related to MOOCs and SWAYAM in India and world around have been reviewed. It also furnishes the details of various MOOCs platform such as The Open University, Iversity, ALISON, Open Learning, Coursera, Udacity, EdX and EduKart available free of cost to distance learners. This paper further provides availability of MOOCs in India and various institutions and companies associated across the nation providing MOOCs courses to academia. Limitations of MOOCs and their future has also been discussed. The paper concludes that MOOCs and online education has a huge potential which would help in accelerating and ensuring social cohesion and sustainable growth. With little efforts by the government of India, online education can successfully reach every individual.


**Keywords** – MOOCs, CMOOCs, XMOOCs, SWAYAM

## Introduction –

Higher education has been around the world for centuries and today because of cost it is facing a huge dilemma among students with an enormous debt burden. First MOOCS was emanated from Open educational resources. By definition, MOOCs take place online. They could be affiliated with a university, but not necessarily. These days, most of the prestigious universities offer a large number of students the opportunity to study high quality courses online often at no cost. They are ideal for independent study and users can select courses from any institution offering them. A massive wave of opportunity has knocked the door of formative education in the form of MOOCs which stands for Massive Open Online Courses. This revolutionary step towards providing versatile education has yielded some impressive results. The MOOC is massive open online course. A MOOC is an online course aimed at unlimited participation and open access via the web. as the name itself indicates the MOOC is.

* *Contract Teacher, Shikshashastra, Rashtriya Sanskrit Sansthan (DU), K J Somaiya Campus, Mumbai.*



Scanned with OKEN Scanner

**Massive** – means the targeted participants are in large number not limited to the class or the college the any person can get registered themselves without any educational background and start learning.

**Open** – The courses offered are open to all without any geographical boundaries.

**Online** – The courses are available online and can be accessed anywhere and anytime free of cost.

**Courses** – There are many courses available across the discipline and can be taken with any educational background.

**History of MOOCs –**

It emerged from Open Educational Resources (OER) movement. The MOOC was coined in 2008 by Dave Cormier of the university of Prince Edward Island in response to a course called connectivism connective knowledge (also know as CCk08) According to The New York Times, 2012 became the year of the MOOC as several well-financed providers, associated with top universites, emerged including Coursera, Udacity, edX, Lversity, Futurelearn, Khan Academy, Miriadax, Open2study and Udemy.

Before MOOCS came on the scene, there were two other basic types of distance learning: Open Course Ware and Online college classes – both are at opposite ends of the spectrum. OCW is basically just a publication of an institution's course material online. The material can be used by anyone and even edited. OCC have been around for quite a while, and they are widely understood and utilized. However, MOOCs have only been around since 2012 and many people either don't know what they are or assume they are similar to online to online college classes. MOOCs are a kind of middle ground between the two extremes. Hear are some of the main differences: Cost, Structure, Grading and Availability.

**Types of MOOCs –**

MOOC are broadly classified into cMOOC and xMOOC.

| 31 | वास्तुशास्त्रदृष्ट्या गृहदोषनिरूपणम् | डॉ. अनिरुद्धनारायणशुक्ल: | 204 |
| 32 | शारीरिक स्वास्थ्य एवं योग, एक अध्ययन | डॉ. शंकर बाबुराव आंधळे | 210 |
| 33 | तार्किकमतनिरसनपूर्वक: स्फोटविमर्श: | सुश्रीविदुषीबोल्ला | 216 |
| 34 | Polymorphism and Overloading | Miss Vaishali Nivdunge | 226 |
| 35 | शतरुद्रियस्य वैषयिकाधारा: | श्री. सत्यराजरेग्मी | 231 |
| 36 | Contemporary Scenario of Sanskrit Education in Schools & its New Diamensions | Namrata Patel | 238 |
| 37 | शास्त्रपठनदोषाणां निवारणे कूटचित्राणामनु-प्रयोग: | अमृता कौर | 244 |


Scanned with OKEN Scanner

# शिक्षायां भूमण्डलीकरणस्य प्रभाव:

ऌडॉ. वि. एस्. वि. भास्कर रेड्डि

(भूमण्डलीकरणमद्यत्वे वस्तुस्थिति: । न किमपि क्षेत्रं तादृशं यदिच्छताऽनिच्छता वा स्पृष्टमनेन न स्यात् । शोधप्रस्तोता निजेन नीरक्षीरविवेकेनास्य गुणं दोषञ्चात्र निरूपयति । यद्यपि प्रस्तोतु: पक्षपात: क्वेति स्पष्टतया लेखे न दृश्यते, पाठका एव तदर्थं निर्णेतुमधिकृता:, तथापि लेखोत्तरभागे भूमण्डलीकरणस्य दोषप्रस्तावात् तत्रैव लेखकस्यापेक्षिकी सम्मतिरिति मे प्रतिभाति । अत्रेदं विभा-वनीयम् - भगवान् वेद: 'आ नो भद्रा: क्रतवो यन्तु विश्वत:' इति सार्वभौमिकं सार्वकालिकञ्च सिद्धान्तं न: पुरस्तात् प्रस्तौति । तथा च भूमण्डलीकरणस्य यत् किमपि भद्रं, तच्छिक्षाक्षेत्रमपि समायातु । परं यदनिष्टम्, तस्य परिहारो विधेय: । मन्ये, शोधप्रस्तोतु: इदमेव हार्दमिति ॥ - स.)

भूमण्डलीकरणस्य प्रभाव: शिक्षाक्षेत्रे कथं भवतीति अवबोधाय तेन सह सम्बद्धा: केचन सम्प्रत्यया: सामान्यतया ज्ञातव्या: भवन्ति । ते च यथा - 1. सरलीकरणम् / उदारीकरणम् (Liberalization) 2. निजीकरणम् (Privatization) 3. भूमण्डलीकरणम् (Globalization). अस्यैव सम्प्रत्ययस्य वाणिज्यक्षेत्रे शिक्षाक्षेत्रे च संज्ञिप्ततया LPG इति नाम्ना व्यवहारो भवति ।

## सरलीकरणम् / उदारीकरणम् ( Liberalization ) L of LPG

सरलीकरणं नाम राज्यसम्बद्धानां .सामाजिक-आर्थिक-वाणिज्य-शिक्षादिक्षेत्रेषु सर्वकारेण प्रक्तनसमये निर्धारितेषु नीति-नियम-निबन्धनादिषु शैथिल्यसम्पादनं भवति । सर्वकारीयनियमानां निबन्धानाम् अनुज्ञप्त्यादीनाञ्च (Licenses) विषये काठिन्यं दूरीकृत्य उत्पादन-वाणिज्य-शिक्षादि क्षेत्राणां क्रियाकलापेषु निजक्षेत्रस्य सर्वकारीयक्षेत्रेण सह समस्तर-प्रकल्पनम् अर्थव्यवस्थायाम् अर्थ-शास्त्रे च सरलीकरणामित्यभिधीयते । 1991 तमवर्षादारभ्य भारते आर्थिकसंस्करणनाम्ना आरब्धं राजनैतिक-आर्थिक- वाणिज्य-सेवादि क्षेत्रेषु जातं परिणामक्रममेव सरलीकरणमित्यभिधीयते। सरली-करणस्य मूलं (धातु:) GATT भवति । अस्यानुसारं 160 सेवा: विश्वव्याप्ततया प्रसाराय प्रवधानावसरा: प्रकल्पिता: । आर्थिक-वाणिज्य-व्यापार-आयात-निर्यात-शिक्षादि क्षेत्रेषु सर्वकारीय हस्तक्षेपस्य निष्कासनं, निजक्षेत्रस्य च प्रोत्साहश्च सरलीकरणेन एव जायते ।

## निजीकरणम् ( Privatization ) P of LPG

लोकसेवा-सर्वकारीयोपक्रम-वाणिज्य-वित्तकोशव्यवस्था-आयात-निर्यात-उत्पादन-निर्माण-परिव हनादि क्षेत्रेषु एतावता दृश्यमानस्य स्वामित्वस्य निजक्षेत्रेषु स्थानान्तरणाय अनुज्ञप्तिप्रदानमेव (Licenses) निजीकरणमित्यभिधीयते । निजीकरणेन विवधक्षेत्रेषु सर्वकारस्य स्वामित्वं नाममात्रतया आंशिकतया वा विलसति । निजक्षेत्राणां वर्चस्वं विराजते । Barbar Lee & John Nelli महोदययो:

मतानुसारं सर्वकारस्याधीनेषु विद्यमानक्षेत्रेषु अधिकारः / स्वामित्वम् / आधिपत्यं वा निज-व्यक्तिभ्यो (Private persons) निज-निकायेभ्यो (Private companies) वा प्रदानं / समर्पणं वा निजीकरणं भवति । निजीकरणेन आर्थिक-वाणिज्य-आयात-निर्यात-शैक्षिकादिक्षेत्रेषु सर्वकारस्य हस्तक्षेपः नैव दृश्यते । निजीकरणेन शिक्षायाः प्रसारः गुणवत्तात्मकतया जायते । परन्तु निजीकरणेन विद्यार्जनं न भवति, विद्यायाः क्रयणमेव भवति । अर्थात् सम्पन्नानामेव गुणवत्तया शैक्षिकावसराः समुपलभ्यन्ते, न तु निर्धनिनाम् ।

**भूमण्डलीकरणम् ( Globalization ) G of LPG**

भूमण्डलीकरणं नाम एका प्रक्रिया भवति, यत्र क्षेत्रीय आर्थिक-सामाजिक-सांस्कृतिक-शिक्षणादयः भूव्याप्तविनिमयजालेन एकतां प्राप्नुवन्ति । भूमण्डलीकरणं नाम वाणिज्येन विदेशी-प्रत्यक्षनिवेशेन द्रव्यप्रवाहेन जनप्रव्रजनेन प्रविधेः प्रसारेण च राष्ट्रीयार्थव्यवस्थायाः अन्ताराष्ट्रिय-अर्थव्यवस्थारुपेण परिवर्तनं भवति । अन्ताराष्ट्रियद्रव्यनिधेरनुसारं (IMF) भूमण्डलीकरणं नाम विविधदेशानां मध्ये प्रतिदिनं वर्धमाना परस्पराधारिता आर्थिकस्थितिः, विविधदेशानां सीमाम् अतिक्रम्य सरलतया जायमाना विवधप्रकारकैः वस्तुभिः सेवाभिश्च प्रक्रिया भवति । अनेन मानवसंसाधनानां प्रयासाः विचाराः ज्ञानं, सूचनादयः राष्ट्रियसीमाम् अतिक्रम्य स्वेच्छारूपेण प्रवहिताः भवन्ति । विविधदेशानां मध्ये सूचना-सम्प्रेषण-प्रविधि-वस्तु-सेवादीनामाधारेण पारस्परिक-क्रियाकलापाय अवसराः समुपलभ्यन्ते । परस्परसहयोगभावेन परस्परविकाससम्पादनं सरलतमं जायते । भूमण्डलीकरणेन बृहत् प्रपञ्चमिदं कुग्रामत्वेन परिवर्तनं प्राप्नोति ।

**भूमण्डलीकरणस्य लक्षणानि विशेषता वा -**

1. भूमण्डलीकरणम् एका विश्वव्यापिभावना । इयं सामाजिक-आर्थिक-सांस्कृतिकादिक्षेत्रैस्साकं शिक्षाक्षेत्रमपि प्रभावयति ।
2. भूमण्डलीकरणे परस्परसन्धानं सम्पर्कश्च अत्यन्त-महत्वपूर्णं भवति । येन सीमाऽतीता एकता सिद्ध्यति ।
3. भूमण्डलीकरणेन ज्ञान-विज्ञान-प्रविधि ...इत्यादयः सूचनाक्षेत्रे क्रान्तिकारिपरवर्तनानि भवन्ति।
4. भूमण्डलीकरणे सर्वेषु क्षेत्रेषु निवेश-प्रवाहः प्रपञ्चव्याप्ततया वर्धते ।
5. भूमण्डलीकरणेन वस्तूनां सेवानाञ्च वाणिज्येन साकं मानवसेवानाञ्च वाणिज्यं वर्धते ।
6. भूमण्डलीकरणेन अन्ताराष्ट्रियसंस्थाः विविधदेशेभ्य ऋणं प्रदातुं शक्नुवन्ति ।
7. जनाः एकस्मात् देशात् अपरदेशं प्रति प्रव्रजिताः भवन्ति । अनेन प्रतिभापलायनं बुद्धेः उपनिवेशश्च जायते ।
8. विविधदेशानां मध्ये वाणिज्य-आर्थिक-प्राविधिक-शिक्षादिक्षेत्रेषु परस्परसहयोगाय सहमति-पत्राणां संरचनाः क्रियन्ते ।

Scanned with OKEN Scanner

शिक्षायां भूमण्डलीकरणस्य प्रभावः -

भूमण्डलीकरणेन विविधदेशेषु उपविश्य छात्राः शिक्षकाश्च आभासीकरणस्य ई-अधिगमस्य माध्यमेन अध्यापनाय अध्ययनाय च लब्धावसराः भवितुमर्हन्ति । भूमण्डलीकरणेन विविधदेशेषु उपलभ्यमानानां शैक्षिक-स्रोतसाम् उपयोगः अस्माकं गृहे उपविश्यैव कर्तुं शक्यते । शिक्षायां भूमण्डलीकरणस्य प्रभावः बहुषु आयामेषु दृश्यते । तेषां विवरणम् अधः प्रस्तूयते यथा -

१. ज्ञानक्रान्तिः पाठ्यचर्या च -

- भूमण्डलीकरणेन प्रत्येकं क्षेत्रे ज्ञातव्याः विषयाः प्रतिदिनं वर्धन्ते । एवमेव शिक्षाक्षेत्रेऽपि नूतनतमाः आविष्काराः जायन्ते ।
- साम्प्रतिक-विषयवस्तुषु सर्वदा परिवर्तनानि समायान्ति । अतः पाठ्यचर्या सर्वदा नवीनतमैः विषयवस्तुभिः परिवर्त्य नूतनत्वं प्राप्नोति ।
- स्थानीय-क्षेत्रीय-राष्ट्रियभाषाणाम् अपचयः, विदेशिभाषाणाम् उपचयः जायते ।
- मानवीयशास्त्राणां प्राधान्ये ह्रासो जायते ।
- विज्ञान-प्राविधिक-सूचनाप्रविध्यादिशास्त्राणाम् अद्वितीय-प्राधान्यं प्रयच्छन्ति ।
- वाणिज्य-चिकित्सा-जीवप्राविधिक-जीवाण्वादीनां शास्त्राणाञ्च अद्वितीयप्राधान्यं प्रयच्छन्ति ।

२. संगणकयन्त्रस्यानुप्रयोगस्य वर्धनम्

संगणकक्षेत्रे प्रतिदिनं जायमानेन प्राविधिकक्रान्त्या शिक्षाक्षेत्रे शीघ्रतम - परिवर्तनानि समायान्ति । तेषां फलं वयम् अनुभवामः । यथा - 1. Multi media, 2. Computer simulation, 3. Digital library facility, 4.e-journals, e-books, 5. Computer network, 6. Satellite television, 7. E-mail & Internet 8. Video/Electronic conference, 9. Virtual learning.

३. दूरस्थशिक्षायाः व्यावसायिकाध्ययनक्रमस्य च प्राधान्यवर्धनम्

- परम्परागतशिक्षाव्यवस्था-दूरस्थशिक्षाव्यवस्थयोः अनुपातो महत्परिवर्तनमाप्नोति ।
- मुक्तविद्यालयानां मुक्तविश्वविद्यालयानां स्थापनं, साधारणविश्वविद्यालयेषु दूरस्थशिक्षा-विभागानाञ्च आरम्भः क्रियते ।
- इदानीं तु अध्ययनसामग्र्यादयः One way audio, One way video उपलभ्यन्ते, भविष्ये तु Two way audio/two way video material उपलभ्यन्ते, सम्पर्कवर्गाः आभासीय- वर्गाश्च आयोज्यन्ते ।
- शैक्षिककार्यक्रमाणाम् आयोजनाय दूरदर्शनानां शैक्षिकोपग्रहाणाञ्च प्रयोगाः क्रियन्ते ।

Scanned with OKEN Scanner

४. अन्ताराष्ट्रियशिक्षासंस्थाभ्यो वित्तानुदानप्राप्ति:

प्राथमिकशिक्षाया: वैश्वीकरणार्थं England सर्वकारस्य, UNESCO, UNICEF, World bank इत्यादीनां वित्तानुदानेन DPAP, सर्वशिक्षा अभियान योजनायाश्च क्रियान्वयनं क्रियते ।

५. शिक्षकस्य स्थाने परिवर्तनम्

गुरुमुखत: शिक्षा इति, अधिगमाय गुरुरेव स्रोत इति सम्प्रत्ययश्च नश्यति । यत: भूमण्डलीकरणेन अधिगमाय बहूनि संसाधनानि उपलभ्यन्ते । स्वीयरुचे: आवश्याकतायाश्च अनुसारं स्वाध्ययनाय समुचिता: अवसरा: समुपलभ्यन्ते । गुरु-शिष्यसम्बन्धा: प्राविधिक-सम्बन्धत्वेन परिणमन्ति ।

१. नूतनाध्ययनक्रमस्य आरम्भ:

विविधपाठ्यक्रमाणां सङ्करेण नूतन-पाठ्यक्रमाणां जन्म जायते । यथा - Economics, Mathematics, Statistics - विषयाणां सङ्करेण Econometrics इति नूतनपाठ्यक्रम: ।· Bio-techonology, Micro-biology विषयाणां सङ्करेण Bio-chemistry इति नूतनमपाठ्यक्रम: । Geography, Politics - विषयाणां सङ्करेण Geo-politics इति नूतनपाठ्यक्रम:।

२. शिक्षाप्रशासने परिवर्तनम्

- संगणकयन्त्रस्य अन्तर्जालस्य सूचनाप्रविधेश्च क्रान्त्या दैनन्दिनशिक्षाप्राशासनिकव्यवहारेषु सौविध्यप्रकल्पनम् ।
- अन्तर्जालीयसौविध्येन शिक्षाप्राशासनिकव्यवहारेषु अध्ययनक्रम-प्रवेश-परीक्षापरिणाम-छात्रवृत्ति-आवासीयसौविध्यादीनां सूचनावबोधे सर्वेषां भौगोलिकातीतसौविध्यं जनयति ।
- शिक्षासंस्थानां प्राशासनिकस्वामित्वाधिकार: निजव्यक्तिभ्यो निजसंस्थाभ्यो वा प्रदीयते ।

३. विदेशी-शिक्षासंस्थानां स्थापनम्

भारते प्राथमिक-माध्यमिक-उच्चशिक्षायाश्च प्रसाराय विविधदेशेषु अवस्थापितानां विदेशि-शिक्षासंस्थानां संस्थापनम् । भारते विदेशिविश्वविद्यालयाश्च संस्थाप्यन्ते ।

४. सांस्कृतिकविकास:

भूमण्डलीकरणेन अन्येषाम् इतिहास:, संस्कृतय: जीवनरीतय: भाषाश्च ज्ञेया: भवन्ति । येन शान्तियुतस्य सहजीवनस्य बन्धुतायाश्च विकासो जायते । फलत: जनानां मध्ये एकताभावस्य अन्ताराष्ट्रियावबोधस्य वसुधैव कुटुम्बकभावस्य च विकासो जायते ।

# विद्यापीठे प्रतिष्ठिताः विभागाः

- व्याकरणविभागः
- साहित्यविभागः
- ज्यौतिषविभागः
- शिक्षाशास्त्रविभागः
- आधुनिकविभागः
- शोधप्रकाशनविभागः
- मुक्तस्वाध्यायपीठम्
- अनौपचारिकसंस्कृतशिक्षणकेन्द्रम्
- वास्तुज्यौतिषपरिचयपाठ्यक्रमः

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं,
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम् ।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्,
सोमैयाभुवि भासते परिसरो मुम्बापुरे संस्थितः ।।

## राष्ट्रियसंस्कृतसंस्थानम्

( मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम् )

(मानितविश्वविद्यालयः)

## क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 77

Scanned with OKEN Scanner

UGC Approved Journal No. 40920

ISSN 2277-6443

सप्तमोऽङ्कः, 2018-19



विश्वविद्यालयानुदानायोगद्वारा स्वीकृतशोधपत्रिकासूच्यन्तर्गता

# विद्यारश्मिः

समीक्षिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका

A Peer Reviewed Refereed Annual National Research Journal

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः,
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥

**प्रधानसम्पादकः**

प्रो. सुदेशकुमारशर्म्मा

**सम्पादकः, संयोजकश्च**

प्रो. बोधकुमारझाः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 77

Scanned with OKEN Scanner

UGC Approved Journal No. 40820

ISSN 2277-[illegible]

प्रकाशोऽङ्कः : 2018-19



विश्वविद्यालयानुदानआयोगेनद्वारा स्वीकृतशोधपत्रिकासूच्यन्तर्गता

# विद्यारश्मिः

सर्वाङ्गिणा मूल्याङ्कता च वार्षिकी राष्ट्रियशोधपत्रिका

A Peer Reviewed Refereed Annual National Research Journal

[illegible]

[illegible] ।

[illegible]

[illegible] ॥

**प्रधानसम्पादकः**

प्रो. सुरेशकुमारशर्म्मा

**सम्पादकः, संयोजकश्च**

प्रो. बोधकुमारझाः

## राष्ट्रियसंस्कृतसंस्थानम्

([illegible])

क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहार, मुम्बई - 77

UGC Approved Journal No. [illegible]
ISSN [illegible]
पत्रिका नाम  [illegible], पुनरावृत्तिका च वार्षिकी राष्ट्रियशोधपत्रिका)
(A Peer Reviewed Refereed Annual National Research Journal)
प्रकाशक:  प्राचार्य:, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:)
क. जे. सोमैयासंस्कृतविद्यापीठम्,
विद्याविहार: (पूर्व:) मुम्बई- 400077
© प्रकाशकाधीन:
प्रकाशनावधि: 2018-19
संरक्षक:  प्रो. परमेश्वरनारायणशास्त्री कुलपति:,
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली
प्रधानसम्पादक:  प्रो. सुरेशकुमारशर्म्मा, प्राचार्य:
सम्पादकमण्डलम्  प्रो. भारतभूषणमिश्र:
प्रो. बोधकुमारझा:, संयोजक:
डॉ. देवदत्तसरोदे
डॉ. स्वर्णकुमारमिश्र:
डॉ. (श्रीमती) गीता दुबे
डॉ. जितेन्द्रकुमाररायगुरु:

समीक्षासमिति:
प्रो. अर्कनाथचौधरी, कुलपतिचर:,
प्राचार्य:, रा.सं.सं. जयपुरम्, (राज.)
प्रो. ई. एम्. राजन्, आचार्य:,
रा.सं.सं. त्रिशूर, (केरलम्)
प्रो. दिलीपकुमारझा:, आचार्य:,
संस्कृतविश्वविद्यालय:,दरभंगा (बि.)

मूल्याङ्कनसमिति:
प्रो. सुरेश्वरझा:, आचार्य:,
संस्कृतविश्वविद्यालय:, दरभंगा (बि.)
प्रो. देवेन्द्रनाथपाण्डेय:, आचार्य:,
सोमनाथसंस्कृतविश्वविद्यालय:, गुजरातम्।
डॉ. राजधरमिश्र:, आचार्य:,
जगद्गुरुराष्ट्रियसंस्कृतविश्वविद्यालय:,
राजस्थानम्

अङ्क:  सप्तम:
अनुवृत्त्य:  200
आकार:  B5 (7.17" x 10.12")
मुद्रक:  वन्दना आर्टस्, बी-56, स्टेशन प्लाझा, स्टेशन रोड,
भाण्डुप (पश्चिम), मुम्बई - 400 078, महाराष्ट्र ।

Scanned with OKEN Scanner

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम्)
क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः,
मुम्बई - 400 077

Rashtriya Sanskrit Sansthanam
(Deemed University)
(Under MHRD, Govt. of India)
K.J. Somaiya SanskritVidyapeetham
Vidyavihar, Mumbai-400077



# चरन्वै मधु विन्दति

सन्ततं सरणाद् वारिधाराविशेषः सरिता कथ्यते । गमनात्, सङ्गमाच्च सा गङ्गेति विभाव्यते। सङ्गमश्च सरित्पतिना सार्द्धम् नान्येन केनचिदिति स्थितिः । समेषामस्तित्वम्, अभ्युदयो वा, तत्र क्रियैव कारणत्वं वहते । क्रियाजनकत्वादेव कारकत्वमिति शाब्दिकानां तस्मादेव समयः । विद्या न प्रष्टव्या, तस्याः सिद्धिः प्रष्टव्येति नः काचन परम्परा । किञ्चिन्महाकोषागारं मत्समीपे स्थितम्, परं तद् अर्गलितं, कीलितञ्च । कश्च तस्माज् जिघृक्षितुर्लाभः? अधीतिबोधाऽऽचरणप्रचारणेभ्यः आगमस्वाध्यायप्रवचनव्यवहारेभ्यो वा विद्या भवति वेद्या । उपयोगस्यास्याः उत्तरार्द्धं वितरीतुमेवास्ति । तस्मादधीते विषये श्रान्तेरनुव्यवसायं विनैव विज्ञैः शोधः कर्त्तव्यः । शोधाच्च सिद्धान्तावाप्तिः कार्य्या । अन्यथा शास्त्रमस्मभ्यं रुष्टं स्यात् । जगति रुष्टे शास्त्रं त्रायते । रुष्टे च शास्त्रे को वा त्राता जायेत ।

तत्रास्माकं धीगङ्गा गम्यात्, सा च धीपतिना सिद्धान्तेन सङ्गंसीष्ट - इति 'विद्यारश्मि'रयं सन्दिशति, निर्दिदशति 'चरतो वै मधुलाभ' इति । समुद्दिशति च विद्या ज्ञानाय, दानाय, रक्षणाय भवतीति ।

॥ भूयाज्जगन्मङ्गलम् ॥

(प्रो. सुदेशकुमारशर्म्मा)
प्राचार्य्यः, प्रधानसम्पादकश्च



# सम्पादकीयम्

भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य मानित-विश्वविद्यालयस्य मुम्बईस्थितस्य क. जे. सोमैया संस्कृतविद्यापीठस्य शोधप्रकाशनविभागेन प्रतिवर्षं संस्कृतविद्यान्तर्गतस्य ज्ञानस्य विज्ञानस्य प्रज्ञानस्य च लोकसुलभत्वसम्पादनाय समग्र-भारतवर्षस्योत्तरतो दक्षिणं यावत्प्रखरलेखनीमण्डितानां तत्तच्छास्त्रपण्डितानां शोधपराणां युव-विदुषाञ्च शोधपत्राण्यामन्त्र्य समीक्ष्य मूल्येनाकलय्य सम्पादकीयेन च विभूष्य 'विद्यारश्मिः' इति ख्यातनाम्नी समीक्षिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका, या विश्वविद्यालयानुदानायोगस्य स्वीकृतशोधपत्रिकासूचीघटकीभूताऽप्यस्ति, सा आई.एस्.एस्.एन्. संख्यायुक्ताऽऽविर्भाव्यते । तस्यासौ सप्तमोऽङ्को भवतां करकमलयोरधुना विलसति, लसति च प्रयासोऽनेन संयोगेन ।

सप्तमेऽस्मिन् सुन्दरकुसुमे वेद-वेदाङ्ग-काव्या-धुनिकशिक्षा-भाषाविज्ञान-मीमांसा-राजविद्या-योगायुर्वेदादिवाङ्मयमन्थनोत्थशोधपत्राणि नैजं सौरभमातन्वन्ति । विद्यापीठीयः शोधप्रकाशनविभागः स्पष्टं मनुते 'विद्या भाषामर्य्यादामतिशेते' इति । तस्मादत्र पत्रिकायां संस्कृतहिन्द्याङ्ग्लेति तिसृषु भाषाधारासु विदुषां वैदुष्यामृतं प्रवहति, समावहति च विविधविधान् पाठकविबुधान् पातुमेतत् ।

संरक्षकेभ्यः संस्थानस्य कुलपतिभ्यः आचार्य्यपरमेश्वरनारायणशास्त्रिभ्यः, प्रधान-सम्पादकेभ्यः प्राचार्य्येभ्यः आचार्य्यसुदेशकुमारशर्म्मभ्यः, समीक्षा-मूल्याङ्कन-सम्पादन-समितिसदस्येभ्यः सर्वेभ्यः कृपालुविद्वद्भ्यः, आचार्य्यकमलाकान्तत्रिपाठि, आचार्य्यप्रकाशचन्द्र, आचार्य्य ई. एम्. राजन्प्रभृतिभ्यः प्रदत्तशोधपत्रेभ्यः सरस्वतीप्रियेभ्यो मनीषिभ्यश्च विद्यापीठपक्षतो भूयोभूयो धन्यतावचो विस्तार्य्यतेऽस्मिन्नवसरे ।

(प्रो.बोधकुमारझाः)
सम्पादकः, संयोजकश्च

Scanned with OKEN Scanner

Nk

# शोधपत्रानुक्रमणिका


| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | लिप्यानीतिः सुखावहा | प्रो. कमलाकान्तत्रिपाठी | 01 |
| 2. | वाक्यार्थविमर्शः | प्रो. प्रकाशचन्द्रः | 07 |
| 3. | नैषधे पञ्चनलीसर्गस्य वैशिष्ट्यम् | प्रो. ई. एम्. राजन् | 18 |
| 4. | Curiosity : A Source of Research | Prof. D. N. Pandey | 23 |
| 5. | 'कर्तुरीप्सिततम' सूत्रशास्त्रार्थः | प्रो. बोधकुमारझाः | 35 |
| 6. | रसानां सुखदुःखात्मकत्वं | प्रो. अर्चना दुबे | 48 |
| 7. | वर्णान्तरत्व के सिद्धान्त | आचार्य उदयन मीमांसक | 52 |
| 8. | संस्कृतशास्त्रशिक्षणे अन्वयविधेरनुप्रयोगः | डॉ. रा. गा. मुरलीकृष्णः | 64 |
| 9. | शास्त्रतत्त्वसुखबोधाय तन्त्रयुक्तयः | डॉ. देवदत्तसरोदे | 74 |
| 10. | भाषोत्पत्तिसिद्धान्ताः संस्कृतञ्च | डॉ. कुलदीपशर्मा | 84 |
| 11. | शिक्षायां भूमण्डलीकरणस्य प्रभावः | डॉ. वी. एस्. वी. भास्कररेड्डी | 91 |
| 12. | नारायणीयकाव्ये लक्ष्ये वस्त्वलङ्कार-रसानुमितिलक्षणानि | डॉ. नारायणन् ई. आर्. | 97 |
| 13. | व्याकरणदिशा पुरुषार्थविमर्शः | डॉ. दयारामदासः | 105 |
| 14. | शब्दनित्यत्ववादः | डॉ. मधुकेश्वरभट्टः | 112 |
| 15. | भासनाटकेषु स्त्रीपात्राणि समायोजनस्य उत्कृष्टोद्धरणानि | डॉ. लीना सक्करवालः | 115 |
| 16. | शब्दार्थसम्बन्धविमर्शः | डॉ. सुभाषचन्द्रमीणा | 122 |
| 17. | कार्यशब्दवादे इदम् | डॉ. सुधाकरमिश्रः | 127 |
| 18. | अलङ्काराणामलङ्कारत्वम् | डॉ. स्वर्गकुमारमिश्रः | 133 |
| 19. | संयुक्त राष्ट्रसंघ में हिन्दी की स्थिति का मूल्यांकन | डॉ. गीता दुबे | 138 |
| 20. | Colonial Alienation in Ngugiwa Thiong 'O's Decolonising the Mind | Dr. Shweta Sood | 143 |


Scanned with OKEN Scanner

# नामार्थविमर्शः

प्रो. प्रकाशचन्द्रः

(नाम इत्युक्ते शब्दशास्त्रे स्वादिप्रत्यययोग्योऽर्थवान् शब्दो बुध्यते । यास्केन प्रदर्शितानां पदजातानां विभागोऽन्यतमोऽयं शब्दः । एतस्य जातिव्यक्तिलिङ्गसंख्याकारकात्मकाः पञ्च वाच्यार्थाः प्रसिद्धाः । विशिष्य व्याकरणे शब्दोऽपि नामार्थत्वेनाभिमतः । सत्यम् । 'रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः' इत्यादौ सर्वेषां तथा बोधात् । परमत्र विशेषतोऽवधेयम् - अनुकरणानुकार्ययोर्भेदपक्षे शब्दस्य नामार्थत्वं मन्तव्यम् । लेखेऽस्मिन् सन्दर्भपुरस्सरं षोढा नामार्थः प्रत्यपादि । प्राचीनार्वाचीनप्रामाणिकग्रन्थानां प्रामाण्यमत्र पुरस्कृत्य महाभाष्यसन्दर्भञ्चाश्रित्य विद्वांल्लेखको नामार्थविषयकं शाब्दिकसिद्धान्तं निपुणं प्रस्तौति ॥ - स.)

लोके वेदे च सर्वत्र शब्दस्य माहात्म्यं विद्यते । शब्दः नित्यो ब्रह्मस्वरूपश्चास्तीति व्याकरणशास्त्रसिद्धप्रसिद्धसिद्धान्तो वरीवर्ति । शब्दज्ञानस्य व्यवहारस्य प्रत्यवमर्शस्य च आधारभूता 'वाग्' भवति, यदि सा अपगच्छेत् तदा ज्ञानं न प्रकाशेत प्रकाशकं विना, सा वागेव शब्दार्थप्रकाशिका व्यवहारसिद्धौ समर्था शाश्वती सत्तात्मिका चास्ति । यथोक्तं वाक्यपदीये भर्तृहरिणा -

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ।[1]

स च नित्यशब्दो लोके वेदे च नामाख्यातोपसर्गनिपातेष्विति । चतुर्षु स्वरूपेषु प्रयुक्तो दृश्यते ।

निरुक्तकारेण महाभाष्यकारेण चैतेषां प्रामाणिकं विवेचनं प्रस्तुतम् । निरुक्तस्य प्रारम्भ एवैतेषां स्वरूपमुक्तं दृश्यते 'तद्यान्येतानि चत्वारि पदजातानि नामाख्यातं चोपसर्गनिपाताश्च'[2] । यास्काचार्येणैतेषां चतुर्णां वेदमन्त्रैः सह नित्यसम्बन्धोऽपि प्रतिपादितः । यथा कथयति ग्रन्थकारः

तेषां मनुष्यवद्देवताभिधानम् । पुरुषविद्याऽनित्यत्वात्कर्मसम्पत्तिर्मन्त्रो वेदे ।[3]

एतन्निरुक्तवचनं साशयं स्पष्टयन् टीकाकारो लिखति । 'मनुष्याणामशिक्षितत्वाद्विस्मरणशीलत्वाद्वा अयथावत्प्रयुक्ताः यथास्थितमर्थं नाभिदध्युः ।' ततश्च सर्वार्थप्रत्यक्षदृशो देवाः स्वल्पमप्ययथावदभिधानममर्षन्तः कर्मणि न समीयुः । ततश्च देवताविहीनं कर्मफलं संपद्येत । न केवलं फलासंपत्तिरेवाऽपितु दुरिष्टहेतुको दोषोऽपि स्यात् । तथाचोक्तम् 'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्' । 'तस्मादेत एव नामाख्यातोपसर्गनिपाताः प्रयोगानुगतपरिपाटीविनियमार्थं मन्त्रत्वेन वेदे समाम्नाताः । नहि नामाख्यातोपसर्गनिपातान्परित्यज्य मन्त्राः सन्ति । तदेव हि चतुर्विधं पदजातं प्रयोगानुगतपरिपाट्या कयाचिदवस्थितं मन्त्रा इत्युच्यन्त इति ।'[4] अनेन निरुक्तप्रामाणिकचिन्तनेन एतेषां नामादीनां वेदमन्त्रैः

सह नित्योऽभेदसम्बन्धश्च सिद्धो भवति । महाभाष्यकारेणापि पस्पशाह्निके एतेषां सत्ता प्रामाणिकता च चत्वारि शृङ्गा......, चत्वारिवाक्परिमिता पदानि .........[5] इत्यादिमन्त्रद्वयेन स्वीकृता।

न केवलं वेददृष्ट्या अपितु लोकदृष्ट्यापि एतेषां माहात्म्यं विद्यते । लोके एतेषां प्रयोगज्ञानं विना सम्यग् वाक्यार्थज्ञानं न भवितुमर्हति । सम्पूर्णे वाङ्मये एषां नित्यसत्ता दरीदृश्यते । प्रस्तुत-प्रकरणेऽत्र नामार्थविषयो विचार्यते ।

**नामशब्दलक्षणम्**

निरुक्ते यास्काचार्यो नामशब्दस्य तात्त्विकं लक्षणं प्रस्तौति । **'सत्त्वप्रधानानि नामानि'**[6] अर्थाद् येषु शब्देषु सत्त्वस्यार्थाद् द्रव्यस्य प्राधान्यं भवति । तानि स्त्रीपुंनपुंसकलिङ्गाद्यन्वितानि नामानि नामपदवाच्यानि भवन्ति । निरुक्तकारविहितनामलक्षणं स्पष्टयन् टीकाकारो लिखति । 'सीदति गच्छति (अन्वेति) लिङ्गंसंख्यादिकमस्मिन्निति सत्त्वं (द्रव्यम्) षद्लृविशरणगत्यवसादनेष्वित्य-स्मादधिकरणे औणादिक स्त्वन्प्रत्ययः ।' तद्येषु प्रधानं (सत्त्वम्) गुणभूता च क्रिया तानीमानि सत्त्वप्रधानानि । कानि पुनस्तानि? नामानि । नमन्त्याख्यातशब्दे गुणभावेनेति नम(य)न्ति वा स्वमर्थ-माख्यातशब्दवाच्ये गुणभावेनेति नामानि । णम् प्रह्वत्वे (शब्दे च) इत्यस्य शुद्धस्यान्तर्भावितण्यर्थस्य वा नामन्सीमन्नि'त्यादिनौणादिको निपातः । यथैव ह्याख्याते विद्यमानमपि द्रव्यमविवक्षितमेवमिहापि क्रिया अविवक्षिता, द्रव्यपरत्वात्सत्त्वशब्दस्य तद्विक्रियाजनितमुत्तरकालं क्रियाशेषभूतमभिधाय धात्वर्थो-ऽसौ व्यावर्तते । स्त्रीपुंनपुंसक भेदं, निपातोपसर्गाणामपि क्वचिन्नामत्वमपेक्ष्य बहुवचननिर्देशो नामानि एक इत्याहुः ।[7]

सत्त्वप्रधानानि नामानि इति स्वरूपलक्षणप्रसङ्गे निरुक्तकारः नामशब्दस्य सामान्यविशेषरूपे निर्दिशन् निगदति ।

'**अद इति सत्त्वानामुपदेशः**'[8] टीकाकारः दुर्गाचार्यो यास्कसिद्धान्तं विमृशन् कथयति सामान्यत इति शेषः । सामान्यतः सामान्यरूपेण सत्त्वानां द्रव्याणामुपदेशोऽद इति । उपलक्षणमेतद-न्येषामपि लिङ्गसामान्यवचनानामिति ।[9] सामान्यतः सत्त्वयुक्तानि द्रव्याणि नामपदवाच्यानि भवन्ति । अस्ति किञ्चिद्द्रव्यमिति अज्ञातसंज्ञमपि वस्तुमात्रावगाहि सामान्यतः सत्त्वसामान्याद् नामपदवाच्यं भवतीत्यभिप्रायः ।

नाम्नो विशेषस्वरूपं विवृण्वन् निर्दिशति यास्काचार्यः '**गौरश्वः पुरुषो हस्तीति ।**'[10] अत्र सत्त्वानामिति पूर्वस्मात्खण्डसूत्रान्तवाक्यादनुवर्तते । विशेषोपदेश इति शेषः । सोपाधिकनिरुपाधिकोप-प्रदर्शनार्थमनेकोदाहरणम् । इति शब्दः आद्यर्थः ।[11] इति दुर्गाचार्यः । यथा गौरित्यत्र द्रव्यत्वसामान्य-ज्ञानदृष्ट्या निरुपाधिकद्रव्यत्वं ज्ञायते, सास्नादिमत्त्वप्राण्यर्थविशेषार्थदृष्ट्या गोत्वमिति सोपाधिकद्रव्य-त्वमपि ज्ञायत इति नाम्नः निरुपाधिकसोपाधिकरूपं सर्वेषु सत्त्वप्रधानपदार्थेषु चेतनाचेतनबोधकशब्देषु ज्ञातुं शक्यत इति भावः । महाभाष्यकारेणापि '**द्रव्यप्रधानं नाम**'[12] इति नामलक्षणमङ्गीकृतम् । नाम द्रव्यप्रधानं कथं भवतीति प्रश्ने नामाख्यातयोः तात्त्विकस्वरूपभेदं प्रश्नोत्तरमाध्यमेन निर्दिशति । '**कथं पुनर्ज्ञायते क्रियाप्रधानाख्यातं भवति, द्रव्यप्रधानं नामेति? यत्क्रिया पृष्टस्तिङाचष्टे**

[illegible] इति [illegible]

[illegible]

[illegible] इति [illegible]

[illegible] ।

[illegible] ॥

[illegible] इति [illegible]

[illegible] इति [illegible]

[illegible] ।

[illegible] ॥

नामार्थविवेचनम्

[illegible] - एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।

नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥

अत्र [illegible] इति [illegible]

[illegible] इति [illegible]

शक्त्युपगमे व्यक्त्यन्तरे प्रयोगप्रसङ्गात् । सामान्यलक्षणप्रत्यासत्त्यनुपगमात् तद्ग्रहणासम्भवाच्च नियत-प्रयोगात् ।[22] आनन्त्यव्यभिचारदोषाभ्यां शक्तिं स्वीकृत्य व्यक्तौ लक्षणया बोधः स्वीक्रियते इति मीमांसकानां मतं विद्यते । मीमांसादर्शनस्य प्रथमाध्यायस्य तृतीयपादे 'आकृत्यधिकरणे' विषयोऽयं विस्तरेण विचारितोऽस्ति । शबरस्वामिना तत्र भाष्ये आकृतिव्यक्त्योरुभयोरपि पक्षयोर्विचार्य विस्तृत आकृतिवादपक्षः सिद्धान्तरूपेण संस्थापितः । अस्याधिकरणस्य प्रमुखं सूत्रं वर्तते - 'आकृतिस्तु क्रियार्थत्वात्' ।[23] अर्थात् क्रियार्थमाकृतिः पदार्थो विद्यते । सूत्रं व्याख्यान् भाष्यकारो लिखति 'तु शब्दः पक्षं व्यावर्तयति । आकृतिः शब्दार्थः ।' कुतः? क्रियार्थत्वात् । 'श्येनचितं चिन्वीत' इति वचनमाकृतौ सम्भवति, यथाकृत्यर्थः श्येनाकारः । व्यक्तिवचने तु न कथञ्चन श्येनव्यक्तिरुपधातुं शक्यते । इत्यशक्यार्थवचनादनर्थकः । तस्माद् आकृतिवचनः ।[24]

कुमारिलभट्टोऽपि श्लोकवार्तिके आकृतिं जातिपर्यायत्वेन स्वीकृत्य जातिमेव पदार्थत्वेन निरूपितवान् -

'जातिमेवाकृतिं प्राहुर्व्यक्तिराक्रियते यया ।
सामान्यरूपसावयवाच्चेज्जातिः साम्नाभिरिष्यते ।'[25]

तदेवं मीमांसका जातिवादिनः जातिशक्तिसमर्थकाः सन्तीति मीमांसाग्रन्थपर्यालोचनेन ज्ञातुं शक्यते ।

एवं द्विकमित्यादिकारिकायामेकमिति कथनेन केवलव्यक्तिपक्षोऽपि स्वीक्रियते यथा भूषणसारे कौण्डभट्टो निगदति । 'यद्वा केवलव्यक्तिरेव एकशब्दार्थः, केवलव्यक्तिपक्षं समाश्रित्यापि, एकशेषस्य चारूयेण तस्यापि शास्त्रसिद्धत्वात् ।'[26] अर्थात् केवलव्यक्तिपक्षोऽपि शास्त्रसम्मतोऽस्ति 'अणुदित्सवर्णस्य चाप्रत्ययः' इति सूत्रेऽणग्रहणेन 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेणैक-शेषोपदेशेन च केवलव्यक्तिपक्षोऽपि शास्त्रनिर्दिष्टपक्षो विद्यत इति भावः ।

व्यक्तिपक्षे युक्तिं प्रदर्शयन् गौरवञ्च निराकुर्वन् भूषणकारः कथयति 'गुरुत्वेनेद् व्यवहारेण व्यक्तावेव तद्ग्रहणात् । सम्बन्धितावच्छेदकस्य (सम्बन्धितावच्छेदिकायाः) जातिव्याप्यव्यक्तित्वेनैव न गौरवमपि ।'[27]

तदेवमेकमित्यनेन केवलजातिपक्षः केवलव्यक्तिपक्षो वा गृह्यते । किन्तु केवलैकेन पक्षेण इष्ट नामार्थबोधो न सम्भवति, मीमांसका अपि द्रव्यत्वबोधाय लक्षणां स्वीकुर्वन्ति । अतः नागेश-भट्टेन मीमांसकानां केवलजातिपक्षः सयुक्तिभिः प्रमाणैश्च सम्यगालोचितः । यथा केवलजाति-पक्षस्वीकारे 'गोत्वमस्तीत्यर्थेऽन्वयानुपपत्त्यभावेन गौरस्तीति प्रयोगे व्यक्तिभानापत्तिः स्यात् । शक्ति-ग्राहकशिरोमणिर्व्यवहारो व्यक्तावेव शक्तिं ग्राहयति गवादिपदेन लोके व्यक्तेरेव बोधादित्याद्यभिप्रायेण नागेशभट्टः मीमांसकानां केवलजातिपक्षं निराकृतवान् ।[28]

वैयाकरणा न केवलाकृतिपदार्थं न केवलद्रव्यपदार्थं स्वीकुर्वन्ति, तेषां मते उभयोः पदार्थता शास्त्रसम्मताऽस्ति, आकृतिविशिष्टं द्रव्यम्, द्रव्यविशिष्टा चाकृतिः पदार्थो भवति । अस्मिन् विषये कौण्डभट्टेन नागेशभट्टेन च 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रभाष्यं प्रमाणत्वेनोदधृतम् -

'वस्तुतस्तु न ह्याकृतिपदार्थस्य द्रव्यं न पदार्थः इति भाष्याद्विशिष्टं वाच्यम् ।'[29] नागेशभट्टोऽपि कथयति 'वस्तुतस्तु न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः' इति सरूपसूत्रभाष्याद्विविशिष्टमेव वाच्यम्, तथैवानुभवात् । अनुभवसिद्धस्यापलापानर्हत्वाच्च ।[30]

'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रभाष्ये भाष्यकारविहितविवेचनं द्रष्टुं शक्यते 'न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थो द्रव्यपदार्थकस्य चाकृतिर्न पदार्थः, उभयोरुभयं पदार्थः, कस्यचित्तु किञ्चित् प्रधानभूतं किञ्चिद्गुणभूतम् । आकृतिपदार्थकस्याकृतिः प्रधानभूता द्रव्यं गुणभूतम् । द्रव्यपदार्थकस्य द्रव्यं प्रधानभूतमाकृतिर्गुणभूता ।'[31] अनेन भाष्यनिर्दिष्टसिद्धान्तेन उभयोः पदार्थत्वं स्वीकृतं विद्यते । सूत्रवार्त्तिकभाष्यकाराः त्रयोऽपि मुनयः उभयपक्षसमर्थकाः सन्तीति भाष्यादिपर्यालोचनेन स्पष्टतया ज्ञातुं शक्यते ।

भाष्यकारः पस्पशाह्निके पाणिनिमतोल्लेखपूर्वकं कथयति 'किं पुनराकृतिः पदार्थः, आहोस्विद् द्रव्यम्? उभयमित्याह । उभयथा ह्याचार्येण सूत्राणि पठितानि । आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामित्युच्यते । द्रव्यं पदार्थं मत्वा सरूपाणाम्........ इत्येकशेष आरभ्यते ।'[32] अनेन भाष्यप्रमाणेन सूत्रकारपाणिनेर्मतमुभयपक्षानुसारि विद्यत इति ज्ञातं भवति । वार्त्तिककारोऽपि उभयपक्षसमर्थकोऽस्तीति भाष्यवार्त्तिकपरिशीलनेन ज्ञातुं शक्यते । यथा जात्याख्यायामिति सूत्रे एकेन वार्त्तिकेन जातिद्रव्ययोरभेदत्वेन निरूपणं क्रियते वार्त्तिककारेण –

**जातिशब्देन हि द्रव्याभिधानम्**[33] अस्य वार्तिकस्य तात्त्विकं विवेचनं प्रस्तुवन् भाष्यकारो जातिद्रव्ययोरैक्यभावं लौकिकोदाहरणपुरस्सरं दर्शयति – 'जातिशब्देन हि द्रव्यमप्यभिधीयते, जातिरपि। कथं पुनर्ज्ञायते जातिशब्देन द्रव्यमप्यभिधीयत इति? एवं हि कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति अस्त्यत्र काञ्चिद् गां पश्यसीति स पश्यति 'पश्यति चायं गाः' पृच्छति च काञ्चिदत्र गां पश्यसीति । नूनमस्य द्रव्यं विवक्षितम् ।'[34]

भाष्यकारोऽपि पस्पशाह्निके 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकस्य उभयपक्षदृष्ट्या विग्रहं स्वीकृत्य उभावपि पदार्थौ नित्यौ इति मत्वा विमृशति ।

'अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते – सिद्धे शब्देऽर्थे सम्बन्धे चेति । आकृतिमित्याह । कुत एतत् । आकृतिर्हि नित्या द्रव्यमनित्यम् । .......... अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः – सिद्धे शब्दे अर्थे सम्बन्धे चेति । द्रव्यं हि नित्यमाकृतिरनित्या । ......... अथवा किं न एतेन इदं नित्यमिदमनित्यमिति । यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते – सिद्धे शब्देऽर्थे सम्बन्धे चेति ।'[35] अस्मिन् प्रसङ्गे तत्रैवाकृतिद्रव्ययोः भाष्यकारेण तात्त्विकं विवेचनं लौकिकदृष्टान्तप्रदानपुरस्सरं प्रस्तुतं येन भाष्यकारमतेऽपि उभयोर्नित्यत्वं पदार्थत्वञ्च स्वीकृतं दृश्यते ।

भर्तृहरिरपि त्रिमुनिस्वीकृतसिद्धान्तमनुसृत्य वाक्यपदीये पक्षद्वयमपि यथाशास्त्रं निरूपितवान् । यथा वाक्यपदीयस्य तृतीयकाण्डे भर्तृहरिणा जातिसमुद्देशद्रव्यसमुद्देशयोः शास्त्रीयं विवेचनं प्रस्तूय उभयोरपि नित्यता स्वीकृता । अस्मिन् सन्दर्भे जातिसमुद्देशस्य द्वितीया कारिका प्रमाणत्वेन द्रष्टुं शक्यते –



Scanned with OKEN Scanner

> पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव वा ।
> पदार्थौ सर्वशब्दानां नित्यावेवोपवर्णितौ ॥[36]

कारिकाव्याख्याने हेलाराजः कथयति । 'सर्वेषामपि शब्दानां नामाख्यातादिस्वभावानां जातिवादिमते जातिरेवार्थो न द्रव्यम् । द्रव्यवादिमते तु द्रव्यमेव न जातिः । द्वितीयेन वा शब्देन पदार्थान्तरं सूचितं जातिविशिष्टद्रव्याभिधानमिति । अत एव तदेव संकलनारूपं पदार्थाविति स्फुटीकृतम् ।'[37] तत्रैवाग्रे विषयं स्पष्टयन् कथयति 'यद्वा प्राधान्येनैव भिन्नविषयतया पाणिनिदर्शने जातिद्रव्ये शब्देनाभिधीयेते इत्ययमत्र पक्षः 'पदार्थौ' इत्युक्तः । तत्र नामपदस्य गौरित्यादेः गोत्वादिजातिः । नित्यक्रियाविषयसाधनैकार्थसमवेतसंख्या (ख्यया) जातिविशेषभावमापन्ना अभिधेया, अनाश्रयाया जातेरनुपपत्तेः । सामर्थ्यात् प्रतीतं द्रव्यम् ।'[38] तदेवं जातिविशिष्टं द्रव्यं द्रव्यविशिष्टा च जातिः सर्वेषु शब्देषु नित्यत्वेन भवतः, उभावपि पदार्थौ नित्यौ इति पाणिनिकात्यायनपतञ्जलिभर्तृहर्यादिभिः स्वीकृतः सिद्धान्तो वैयाकरणानां विद्यत इति 'द्विकम्' इति पदेन स्वीक्रियते । तदेतदभिप्रेत्याह द्विकम् । जातिव्यक्ती इत्यर्थः ।'[39]

'त्रिकम्' इति पदेन 'जातिव्यक्तिलिङ्गानीत्यर्थः'[40] नामार्थ इति पक्षः स्वीक्रियते, अर्थाद् यथा जातिव्यक्ती नामार्थस्तथैव लिङ्गमपि नामार्थो भवति । अत्र पाणिनेः 'ह्रस्वो नपुंसके प्रातिपदकस्य'[41] स्वमोर्नपुंसकात्[42] इत्यादिसूत्राणि प्रमाणभूतानि सन्ति । लिङ्गस्य प्रकृत्यर्थत्वे स्वीकरणे सूत्रार्थसङ्गतिर्भवति । महाभाष्यकारेण लिङ्गस्वरूपं 'सरूपाणामेकशेष एकविभक्तौ'[43], 'स्त्रियाम्'[44], 'तस्यापत्यम्'[45] इत्यादिसूत्रेषु विस्तरेण प्रतिपादितम् ।

नागेशभट्टेन प्रत्ययानां द्योतकत्वाल्लिङ्गं नामार्थो भवतीति समीक्षितम्, यथा कथयति 'लिङ्गमपि नामार्थः, प्रत्ययानां द्योतकत्वात् । अन्यथा वागुपानदादिशब्देभ्यः इयं तव वागिति स्त्रीत्वानापत्तेः । अयमितिव्यवहारविषयत्वं पुंस्त्वम्, इयमिति व्यवहारविषयत्वं स्त्रीत्वम्, इदमितिव्यवहारविषयत्वं क्लीबत्वमिति विलक्षणं शास्त्रीयं स्त्रीपुंनपुंसकत्वम् । अत एव खट्वाशब्दवाच्यस्य स्तनकेशादिमत्त्वरूपलौकिकस्त्रीत्वाभावेऽपि तद्वाचकाट् टाबादिप्रत्ययः ।'[46]टाबादयः प्रत्ययाः स्त्रीत्वे द्योत्ये भवन्ति, अजा, एडका, खट्वादिशब्देषु स्त्रीत्वमजादिप्रकृतेरेव वाच्यो भवति । टाबादिप्रत्ययस्तु तत्र स्त्रीत्वस्य द्योतको भवति, अर्थाल्लिङ्गस्यापि प्रकृत्यर्थत्वात् तदपि नामार्थः सिध्यतीति भावः ।

वाक्यपदीये लिङ्गसमुद्देशस्यावतरणे हेलाराजः कथयति 'क्रियाकालपुरुषोपग्रहास्तिङन्तैकनियताः, लिङ्गं तु नामपदानामधिकं वाच्यम्'[47] लिङ्गं नामपदानामधिकं वाच्यं भवत्यर्थात् 'संख्यासाधने सुबन्ततिङन्तोभयाभिधेये, क्रियाकालपुरुषोपग्रहास्तिङन्तैकनियता वाच्यतया तिङन्तमात्रवर्तिनः, लिङ्गं तु संख्यासाधनाभ्यां प्रवृत्तिनिमित्ततदाश्रयाभ्याञ्चाधिकं वाच्यम्'[48] भवतीति भावः । वाक्यपदीये लिङ्गसमुद्देशे लिङ्गस्य विस्तृतं चिन्तनं प्रस्तुतं भर्तृहरिणा ।

वाक्यपदीयकारो लिङ्गं शब्दसंस्कारमात्रमिति मन्यते यथा लिङ्गसमुद्देशे कारिकाऽस्ति -

> इदं वेयमयं वेति शब्दसंस्कारमात्रकम् ।
> निमित्तदर्शनादर्थे कैश्चित् सर्वत्र वर्ण्यते ॥[49]

कारिकाभिप्रायं विवृण्वन् टीकाकार: कथयति 'इदं वस्तु, इयं व्यक्तिरयमर्थ इति त्रिलिङ्गानां सर्वत्र वस्तुमात्रे बहिर्निमित्तानपेक्षा प्रवृत्तिर्न व्याहन्यत इति अस्मान्निमित्तदर्शनाच्छब्दान्वाख्यानमात्रं लिङ्गमभ्युपगन्तव्यम्'[50]

लिङ्गस्य शब्दसंस्कारात्मकं स्वरूपं भवत्यर्थाल्लिङ्गं शब्दे स्वभावेनैव भवति प्रत्ययादिना च संस्क्रियते द्योत्यत इति भाव: ।

भट्टोजिदीक्षितेन शब्दकौस्तुभे सरूपाणामेकशेष एकविभक्तौ इति सूत्रव्याख्याने लिङ्गविषयो निरूपित:, यथोक्तं तत्र -

'तत्र कश्चिच्छब्द एकस्मिन्नेव लिङ्गे शक्त:, कश्चित्तु द्वयो: कश्चित् त्रिष्विति लिङ्गानुशासनादिभ्यो निर्णयम् ।'[51]

तदेवं शब्दे लिङ्गस्य स्वाभाविकी स्थिति: शक्तिश्च भवतीति लिङ्गमपि नामार्थत्वेन स्वीक्रियते ।

चतुष्कमिति पदेन किं ज्ञायत इति प्रश्ने भूषणकार: कथयति 'चतुष्कम् - संख्यासहितं त्रिकमित्यर्थ:'[52] अर्थाज्जातिव्यक्तिलिङ्गै: साकं संख्याऽपि नामार्थ: भवति । संख्यापेदनात्र एकद्विबहुवचनानि गृह्यन्ते । संख्याऽपि नाम्नि स्वभावेन भवति । विभक्त्यादिबोधकप्रत्यया विवक्षानुसारं तां संख्यां प्रकाशयन्ति । विभक्तीनां द्योतकत्वात् संख्याऽपि नामार्थ इति सिध्यति, यथा कथयति भूषणकार: 'प्रत्ययवर्जिते दधि पश्य' इत्यादौ प्रत्ययमजानतोऽपि बोधात् प्रकृतेरेव वाचकत्वं कल्प्यते ।[53]

नागेशभट्टोऽपि संख्याया नामार्थत्वं स्वीकुर्वन् कथयति 'संख्याऽपि नामार्थ: । विभक्तीनां द्योतकत्वात् ।'[54] तत्र प्रमाणमपि प्रस्तुवन् वदति । अत एव 'आदिर्ञिटुडव:' (पा. सू. 1/3/5) इति सूत्रे आदिरिति बहुत्वे एकवचनम् । वाच्यत्वेऽन्वयव्यतिरेकाभ्यां जसं विना नामार्थबहुत्वप्रतीत्यभावापत्ते: ।[55]

अर्थाद् यद्यपि अन्वयव्यतिरेकाभ्यां विभक्तीनां वाचकत्वपक्षोऽपि स्वीक्रियते किन्तु संख्याबोध्वे तु तासां द्योतकत्वमेव सम्भवति तत्र प्रमाणभूतं सूत्रम् 'आदिर्ञिटुडव:' विद्यते, अत्र अन्वयव्यतिरकाभ्यां तर्हि जसं विना 'आदि:' इत्यत्र बहुवचनप्रतीतिर्न स्यात्, भवति सा प्रतीति: । अतो व्यतिरेकव्यभिचारसत्त्वादत्र संख्याबोधे प्रकृतेरेव संख्यादेर्वाचिकत्वपक्षस्वीकरणात् संख्याऽपि नामार्थ: भवतीति भाव: ।

पञ्चकमित्यनेन किं विवक्षितमिति जिज्ञासायां कथयति भूषणकार: 'पञ्चकम्' कारकसहितं चतुष्कमित्यर्थ: ।[56] अर्थाज्जातिव्यक्तिलिङ्गसंख्यासमन्वितं कारकमपि नामार्थो भवति । नागेशभट्टोऽपि कौण्डभट्टमनुसृत्य कारकस्य नामार्थत्वं स्वीकुर्वन् कथयति 'कारकमपि प्रातिपदिकार्थ इति पञ्चकं प्रातिपदिकार्थ:'[51] कारकस्य नामार्थत्वमपि प्रत्ययानां द्योतकत्वादेव स्वीक्रियते, यथा नागेशभट्टो विवृणोति 'नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यमिति चेत्, न । दधि तिष्ठति दधि पश्येत्यादौ कर्त्रादिकारकप्रतीति: प्रत्ययं विनापि सिद्धत्वात्। न च लुप्तप्रत्ययस्मरणात्तत्प्रतीतिरिति वाच्यम्,



Scanned with OKEN Scanner

प्रत्ययलोपमजानतोऽपि नामत एव तत्प्रतीतिः ।'[58] अर्थात् प्रत्ययादर्शनेऽपि नामशब्दशक्तिवशात् कर्तृकर्मत्वरूपकारकबोधात् कारकमपि नामार्थत्वेन स्वीक्रियते ।

यद्यपि एते पञ्च नामार्था एकं द्विकं त्रिकमित्यादिकारिकानिर्दिष्टाः स्वीक्रियन्ते तथापि शब्दोऽपि शाब्दबोधे भासते अतः शब्दस्यापि नामार्थत्वमङ्गीक्रियते, यथा एतत्तथ्यं प्रकाशयन् कौण्डभट्टो लिखति 'शब्दस्तावच्छाब्दबोधे' भासते ।

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ (वा. प.)**

इत्याद्यभियुक्तोक्तेः । विष्णुमुच्चारय । इत्यादावर्थोच्चारणासम्भवेन, विनाशब्दविषयं शाब्दबोधासङ्गतिश्चेति सोऽपि प्रातिपदिकार्थः षोढापि क्वचित् प्रातिपदिकार्थ इत्याह -

**शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा तथा**
**नोचेच्छोत्रादिभिः सिद्धोऽप्यसावर्थोऽवभासते ॥**

यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः । यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोऽप्यर्थवद् भासते । अपि हेतौ । उपस्थितत्वाद् भासत इत्यर्थः ।[59]

अनुकार्यानुकरणयोर्भेदविवक्षायां शब्दोऽपि नामार्थो भवतीति अभिप्रायः ।

नागेशभट्टोऽपि कौण्डभट्टानुसारं शब्दस्यानुकार्यानुकरणस्वरूपप्रतिपादनपूर्वकं तस्य प्रातिपदिकार्थत्वं निरूपितवान्, यथा परमलघुमञ्जूषायां कथयति - 'विशेषणतया शब्दोऽपि शाब्दबोधे भासते । युधिष्ठिर आसीदित्यादौ युधिष्ठिरशब्दवाच्यः कश्चिदासीदिति बोधात् ।'

न सोऽस्ति ........ इत्यभियुक्तोक्तेः ।

**ग्राह्यत्वं गाहकत्वं च द्वे शक्ती तेजसो यथा ।**
**तथैव सर्वशब्दानामेते पृथगवस्थिते ।**
**विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते** । इति वाक्यपदीयाच्च ।

अत एव विष्णुमुच्चारयेत्यादावर्थोच्चारणासम्भवाच्छब्दप्रतीतिः । अत एवानुकरणेनानुकार्यप्रतीतिः । तथा हि स्वसदृशशब्दमात्रबोधतात्पर्यकोच्चारणविषयकत्वमनुकरणत्वम् । स्वशब्दप्रतिपाद्यत्वे सति शब्दत्वमनुकार्यत्वम् । तत्रानुकार्यादनुकरणं भिद्यत इति तयोर्भेदविवक्षाया मनुकार्यस्वरूपप्रातिपदिकत्वेनार्थवत्त्वात् प्रातिपदिकत्वात् स्वादिविधिः । भेदपक्षज्ञापकः 'भुवो वुग्लुङ्लिटोः' (पा. 6/4/88) इत्यादिनिर्देशः । अनुकार्यादनुकरणमभिन्नमित्यभेदविवक्षायां चार्थवत्त्वाभान्न प्रातिपदिकत्वम् न वा पदत्वम् । अभेदपक्षज्ञापकस्तु 'भू सत्तायाम्' इत्यादिनिर्देशः प्रातिपदिकत्वपदत्वाभावेऽपि 'भू' इत्यादि साधु भवत्येव ।[60]

तदित्थमनुकार्यानुकरणयोर्भेदविवक्षायां शब्दोऽपि नामार्थत्वेन स्वीक्रियते शब्दतत्त्वज्ञैः । अनेन प्रकारेण शब्दस्यापि नामार्थत्वमङ्गीकृत्य षोढा नामार्थ इत्यपि पक्षः नामार्थनिर्णये शास्त्रसम्मतो विद्यत इति वैयाकरणैः सप्रमाणं संसाध्यत इति शास्त्रपरिशीलनेन ज्ञातुं शक्यते ।



Scanned with OKEN Scanner

नामार्थविषयका एते सर्वेऽपि पक्षा: मूलरूपेण महाभाष्ये 'कुत्सिते' इति सूत्रभाष्ये द्रष्टुं शक्यन्ते यथा तत्र भाष्यकारो निर्दिशति – 'स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम् । समवेते च वचने लिङ्गं वचनं विभक्तिञ्च । अभिधाय तान् विशेषानपेक्षमाणश्च कृत्स्नमात्मानम् । प्रियकुत्सनादिषु पुन: प्रवर्ततेऽसौ विभक्त्यन्त: ।'[61] प्रदीपकार: भाष्याशयं स्पष्टयन् कथयति 'स्व-शब्दोऽत्रात्मीयवचन:, अर्थशब्दोऽभिधेयवचन: । स्वोऽर्थ: स्वार्थ:, स चानेकप्रकारो जातिगुणक्रिया-सम्बन्धस्वरूपलक्षण: गौ: शुक्ल: पाचक: राजपुरुष: डित्थ इति । तं स्वार्थमभिधाय तेन स्वार्थेन समवेतं सम्बद्धं द्रव्यमाह शब्दो निरपेक्ष इत्यनेन दर्शयति यथा द्रव्येऽभिधातव्येऽर्थगतं निमित्तान्तरमपेक्ष्यते । 'द्रव्यम्' शब्देन च इदं तदिति परामर्शयोग्यं वस्त्वभिधीयते । तत्र जातिशब्दो यदा जातौ वर्तते तदारोपितस्वरूपां स्वरूपेणैकीकृतां जातिमाहेति तदा तेषां स्वरूपं स्वार्थ:, जातिस्तु द्रव्यम् । यदा तु जातिविशिष्टं द्रव्यमाह तदा जाति: स्वार्थ: । शुक्लादयो यदा गुणजातौ वर्तन्ते तदा तेषां स्वरूपं स्वार्थ:, जातिर्द्रव्यम् । यदा तु गुणे वर्तन्ते तदा गुणसामान्यं स्वार्थ:, गुणो द्रव्यम् । यदा द्रव्ये वर्तन्ते तदा गुण: स्वार्थ: । समवेतस्य द्रव्यस्याभिधाने सति लिङ्गं वचनं विभक्तिञ्चाह सम्बन्ध: । तान् विशेषानिति – लिङ्गादीनामेव परामर्श: । लिङ्गं – स्त्रीत्वादि, वचनं संख्या, विभक्ति: कारकं कर्मादि । ......... एतान् विशेषानभिधाय स्वार्थादिपञ्चकवृत्तं कृत्स्नमात्मानम-पेक्षमाण: शब्द: प्रियकुत्सनादिषु विभक्त्यन्त: पुन: प्रवर्तते ।[62]

उपर्युक्तभाष्यप्रदीपादिपर्यालोचनेन स्पष्टतया ज्ञायते यज्जातिव्यक्तिलिङ्गसंख्याकारकादय: स्वार्था: शब्दे गुणप्रधानभावेन स्वभावेन समवेता भवन्ति । शब्दे च स्वार्थबोधिका शक्ति: स्वभाव-सिद्धा भवति, तेनैव सर्वो लोकव्यवहार: सिद्धो भवति यथा भाष्यकार: निर्दिशति । '**शब्दैरपि शब्दा व्याक्रियन्ते तद्यथा गौरित्युक्ते सर्वे सन्देहा निवर्तन्ते नाश्वो न गर्दभ:**'[63] इति । तदित्थं नामार्थविषये येऽपि पक्षा भट्टोजिदीक्षितकौण्डभट्टनागेशभट्टादिभि: स्वस्वग्रन्थेषु विमृष्टा: ते सर्वेऽपि भाष्यादिव्याकरणशास्त्रसम्मता: सन्तीति यथा मूलकारिकायामपि तथ्यमेतत् स्वीकृतं वर्तते –

**'सर्वेऽमी पक्षा: शास्त्रे निरूपिता: ।'**

**सन्दर्भा:**


1. वाक्यपदीयम् 1/124 ।
2. निरुक्तम् 1/1/1 ।
3. निरुक्तम् 1/1/2 ।
4. तत्रैव दुर्गवृत्ति: ।
5. द्र. महाभाष्यपस्पशाह्निकम् ।
6. निरुक्तम् 1/1/1 ।
7. तत्रैव दुर्गवृत्ति: ।
8. निरुक्तम् 1/1/2 ।




Scanned with OKEN Scanner

9. तत्रैव दुर्गवृत्ति: ।
10. निरुक्तम् 1/1/2 ।
11. तत्रैव दुर्गवृत्ति: ।
12. महाभाष्यम् 5/3/66 ।
13. महाभाष्यम् 5/3/66 ।
14. तत्रैवोद्योत: ।
15. महाभाष्यपस्पशाह्निकोद्योत: ।
16. वैयाकरणभूषणसार:, समासशक्तिनिर्णय: का. 28 ।
17. अष्टाध्यायी 1/2/45 ।
18. शब्दशक्तिप्रकाशिका, नामनिरूपणम्, श्लोकसंख्या 14 ।
19. वैयाकरणभूषणसार: नामार्थनिर्णय: का. 25 ।
20. वै. भू. सा. नामार्थनिर्णय: ।
21. तत्रैव दर्पणटीका ।
22. परमलघुमञ्जूषा, नामार्थनिरूपणम् ।
23. मीमांसादर्शनम् 1/3/33 ।
24. तत्रैव शाबरभाष्यम् ।
25. श्लोकवार्तिकम्, आकृतिवाद: श्लोकसंख्या 6, 66 ।
26. वैयाकरणभूषणसार: नामार्थनिर्णय: ।
27. वैयाकरणभूषणसार: नामार्थनिर्णय: ।
28. इ. प. ल. म. नामार्थनिरूपणम् ।
29. वैयाकरणभूषणसार: नामार्थनिर्णय: ।
30. प. ल. म. नामार्थनिरूपणम् ।
31. महाभाष्यम् 1/2/64 ।
32. महाभाष्यपस्पशाह्निकम् ।
33. महाभाष्यवार्तिकम् 1/2/58 ।
34. महाभाष्यम् 1/2/58 ।
35. महाभाष्यपस्पशाह्निकम् ।
36. वाक्यपदीयम्, जातिसमुद्देश: का. 2 ।
37. तत्रैव प्रकाशव्याख्या ।
38. तत्रैव प्रकाशव्याख्या ।
39. वैयाकरणभूषणसार: नामार्थनिर्णय: ।
40. वैयाकरणभूषणसार: नामार्थनिर्णय: ।



Scanned with OKEN Scanner

41. अष्टाध्यायी 1/2/47 ।
42. अष्टाध्यायी 7/1/23 ।
43. द्र. महाभाष्यम् 1/2/64 ।
44. द्र. महाभाष्यम् 4/1/3 ।
45. द्र. महाभाष्यम् 4/1/92 ।
46. प. ल. म. नामार्थनिरूपणम् ।
47. वा. प. लिङ्गसमुद्देशावतरणम् ।
48. तत्रैव अम्बाकर्त्री ।
49. वा. प. लिङ्गसमुद्देश का. 30 ।
50. तत्रैव प्रकाशव्याख्या ।
51. शब्दकौस्तुभ: 1/2/64 ।
52. वै. भू. सा. नामार्थनिर्णय: ।
53. वै. भू. सा. नामार्थनिर्णय: ।
54. प. ल. म. नामार्थनिरूपणम् ।
55. तत्रैव ।
56. वै. भू. सा. नामार्थनिर्णय: ।
57. प. ल. म. नामार्थनिरूपणम् ।
58. तत्रैव ।
59. वै. भू. सा. नामार्थनिर्णय: ।
60. प. ल. म. नामार्थनिरूपणम् ।
61. महाभाष्यम् 5/3/74 ।
62. तत्रैव प्रदीप: ।
63. महाभाष्यपस्पशाह्निकम् ।

आचार्यचर:, व्याकरणविभाग:,
राष्ट्रियसंस्कृतसंस्थानम्,
क.जे.सोमैयासंस्कृतविद्यापीठम्,
विद्याविहार:, मुम्बई-७७

★★★



Scanned with OKEN Scanner

## विद्यापीठे प्रतिष्ठिताः विभागाः

- व्याकरणविभागः
- साहित्यविभागः
- ज्योतिषविभागः
- शिक्षाशास्त्रविभागः
- आधुनिकविभागः
- शोधप्रकाशनविभागः
- मुक्तस्वाध्यायपीठम्
- अनौपचारिकसंस्कृतशिक्षणकेन्द्रम्
- वास्तुज्योतिषपरिचयपाठ्यक्रमः

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं,
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम् ।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्,
सोमैयाभुवि भासते परिसरो मुम्बापुरे संस्थितः ॥


राष्ट्रियसंस्कृतसंस्थानम्
( मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम् )
(मानितविश्वविद्यालयः)
क.जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

विक्रमाब्दः - 2075 ख्रीस्ताब्दः - 2018 ISSN NO- 2457-0729
तृतीयोऽङ्कः

# वाग्वै ब्रह्म

सन्दर्भिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका

Peer Reviewed Research Journal

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनी या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या ।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु ॥

व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)
क॰जे॰सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई – 77

Scanned with OKEN Scanner

## सङ्गोष्ठीचित्राणि


DEEMED UNIVERSITY
UNDER MHRD GOVT OF INDIA












DEEMED UNIVERSITY
UNDER MHRD GOVT OF INDIA





| | |
|---|---|
| RNI No | MAHSAN/2017/73496 |
| ISSN No | 2457-0729 |
| मुद्रकः | प्रो. बोधकुमारझाः |
| प्रकाशकः | प्रो. बोधकुमारझाः |
| स्वामिनो नाम | राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)<br>(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)<br>क. जे. सोमैया संस्कृतविद्यापीठम्,<br>विद्याविहारः (पूर्वः), मुम्बई, महाराष्ट्रम् - 400 077 |
| मुद्रणम् | वन्दना आर्ट्स, बी-56, भूमितलम् स्टेशन प्लाझा, स्टेशन रोड,<br>भाण्डुपम् (पश्चिमम्), मुम्बई - 400 078, महाराष्ट्रम्, भारतम् । |
| प्रकाशनम् | राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)<br>(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)<br>[illegible] जे. सोमैया संस्कृतविद्यापीठम्,<br>[illegible]विहारः (पूर्वः), मुम्बई, महाराष्ट्रम् - 400 077 |
| अङ्कः | [illegible]यः |
| अनुक्रमः | [illegible]0 |
| प्रकाशनसमयः | [illegible]म्बर, 2018 |
| संरक्षकः | [illegible]. सुदेशकुमारशर्म्मा, प्राचार्य्यः,<br>रा. सं. सं., क. जे. सोमैयासंस्कृतविद्यापीठम्,<br>विद्याविहारः, मुम्बई । |
| सम्पादकः | प्रो. बोधकुमारझाः |
| सम्पादकमण्डलम् | प्रो. बोधकुमारझाः, आचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।<br>डॉ.सुभाषचन्द्रमीणा, सहायकाचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।<br>डॉ. माधवदत्तपाण्डेयः, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।<br>डॉ. नवीनकुमारमिश्रः, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।<br>सुश्रीविदुषीबोल्ला, शोधप्रज्ञा, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई । |



### पुनर्वीक्षकमण्डलम्

- **प्रो. दिलीपकुमारझाः,**
  कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः,
  दरभंगा, बिहारः, ।
- **प्रो. (श्रीमती) अर्चना दूबे,**
  श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातम् ।
- **प्रो. अशोकचन्द्रगौडः,**
  आचार्य्यचरः राष्ट्रियसंस्कृतसंस्थानम्, गरलीपरिसरः,
  हिमाचलप्रदेशः ।
- **डॉ. प्रियव्रतमिश्रः,**
  श्रीरामसुन्दरविश्वविद्याप्रतिष्ठानम्,
  रमौली, दरभंगा, बिहारः ।

### मूल्याङ्कनकर्तृमण्डलम्

- **प्रो. मदनमोहनझाः,** आचार्य्यः, शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, श्रीरणवीरपरिसरः, जम्मूः ।
- **डॉ. देवदत्तसरोदे,** सहायकाचार्य्यः, शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- **डॉ. रा. गा. मुरलीकृष्णः,** सहायकाचार्य्यः,
  राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।
- **डॉ. मधुकेश्वरभट्टः,** सहायकाचार्य्यः,
  राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।



Printed by Prof. Bodh Kumar Jha, Published by Prof. Bodh Kumar Jha on behalf of Rashtriya Sanskrit Sansthan (Deemed University), Under MHRD, Govt. of India, K. J. Somaiya Sanskrit Vidyapeetham, Vidyavihar (E), Mumbai, Mahrashtra - 400 077 and Printed at Vandana Arts B-56, Ground Floor, Station Plaza, Station Road, Bhandup (West), Mumbai - 400 078 Maharashtra, India and Published at Rashtriya Sanskrit Sansthan (Deemed University), Under MHRD, Govt. of India K. J. Somaiya Sanskrit Vidyapeetham, Vidyavihar (E), Mumbai, Maharashtra - 400 077, Editor Prof. Bodh Kumar Jha

सुरभारतीपरम्पराग्रणीभ्यः शाब्दिकधाराधराधरेभ्यो विविधशास्त्रपण्डितेभ्यो वाराणसेय-
गाङ्गजलपानपवित्रेभ्यो राष्ट्रियसंस्कृतसंस्थानश्रीसदाशिवपरिसरपुर्य्यां प्रारब्ध-
शास्त्रसेवेभ्यो मुम्बादेवीआदर्शसंस्कृतमहाविद्यालये प्राचार्य्यपदं सुशोभित-
वद्भ्यो राष्ट्रियसंस्कृतसंस्थानस्य क. जे. सोमैयासंस्कृतविद्यापीठमुम्बई-
व्याकरणविभागे नैकवर्षाणि शास्त्रचूडामणिरूपेण कृतयोगदानेभ्यः
'अतिदेशसूत्रविमर्शः' इति नामधेयपुस्तकप्रणेतृभ्यः
शिष्यवत्सलेभ्यो
आचार्य्यरामरूपमिश्रशर्म्मभ्यः




राष्ट्रियसंस्कृतसंस्थानस्य
क. जे. सोमैयासंस्कृतविद्यापीठस्य
व्याकरणविभागेन विद्यापीठपरिवारेण
चैषमो दिवङ्गतेभ्यो विद्वद्वरेण्येभ्यः सप्रश्रयं
साश्रु श्रद्धाञ्जलिकुसुमानि विभागीयपत्रिकामयानि
समर्प्यन्ते, सास्मर्यन्ते चास्मिन्नवसरे स्मितमुखाः पण्डितप्रवराः ॥

Scanned with OKEN Scanner

राष्ट्रियसंस्कृतसंस्थानम्,
(मानितविश्वविद्यालयः)
(मानवसंसाधनविकासमन्त्रालयाधीनम्)
क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः,
मुम्बई - 400 077

Rashtriya Sanskrit Sansthanam
(Deemed University)
(Under MHRD, Govt. of India)
K.J. Somaiya Sanskrit Vidyapeetham
Vidyavihar, Mumbai-400077



स्वस्त्यस्तु । ऐतरेयब्राह्मणस्य 'वाग्वै समुद्रः', 'न वाक्क्षीयते', शतपथब्राह्मणस्य 'वाग्वै विराट्', ऐतरेयब्राह्मणस्यैव 'वाचो वा इदं सर्वं प्रभवति' इत्यादिश्रुतयः वाचः अक्षरत्वमनन्तत्वं विभुत्वं ब्रह्माण्डस्य उपादानकारकत्वञ्च घोषयन्ति ।

सिद्धान्तशैवानुसारं त्रीणि रत्नानि भवन्ति । तेषु शिवः, ज्ञानरूपा शक्तिश्च इत्येकं रत्नम्, शिवस्य बिन्दुरूपा परिग्रहशक्तिः क्रियाशक्त्यपरनामधेया द्वितीयं रत्नम्, आत्मा चेति तृतीयं रत्नम् । तद्बिन्दोश्च भेदद्वयं शुद्धम् अशुद्धञ्च । द्विविधबिन्दुभ्यामुत्पन्ना धारा जगदात्मिका, तत् परिणामश्च वाणीरूपः । तदतिक्रमणमेव मोक्षः ।

आचार्य्योऽभिनवगुप्तश्च ब्रूते प्रकाशो विमर्शश्चेति वस्तुद्वयम् । तयोः प्रकाशः शिवः, विमर्शश्च तदीया स्वात्न्यशक्तिः उमारूपा । पुनरपि प्रकाशं विना विमर्शस्य, विमर्शं विना च प्रकाशस्य अस्तित्वासम्भवात्, द्वयोः ऐक्यम् । तस्मादेव मतमेतद् अद्वैतमिति । अत्र विमर्शः परावाक्त्वेन, प्रकाशश्च अर्थत्वेन सम्मन्यते । अमुमेव सिद्धान्तं कालिदासः 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥' इति मङ्गलाचरणेन अभिव्यनक्ति ।

शब्दब्रह्मवादिनां वैयाकरणानाञ्च परा वागेव शब्दब्रह्म, तस्मिन् तादात्म्यमेव जीवस्य मोक्षः । मुक्तिदशायामपि शब्दात्मना जीवस्य स्थितिः भवत्येव ।

अस्तु । वाक्यपदीयसरणिमनुसृत्य वाक्तत्वस्य आध्यात्मिकं भौतिकञ्च तत्वमाविष्कर्तुं प्रवृत्तायाः व्याकरणशास्त्रीयराष्ट्रियशोधसंगोष्ठ्याः प्रशस्तानि शोधपत्राणि समूह्य 'वाग्वै ब्रह्म' इति नाम्ना ख्यातिङ्गतां शोधपत्रिकां विद्यापीठस्यास्य व्याकरणविभागः प्रकाशनं करोतीति महतो मोदस्य विषयः ।

अवसरेऽस्मिन् शोधितपत्रेभ्यः आचार्य्येभ्यः गवेषकेभ्यः विभागीयसदस्येभ्यश्च साधुवादान् यच्छामः । वाक्तत्वरुचिमद्भ्यः, विशेषतश्च शाब्दिकजगज्जीवेभ्यः पत्रिकैषा स्वस्तिकरा भूयादिति कामयामहे ।

(प्रो. सुदेशकुमारशर्मा)
प्राचार्य्यः

Scanned with OKEN Scanner



# सम्पादकीयम्

व्याकृतिविद्याया: त्रिविधो विकास: प्रथते । अष्टाध्यायीक्रमेण प्रक्रियाक्रमेण दार्शनिकक्रमेण च । तत्र सर्वेषामेव मूलं पातञ्जलमहाभाष्यमिति विश्रुतम् । यन्महाभाष्यदार्शनिककाराणामभिमतं तदेव शाब्दिकानां मतमिति कश्चन शाब्दिकपरम्परायां सिद्धान्त: । दार्शनिकतथ्यप्रकाशनपर: अद्वैतस्फोटवादानुरूपसिद्धान्तप्रतिपादनपरश्च सङ्ग्रहनामको ग्रन्थो यद्यपि महाभाष्यादपि पूर्वमासीदिति स्वयं पतञ्जलिना तदुल्लिखितत्वादिति प्रतीम:, तथापि तस्यानुपलब्धे: महाभाष्यस्य तद्वासनावासितत्वाच्च दार्शनिकधाराया: अपि मूलं महाभाष्यमिति निर्भ्रान्तं वच:। तत्र सरलया कारिकात्मिकया रीत्या योगर्षिणा भर्तृहरिणा वाक्यपदीयमिति विश्वविश्रुतं ग्रन्थरत्नं महाभाष्यरहस्यमुन्जिघाटयिषया प्राणायि । काण्डत्रये ब्रह्मवाक्यपदात्मके प्रकृतिप्रत्ययतदर्थवाक्यपदतत्तदर्थप्रदर्शनपरोऽप्ययं ग्रन्थ: शब्दब्रह्माद्वैतवादं सयुक्ति प्रकटयति । अत एव ग्रन्थस्यास्य प्रारम्भो ब्रह्मकाण्डाभिधेयेन काण्डेन प्रकाण्डेन पण्डितेन वाग्धरिणा भर्तृहरिणा अकारि । आशयममुं जानानेन राष्ट्रियसंस्कृतसंस्थानस्य क. जे. सोमैयासंस्कृतविद्यापीठस्य व्याकरणविभागेन ब्रह्मकाण्डीयं विषयवस्तुजातम् उररीकृत्य गवेषणं चिन्तनं समालोचनञ्च वाञ्छता 29.11.2018 इत्यत: 30.11.2018 पर्य्यन्तं राष्ट्रिया सङ्गोष्ठी समायोज्यत । तत्र नवदशानां विदुषां गवेषकाणाञ्च महत्त्वपूर्णानि शास्त्रतत्त्वप्रस्फोटकानि शोधपत्राणि वाचितानि। तानि संगृह्य प्रतिशोधपत्रं सम्पादकीयवक्तव्येन सह 'वाग्वै ब्रह्म' इत्याख्यायां व्याकरणशास्त्रविभागीयराष्ट्रियशोधपत्रिकायां सर्वजनसुलभतामुद्दिश्य प्रकाशनं कर्त्तुकामो विभागोऽयं तत्रभवतां भवतां पुरस्तात् पत्रिकापुष्पं पुरस्कृत्य नितरां प्रसीदति ।

सारस्वतसाधनासिद्धिरूपाणि शोधपत्राणि अत्र पत्रिकागर्भगतानि सन्ति, सन्ति च संरक्षकाणां विद्यापीठप्राचार्य्याणामाचार्यसुदेशकुमारशर्म्मणाम् आशीर्वादा:, अथ च सम्पादनप्रकाशनपुनर्वीक्षणमूल्यांकनकर्त्तॄणां भारतवर्षस्य नानानामस्थलानां विद्वद्धौरेयाणाम् उदारचरितानां कृपा:, तेभ्य: समेभ्य: सारस्वतसमुपासकेभ्यो विभागोऽसौ, अदसीयसम्पादकमण्डलञ्च कार्तज्ञं विज्ञाप्य वाग्ब्रह्म स्मारं स्मारं कामयते ।

प्रो. बोधकुमारझा:

Scanned with OKEN Scanner

# शोधपत्रानुक्रमणिका


| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | भर्तृहरेः वाचां त्रयीत्वं वा, चतुष्टयीत्वं वा । | प्रो. बोधकुमारझाः | 1 |
| 2. | भर्तृहरिमते शब्दवैशिष्ट्यविमर्शः । | प्रो. अशोचन्द्रगौडशास्त्री | 8 |
| 3. | वाक्यपदीयब्रह्मकाण्डस्थविषयविमर्शः । | डॉ. राजधरमिश्रः | 15 |
| 4. | जगतः शब्दविवर्त्तत्वविचारः । | डॉ. देवदत्तः सरोदे | 20 |
| 5. | तुरीयवागुत्पत्तिविमर्शः - वाक्यपदीयसन्दर्भे । | डॉ. प्रियव्रतमिश्रः | 27 |
| 6. | भावविकारसन्दर्भे भावपदार्थः । | डॉ. दीपेशविनोदकतिरा | 33 |
| 7. | वाक्यपदीयस्य ब्रह्मकाण्डे जगतः शब्दपरिणामत्वम् । | डॉ. शरदचन्द्रसाहुः | 39 |
| 8. | Phonetics and Phonology : An Historical View. | Dr. Shweta Sood | 48 |
| 9. | शास्त्रेषु नञर्थविमर्शः । | डॉ. सन्तोषकुमारझाः | 55 |
| 10. | वाक्यपदीये शब्दब्रह्मणः स्वरूपम् । | श्रीसत्यराजरेग्मी | 60 |
| 11. | 'इष्यते पुत्रः' इत्यत्र क्यजभावस्य रहस्यम् । | ब्र. अजयः | 70 |
| 12. | उदात्तादि स्वरों का स्वरूप विवेचन । | आचार्य उदयन मीमांसक | 74 |
| 13. | भर्तृहरिदृशा अपभ्रंशशब्दविमर्शः । | सुश्रीविदुषीबोल्ला | 93 |
| 14. | वाक्यपदीयस्फोटविमर्शः । | डॉ. सुभाषचन्द्रमीणा | 99 |
| 15. | आगमप्रामाण्यविचारः । | डॉ. नवीनकुमारमिश्रः | 105 |
| 16. | शब्दार्थसम्बन्धनिरूपणम् । | डॉ. माधवदत्तपाण्डेयः | 111 |
| 17. | वाक्यपदीय-ब्रह्मकाण्ड में उपमा एवं उदाहरण का अन्वेषण । | डॉ. (श्रीमती)गीता दुबे | 119 |
| 8. | वाक्यपदीयब्रह्मकाण्डस्थविषयविमर्शः । | सौ. मैत्रेयी सुयोगपटवर्धन | 126 |
| 9. | वाक्यपदीये शब्दतत्त्वम् | श्रीरूपेशताटे | 132 |


Scanned with OKEN Scanner

# भर्तृहरेः वाचां त्रयीत्वं वा, चतुष्टयीत्वं वा

✍ प्रो. बोधकुमारझाः

( संस्कृतव्याकरणस्य चतुर्थो मुनिस्तत्रभर्तृहरिः स्ववाक्यपदीये वाग्रहस्यमुद्घाटयामास । तत्र व्याकरणान्वाख्येयत्वं पश्यन्त्यादिषु तिसृषु एवति विभाव्य 'त्रय्या वाचः परं पदमि'त्यत्र वाचस्त्रयीत्वं प्रतिपादयामासेति केचित् । अन्ये च परं पदमित्यादिना पराया अपि विवरणं हरिणा प्रदत्तमिति ब्रुवन्ति । तत्रायं लेखः वाचां चतुष्टयीत्वपक्षे निर्णयति । वेदोपनिषदादीनां प्रमाणेन, नानाऽऽचार्याणां वचनेन चात्र पूर्वपक्षत्वेन त्रयीत्वपक्षः पोषितः, उत्तरपक्षत्वेन च चतुष्ट्वे सम्मतिः प्रकटिता । तथाहि 'चत्वारि पदानि, नामाख्यातोपसर्गनिपाताश्चे'त्यत्र द्वन्द्वान्ते समुच्चयार्थकः चकारप्रयोगः सार्थकः, तेन परादीनां चतसृणां ग्रहणम् । अन्यथा नामादीनामेव ग्रहणे चकारोऽनर्थकः - इत्यादयो युक्तयः प्रदर्शिताः । - स. )

त्रयीपदेनात्र पश्यन्ती, मध्यमा, वैखरी; अथ चतुष्टयीपदेन परा, पश्यन्ती, मध्यमा, वैखरी चति गृह्यते । तत्र नव्यशाब्दिकैः भट्टनागेशैः वाचश्चातुर्विध्यं स्वीक्रियत इति तैरेव कण्ठरवेणोक्तं मञ्जूषायाम् - **परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता,**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगे**'त्याद्युपन्यस्यद्भिः ।

परं वाक्यपदीये वाग्घरिभिः भर्तृहरिभिः कारिकैका प्रस्तुता, तस्यां त्रय्या वाचः इत्युक्तम् । कारिका चेयमित्थम् - **वैखर्य्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।**
**अनेकतीर्थभेदायास्त्रय्या वाचः परं पदमिति ॥**

इमां कारिकां व्याचक्षाणैः विद्वद्भिः भर्तृहरिसम्मता त्रयी, चतुष्टयी वा वाचः इति विषयेऽत्यन्तं विवादः उपस्थाप्यते । अतस्तद्विषये अस्माभिः कथं वा भाव्यमित्यत्राहं मे विचारं पुरस्करिष्यामि - ततः प्राक् व्याख्याकृतां युक्तयः प्रदर्श्यन्ते ।

**त्रयी वागित्यत्र युक्तयः -**

1. पश्यन्ती एव सूक्ष्मत्वेन परा वाक् । पश्यन्तीमतिक्रान्ता तद्भिन्नरूपा वा सा इति विचारस्तु व्यर्थ एव, सगुण-निर्गुणादिभेदेन परापरभेदेन वा द्विविधतया वर्णितस्यापि ब्रह्मणो यथा एकत्वं न विरुद्धम्, तथा एकैव प्रत्यवमर्शिनी वाक् गुणभूमिमतीत्य कदाचित्पश्यन्तीति, कदाचिच्च परेति सञ्ज्ञयोपवर्ण्यते ।
2. अत एव 'इत्याहुस्ते परं ब्रह्म यदनादि तथाक्षरम् । तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक्' इति शिवदृष्टौ वैयाकरणमतानुवादावसरे पश्यन्त्येव परात्वेनोपवर्णिता ।

3. वाचां त्रित्वे एव मध्यमा वागिति व्यपदेश उपपद्यते ।

भावप्रकाशव्याख्यायां पूर्वम् इदमत्रावधेयम् इति बिन्दुना उपर्युक्तं [illegible] नागोजीभट्टास्तु सिद्धान्तशैवानां मतं, तन्त्रशास्त्रञ्चाश्रित्य वाचश्चतुर्विधत्वमाहुः, तत्तु [illegible] सिद्धान्तानवबोधनिबन्धनमित्युक्तम् । हेतुश्च तत्र हर्यादिभिर्वाचस्त्रित्वस्यैवोक्तत्वात् इत्युपन्यस्तः ।

तत्रैव पुनः स्वयमाशङ्क्योत्तरति - न च चत्वारि वाक्परिमिता इति [illegible] नागोजीभट्टोक्तम् । अत एव च माधवेन ऋग्वेदभाष्ये चत्वारि वाक्परिमिता [illegible] वैखरीमध्यमापश्यन्तीपरारूपाणि दर्शितानि, व्याख्यातं चैवमेवोद्योते इति वाच्यम्, कैयट [illegible] 'तत्र चतुर्णां नामाख्यातोपसर्गनिपाताख्यानां पदजातानामेकैकस्य चतुर्थभागं मनुष्या [illegible] वदन्तीति' व्याख्यातत्वेन माधवादिव्याख्यानस्य तन्त्रशास्त्रवासनामूलकतया वैयाकरणैरनुपादेयत्वात् इति ।

पद्मश्रीपण्डितरघुनाथशर्म्मणा अम्बाकर्त्रीव्याख्याकृताऽपि[1] वाचः त्रयी एव स्वीकृता । [illegible] चोक्तम् - यत्तु क्वचित् परा-पश्यन्ती-मध्यमा-वैखरी इति वाचो भेदचतुष्टयमुक्तम्, तत्पश्यन्त्या एव परापरभेदमाश्रित्य द्रष्टव्यम् इति । तथैव पश्यन्ती तु पराऽपरा चेति द्विविधा [illegible] महाशयस्यापि सम्मतेति स्पष्टं प्रतिभाति । अस्तु, इदानीं चतुष्टयी वागिति संस्तूयते ।

**तत्र चतुष्ट्वे युक्तयः -**

1. 'त्रय्या वाचः परं पदम्' इत्यत्र 'परं' पदेन तुरीया परा वाग् विवक्षिता । न तु उत्कृष्टमिति । यदि तदेव विवक्षितं स्यात् तर्हि वरम् इत्यसन्दिग्धं पदं किं नोक्तम् हरिणा ? किमभिप्रेत्य सांशयिकं 'परम्' इत्यनेकार्थकं पदं विन्यस्तम् ? तस्मिन् तत्प्रयोगे कोऽप्यभिप्रायविशेषः । स तु भवितुमर्हति यदि श्रुतिस्मृतिप्रसिद्धं पराख्यं तुरीयं वच एवेह विवक्ष्येत ।
2. यत्तु वाचस्त्रिविधत्वे पश्यन्त्या एव परापरेति भेदौ, तयोरेका त्वपरा [illegible] समाविष्टक्रमशक्तिरविशुद्धा अविद्ययाऽऽवृता विक्षिप्ता, अन्या तु परा [illegible] विलीनक्रमशक्तिः विशुद्धेत्यभ्युपगम्यते, तदा स्वीकृतमेव वाचश्चतुर्विधत्वम् । [illegible] पश्यन्तीनामव्यपदेशेन स्वतन्त्रपराया अस्वीकारे कः पुरुषार्थः? तस्माद् [illegible] निर्व्याजमङ्गीक्रियतां परा वाग्देवीति ।
3. 'स्वरूपज्योतिरेवान्तः परावागनपायिनी । तस्यां दृष्टस्वरूपायामन्धकारो निवर्तते' इति महाभारतश्लोके कैश्चित् 'परा' इति पाठं विहाय 'सूक्ष्मा' वाग् इति पाठः प्रक्षिप्तः सोऽपार्थकः क्रमविरुद्धश्च । पश्यन्त्याः प्राक् मध्यमा वागेव यदि सूक्ष्मा, तर्हि पश्यन्त्याः का कथा? सा सूक्ष्मतरा । अथानपेक्ष्य तारतम्यं साधारणतया पश्यन्ती सूक्ष्मा इत्युच्यते तदा मध्यमातस्तस्या अव्यावृत्तेः विशेषणकृत्यं न पश्यामः । तर्हि किमिति वाचश्चतुर्विधत्वमपलपितुमेव सूक्ष्मेति प्रक्षिप्यते ? इत्यहो मात्सर्य्यम् ।

4. यत्तु वाचस्त्रिविधत्वे एव मध्यमा इति नाम युज्यते इति केनचिदुच्यते, तन्न युक्तियुक्तम्, सर्वाधिष्ठानभूतां सर्वथा निःस्पन्दां परां शुद्धां विहाय देशभेदोपाधिकल्पितासु स्पन्दमानासु तिसृषु मध्ये वर्त्तमानाया मध्यमात्वव्यपदेशस्य युक्तत्वात् । आदिमध्यान्तत्वव्यवहारस्य ज्येष्ठमध्यमकनिष्ठत्वव्यवहारस्य वा सजातीयापेक्षत्वात् । नहि विजातीयकन्यायाः सत्त्वे पुत्रद्वये ज्येष्ठकनिष्ठयोर्मध्ये जातस्य मध्यमात्वहानिरिति विभाव्यताम् । किञ्च, मूलाधारस्यमूलत्वाच: सत्त्वेऽपि नाभिकण्ठयोर्मध्ये हृदयदेशेऽवस्थानादपि तस्या मध्यमाभिधानमुपपद्यते इति ।

5. यत्तु केचनात्र - 'इत्याहुस्ते परं ब्रह्म यदनादि तथाऽक्षरम् । तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक्' इति शिवदृष्टिवाक्यं प्रमाणत्वेनोदाहृत्य पश्यन्त्येव परावागित्यभिमन्यते, तदसत्, तत्र शब्दब्रह्मणः परापश्यन्त्यादिसकलस्वरूपत्वप्रतिपादने तात्पर्य्यम्, न तु पश्यन्त्याः परारूपत्वबोधने । उद्देश्यविधेयभावेनेह परब्रह्मणः अक्षरशब्दरूपत्वम्, अक्षरशब्दस्य च कार्य्यब्रह्मपश्यन्तीरूपत्वम्, कारणब्रह्मणश्च परारूपत्वं विवक्षितम् । तथाहि - सा इत्यावृत्त्या अन्वेति - तद् अक्षरं शब्दरूपं सा हि पश्यन्ती, सा हि परा वाक् इत्यन्वयेन अक्षरशब्दस्य च परापश्यन्त्युभयरूपत्वप्रतिपादनं सुस्पष्टम्, पश्यन्त्याः परारूपत्वबोधनं तु तात्पर्य्यानाकलनाद् भ्रम एवेति । तस्मान्नायं शिवदृष्टिग्रन्थः पश्यन्त्याः परारूपत्वसाधने प्रतिभूः । प्रत्युत पश्यन्तीतः परायाः पृथङ्निर्देशात् स्वतन्त्ररूपत्वमेवानेन प्रमीयते । अन्यथा तयोरैक्ये घटकलशादिपर्य्यायशब्दवदुभयोः सहप्रयोगस्योद्देश्यविधेयभावबोधनस्य च नितरामयुक्तत्वमेव । तयोः परमार्थतोऽभिन्नरूपत्वेऽपि उपहितानुपहितस्वरूपत्वेन व्यवहारे स्वरूपवैलक्षण्यकृतं वाचश्चतुर्विधत्वं स्फुटम्, अन्यथा परमार्थतः सर्वासामेकरूपत्वेन त्रिविधत्वमपि दुर्निरूपं स्यात् ।

6. वाचश्चतुर्विधत्वात् तासाञ्चैकरूपत्वात् एव प्राह प्रमाणभूत आचार्य्यनन्दिकेश्वरः -

**सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत् ।**
**ज्ञप्तेर्बभूव पश्यन्ती मध्यमा वाक् ततः परम् ॥**
**वाक्ये विशुद्धचक्राख्ये वैखरी सा, मता ततः ।**
**वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते ॥**
**चन्द्रचन्द्रिकयोर्यद्वद् यथा वागर्थयोरपि ॥ इति ।**

अस्यायमर्थः - विवर्त्तकार्य्यात् पूर्वं सर्वमिदं जगत् ज्ञप्तिमात्रम् अधिष्ठानचैतन्यं शब्दब्रह्मरूपं परात्मकं वच एवासीत् । तस्मात् पश्यन्ती सर्वार्थदर्कस्वरूपा बभूव, ततो विवक्षावशादूर्ध्वं समीरिता सूक्ष्मवर्णक्रमेण प्रतिभासमाना मध्यमा वाग् बभूव, तदनन्तरं सैव मध्यमा प्राणवृत्त्या विशुद्धचक्रे मुखस्थे समीरिता सती वर्णरूपेण विवृत्ता वैखरी बभूव । वृत्तिभेदेन तां तामाख्याभेदं च भजमानमपि परात्मकं वचो वस्तुतश्चन्द्रचन्द्रिकयोरिव वागर्थयोरिव च वृत्तिवृत्तिमतोर्भेदाभावात् परमार्थतोऽभिन्नमेव राजते इति ।



Scanned with OKEN Scanner

आनन्दा-सुर्ध्वमायाव्याख्याकृद्भिः पण्डितवेदानन्दझामहोदयैः स्वव्याख्याने भर्तृहरेः सम्मतं वाचश्चतुर्विधत्वं तु श्रुतिषु सुस्पष्टं श्रुतम्, आगमेषु च विश्रुतमित्युक्त्वा नाना प्रमाणानि चतुष्ट्वे प्रतिपादितानि । तथाहि -

प्रथमन्तावन्महाभाष्ये व्याकरणप्रयोजननिरूपणावसरे समुदाहृतऋङ्मन्त्र एव प्रमाणम् - 'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहायां त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति'[2] इति । अयमर्थः - वाचः शब्दस्य परिमितानि स्थानभेदेन स्वरूपतो परा-पश्यन्ती-मध्यमा-वैखरीलक्षणानि सन्ति, तानि सर्वाणि क्रमतश्च विभक्तानि चत्वारि पदानि मनीषिणो वैयाकरणा विदन्ति । तेषु त्रीणि पदानि गुहायाम् बुद्धौ ब्राह्मणा वेदाध्ययनप्रवचनशीला अज्ञाने वा निहितानि अन्तःस्थितानि आवृतानि वा नेङ्गयन्ति व्याकरणप्रदीपं विना बहिर्न प्रकाशन्ते, वाचः तुरीयं चतुर्थभागं वैखर्याख्यं व्यक्तवर्णपदादिरूपं मनुष्या अवैयाकरणाः वदन्ति विदन्ति चेति नागेशानुमतं व्याख्यानम् ।

यद्वा, वाचः परिमितानि चत्वारि पदानि नामाख्यातोपसर्गनिपाताः, प्रत्येकं परा-पश्यन्ती-मध्यमा-वैखरीभेदैश्चतुष्पादाः सन्ति । तानि सर्वाणि मनीषिणः वैयाकरणाः ब्राह्मणा एव विदन्ति । तेषां नामादीनां त्रयो भागाः परादिमध्यमापर्य्यन्ताः बुद्धिगुहायामज्ञानकुहरे वा स्थिता न प्रकाशन्ते, चतुर्णां नामादीनां पदानामेकैकस्य चतुर्थं भागं वैखर्य्याख्यं मनुष्या अवैयाकरणा विदन्ति इति कैयटाशयः ।

तत्र नामाख्यातोपसर्गनिपाताः प्रत्येकं परापश्यन्त्यादिभेदैश्चतुष्पादाः सर्वतन्त्रप्रसिद्धाः । तस्मात् मन्ये चत्वारि पदानि इत्यनेन परापश्यन्त्यादीनि नामाख्यातोपसर्गनिपाताश्च इत्यत्र द्वन्द्वपदोत्तरं समुच्चयार्थश्चकार उपपद्यते । परापश्यन्त्यादीनामसङ्ग्रहे तु निपाताश्च इति द्वन्द्वान्ते चकार-प्रयोगोऽनर्थक एवापद्येत, इत्यवधीयतां सुधीभिः । अत एव सायणेन, माधवेन च प्रमाणभूतेनाचार्य्येण ऋग्वेदभाष्ये मन्त्रमेनं व्याचक्षाणेन चत्वारि पदानि परा-पश्यन्ती-मध्यमा-वैखरीरूपाणि वर्णितानि ।

पण्डितसभापतिशर्मोपाध्यायाः रत्नप्रभाव्याख्याकाराः अपि वैयाकरणसिद्धान्तलघुमञ्जूषायां (150 पृष्ठे) शक्त्याश्रयनिरूपणे[3] (चत्वारि वाक्.) अत्र माधवेन ऋग्वेदभाष्ये चत्वारि पदानीत्यनेन वैखरी, मध्यमा, पश्यन्ती, परारूपाणि दर्शितानि । पतञ्जलिना तु नामाख्यातोपसर्गनिपाताश्चत्वारि इत्युक्तम् । अभियुक्तव्याख्यानादुभयपरकत्वं प्रामाणिकमेव । पतञ्जलिनापि गुहायां त्रीणि निहितानि नेङ्गयन्ति न चेष्टन्ते न निमिषन्तीत्यर्थः[4] इति व्याख्यानं कुर्वता माधवाभिमतं व्याख्यानमपि मन्यत एवेति गम्यते इत्युक्त्वा ऋङ्मन्त्रस्यास्य वाचश्चतुष्ट्वपरत्वमपि समर्थ्यते ।

झामहोदयाः एवं श्रुतिप्रमाणं प्रदर्शयन्तः अन्यान्यपि प्रमाणानि चतुष्ट्वं प्रमाणयितुं प्रदर्शयामासुः - तथाहि, शतपथब्राह्मणेऽपि वाचस्तुरीयभागमभ्युपगच्छन्नाह -

**तदेतत्तुरीयं वाचो निरुक्तं यन्मनुष्या वदन्ति**[5] इति ।

अत्र वैखर्य्याश्चतुर्थभागकथनं वाचः परादिभेदैश्चतुर्विधत्वे सङ्गच्छते ।

सामवेदे उत्तरार्चिके सप्तमप्रपाठके अग्नेः स्तुतिप्रसङ्गे चतुर्धा वागाम्नायते -

**पाहि नो अग्न एकया पाह्युत द्वितीयया ।**
**पाहि गीर्भिस्तिसृभिरूर्जांपते पाहि चतसृभिर्वसो ॥** इति ।

अथर्वणि तु सप्तमे काण्डे चतुर्विधायाः वाचः स्वरूपं सरहस्यं प्रकाश्यते -

**धीती वा ये अनयन् वाचो अग्रं -**
**मनसा वा ये वदन्नृतानि ।**
**तृतीयेन ब्रह्मणा वावृधाना -**
**स्तुरीयेणामन्वत नाम धेनोः ॥**[6] इति ।

अयमर्थः - ये विवक्षवः धीती धीत्या ध्यानात्मकेन परावाग्रूपेण प्रथमेन शब्दब्रह्मणा वाचः अग्रम् पश्यन्त्यादिसकलवाचः कारणम् अनयन् ध्यानविषयं प्रापितवन्तः, ये वा विवक्षवः मनसा मननात्मकेन पश्यन्त्याख्येन द्वितीयेन शब्दब्रह्मणा ऋतानि सत्यानि अखण्डपरापेक्षया ईषदाविर्भूतानि देवताविषयकविचारविषयाणि वाक्यानि अवदन् सामान्यज्ञानविषयत्वं प्रापितवन्तः, ते विवक्षवः तृतीयेन परापश्यन्त्यपेक्षया त्रित्वसङ्ख्यापूरकेण ब्रह्मणा मध्यमाख्येन हृदयस्थेन स्फोटात्मकशब्द- ब्रह्मणा वावृधानाः शब्दवाच्यत्वेन अर्थं पोषयन्तः तुरीयेण चतुर्थेन वैखर्य्यात्मकेन शब्देन ब्रह्मणा धेनोः अर्थप्रकाशकस्य शब्दस्य नाम प्रातिपदिकसञ्ज्ञाम् अमन्वत विदितवन्तः । अनेन बुद्धिमनो- हृदयप्राणरूपावस्थाचतुष्टयेन वाचश्चतुर्विधत्वं निगदव्याख्यातम् ।

**अत्रेदं मे प्रतिभाति -**

1. वैखर्य्या मध्यमायाश्चेत्यादिकारिकाद्वारा वाचो भेदो विवेच्यो नास्ति हरेः, अपितु व्याकरणस्य विषयत्वं कतिविधासु वाक्षु इत्येव । एतस्याः कारिकायाः पूर्वं तथैव प्रकरणस्य सत्त्वात् । सा च कारिका - 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः । अविच्छेदेन शिष्टानामिदं स्मतिनिबन्धनम्'[7] इति । अतएव लघुमञ्जूषायां शक्त्याश्र- यनिरूपणप्रकरणे नागेश आह - अत एव (पराया वर्णादिविशेषरहितत्वेन अव्यक्त- त्वादेव) हरिणा व्याकरणस्य त्रिविधा वाग्विषय इत्युक्तम् इति । वाग्विषयत्वञ्चौवं बोध्यम् - स्वपरोश्रोत्रविषया वैखरी, मध्यमा हृदयदेशस्था पदप्रत्यक्षानुपपत्त्या व्यवहार- कारणम्, पश्यन्ती तु लोकव्यवहारातीता, किन्तु योगिनां तु तत्रापि प्रकृतिप्रत्यय- विभागावगतिरस्ति, परायान्तु नेति त्रय्या इत्युक्तम् ।
   तस्मात् कारिकामिमामाश्रित्य तिस्रः एव वाचः हरिसम्मताः इति केषाञ्चित् कथनं हेयमेव, कारिकायाः वाचो भेदस्य अप्रतिपादकत्वात् ।
2. अनेकतीर्थभेदायाः वाचः त्रय्याः इत्यत्र 'त्रय्याः' इत्यनेन 'चतुर्थ्याः' एव व्यावृत्तिः इष्टा, नो चेत् 'त्रय्याः' इति विशेषणोपादानं व्यर्थं स्यात् । तथाहि 'त्रय्याः' इति उपादानादेव चतुर्थी वागपि अस्तीति व्यज्यते । तस्मात् वाचश्चतुष्ट्वं हरिसम्मतमेव ।



Scanned with OKEN Scanner

3. किञ्च, त्रिगुणामेव वाचां व्याकरणविषयत्वमित्यपि अविचारितरमणीयमेव । तथाहि - किमिदं व्याकरणविषयत्वं नाम ? व्युत्पाद्यत्वेन व्याकरणविषयत्वमभिप्रेतमत्र, उताहो प्रतिपाद्यत्वेन? तत्र न तावदाद्यः, परायाः वाचः अत्यन्तं सूक्ष्मत्वेन प्रकृतिप्रत्ययविभागानर्हं तथा यथा व्याकरणादसंस्कार्यत्वम्, तथैव पश्यन्त्याः अपि असंस्कार्यत्वम् । न हि अत्रापि प्रकृतिप्रत्ययविभागादिद्वारा व्युत्पादने व्याकरणस्य गतिः । यदि च व्याख्यानात्मक-प्रतिपाद्यत्वेन अविषयत्वमभिलषितम्, तदा वदतो व्याघातः । पश्यन्त्या इव व्याख्यानात्मकप्रतिपादनस्य परायाः कृतेऽपि व्याकरणे दृष्टचरत्वात् । अत एव -

प्राप्तरूपविभागाया यो वाचः परमो रसः ।
यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ॥[8]

इति कारिकया हरिणैव व्याकरणस्य आञ्जसमार्गत्वं परायाः कृते व्यवस्थापितम् ।

4. वाचां चतुष्ट्वादेव 'गुहा त्रीणि निहिता' इत्यस्यापि सार्थक्यं जायते, अन्यथा 'चत्वारि वाक्' इत्यस्य नामाख्यातोपसर्गनिपाताः इत्यर्थे क्रियमाणे गुहायां निहितत्वं कथमपि नोपपद्येत ।

5. आचार्यविश्वनाथमिश्रः 'वैयाकरणसम्प्रदाये स्फोटपरम्परा' इति निबन्धे वाचश्चातुर्विध्यं समर्थयमानो ब्रवीति - एतेन व्याकरणस्य त्रिविधा वाग्विषयस्तथा भर्तृहरिः वाचस्त्रैविध्यमेवाङ्गीकुरुते इति निखिलं कथनं पराकृतमेव वेदनीयम् इति ।

6. आधुनिकपाणिनिरूपेण प्रतिष्ठितः आचार्य्यश्रीरामप्रसादत्रिपाठी महोदयोऽपि 'पाणिनीय-व्याकरणे प्रमाणसमीक्षा' इति स्वकीये ग्रन्थे (284 पृष्ठे) कथयति[9] - पराभिधानाया वाचस्त्वनादिनिधनत्वेनैव स्मरणं कृतं श्रीहरिप्रभृतिभिः । यद्यपि श्रीहरिणा पराशब्देन व्यवहारोऽस्याः कृते क्वापि वाक्यपदीये न कृतः, तथापि अत्रातीतविपर्य्यासः केवलामनुपश्यति[10] इत्यत्र केवलामित्यनेन अस्याः परामर्शस्य कृतप्रायत्वात्, अनादिनिधनं ब्रह्म शब्दतत्त्वम् इत्यनेन लक्षणेन अस्या एव लक्षितत्वाच्चेति ।

7. लक्ष्मीटीकाकारः पण्डितसभापतिशर्मोपाध्यायोऽपि प्रयत्नो द्विधा इति प्रतीकमाश्रित्य ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन यत्नेन युक्तो मूलाधारस्थो वायुर्जाठराग्निना प्रेरितः सन् शब्दब्रह्माभिव्यञ्जयति । अभिव्यक्तं शब्दब्रह्म परा वागित्युच्यते । तदुक्तं हरिणा - अनादिनिधनमित्यादि - इति ब्रुवाणः परां वाचं पुरस्करोति ।

तथाहि भर्तृहरिणा परावाक् इत्यानुपूर्वी नोक्ता, तस्मात् न तत्सम्मता सेति कथनं न मे युक्तं प्रतिभाति । 'वाचः परमो रसः'[11] इत्यत्र परमो रसः इत्यनेन, 'केवलामनुपश्यति'[12] इत्यत्र केवलापदेन, 'यद्वाचो रूपमुत्तमम्'[13] इत्यत्र उत्तमरूपपदेन, 'तत्रैव ज्योतिः शुद्धं निवर्त्तते' इत्यत्र ज्योतिः शब्देन, 'परं ब्रह्माधिगम्यते'[14] इत्यत्र परब्रह्मपदेन, 'प्राहुर्महान्तमृषभम्'[15] इत्यत्र ऋषभपदेन

च पराश्च एव भर्तृहरिद्वारा भूयोभूयः कीर्तनात् भर्तृहरिसम्मतं वाक्चातुर्विध्यमिति निःसन्दिग्धं वक्तुं शक्यते ॥

सन्दर्भाः


1. वा.प.का. - 142, प्र.काण्डम् ।
2. ऋक् सं. 1-164-45 ।
3. 150 पृष्ठे ।
4. म.भा. पस्पशा. ।
5. 4-1-3-36 ।
6. 7/1/1 ।
7. वा.प.प्र.का. 143 का. ।
8. वा.प.प्र.का.श्लो. 12 ।
9. 284 पृष्ठे ।
10. वा.प. 1/17 ।
11. वा.प.श्लो. 12 ।
12. वा.प.श्लो. 17 ।
13. श्लो. 18 ।
14. श्लो. 22 ।
15. श्लो. 131 ।



व्याकरणविभागाध्यक्षः,
राष्ट्रियसंस्कृतसंस्थानम्,
क.जे.सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई-७७


★★★



Scanned with OKEN Scanner

# व्याकरणविभागीयराष्ट्रियशोधसङ्गोष्ठ्या विशिष्टानि चित्राणि



















Scanned with OKEN Scanner

विक्रमाब्दः 2074 खीस्ताब्दः 2017 ISSN No. 2457-0729

प्रथमोऽङ्कः

# वाग्वै ब्रह्म

(सन्दर्भिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका)

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनी या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु।।

व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई-77

Scanned with OKEN Scanner

विक्रमाब्दः 2074 खीस्ताब्दः 2017 ISSN No. 2457-0729
प्रथमोऽङ्कः

# वाग्वै ब्रह्म

(सन्दर्भिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका)

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनी या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु।।

व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई-77

Scanned with OKEN Scanner

RNI No. MAHSAN/2017/73496

ISSN No. 2457-0729

मुद्रक: प्रो. प्रकाशचन्द्र:

प्रकाशक: प्रो. प्रकाशचन्द्र:

स्वामिनः नाम राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:)
(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क. जे. सोमैया संस्कृतविद्यापीठम्,
विद्याविहार: (पूर्व:), मुम्बई, महाराष्ट्रम् - 400 077

मुद्रणम् वन्दना आर्टस्, बी-56, भूमितलम् स्टेशन प्लाझा, स्टेशन रोड,
भाण्डुपम् (पश्चिमम्), मुम्बई - 400 078, महाराष्ट्रम्, भारतम् ।

प्रकाशनम् राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:)
(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क. जे. सोमैया संस्कृतविद्यापीठम्,
विद्याविहार: (पूर्व:), मुम्बई, महाराष्ट्रम् - 400 077

अङ्क: प्रथम:

अनुवृत्तय: 100

प्रकाशनसमय: दिसम्बर, 2017



संपादक : **प्रो. प्रकाशचन्द्र:**

सम्पादकमण्डलम्

**प्रो. प्रकाशचन्द्र:**, विभागाध्यक्ष:, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

**प्रो. बोधकुमारझा:**, आचार्य्य:, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

**श्रीसुभाषचन्द्रमीणा**, सहायकाचार्य्य, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

**डॉ. माधवदत्तपाण्डेय:**, संविदाध्यापक:, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

**डॉ. नवीनकुमारमिश्र:**, संविदाध्यापक:, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

**सुश्रीविदुषीबोल्ला**, शोधप्रज्ञा, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

पुनर्वीक्षकमण्डलम्

- **प्रो. (श्रीमती) अर्चना दूबे**, श्रीसोमनाथसंस्कृतविश्वविद्यालय:, गुजरातम् ।
- **डॉ. दिलीपकुमारझा:**, कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालय:, दरभंगा, बिहार:, ।
- **डॉ. अशोकचन्द्रगौड:**, राष्ट्रियसंस्कृतसंस्थानम्, गरलीपरिसर:, हिमाचलप्रदेश: ।
- **डॉ. प्रियव्रतमिश्र:**, श्रीरामसुन्दरविश्वविद्याप्रतिष्टानम्, रमौली, दरभंगा, बिहार: ।

मूल्याङ्कनकर्तृमण्डलम्

- **प्रो. मदनमोहनझा:**, आचार्य्य:, शिक्षाशास्त्रविभाग:, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- **डॉ. देवदत्तसरोदे**, सहायकाचार्य्य:, शिक्षाशास्त्रविभाग:, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- **डॉ. रा. गा. मुरलीकृष्णा:**, सहायकाचार्य्य:, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।
- **डॉ. मधुकेश्वरभट्ट:**, सहायकाचार्य्य:, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।



Printed by Prof. Prakash Chandra, Published by Prof. Prakash Chandra on behalf of Rashtriya Sanskrit Sansthan (Deemed University), Under MHRD, Govt. of India, K. J. Somaiya Sanskrit Vidyapeetham, Vidyavihar (E), Mumbai, Mahrashtra - 400 077 and Printed at Vandana Arts B-56, Ground Floor, Station Plaza, Station Road, Bhandup (West), Mumbai - 400 078, Maharashtra, India and Published at Rashtriya Sanskrit Sansthan (Deemed University), Under MHRD, Govt. of India, K. J. Somaiya Sanskrit Vidyapeetham, Vidyavihar (E), Mumbai, Maharashtra - 400 077. Editor Prof. Prakash Chandra.


Scanned with OKEN Scanner

प्रो. सुदेश कुमार शर्मा
प्राचार्य,
राष्ट्रिय संस्कृत संस्थान
(मानित विश्वविद्यालय)
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
क. जे. सोमैया संस्कृत विद्यापीठ,
विद्याविहार, मुम्बई - ४०००७७

Prof. Sudesh Kumar Sharma
Principal
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
K. J. Somaiya Sanskrit Vidyapeeth
Vidyavihar, Mumbai - 400 077


RSKS/Mum./2017-18/

Date - 22.12.2017

# शिवसङ्कल्पमस्तु

'महाभाष्यान्तं व्याकरणमि'ति शाब्दिकप्रेक्षावतां काचन धारणा । तयैव धारणया धीरधिषणेन विद्यापीठस्यास्य व्याकरणविभागेन दिवसद्वयव्यापिनीं राष्ट्रियसङ्गोष्ठीं समायोज्य तत्र कानिचन पाणिनीयसूत्राणि पातञ्जलमहाभाष्यात्मकेन मन्थानेन निर्मथ्य तदुत्थशब्दतत्त्वं कतिपयेषु शोधनिबन्धेषु समावेश्य 'वाग्वै ब्रह्म' इत्याख्यायां मूल्याङ्कितराष्ट्रियशोधपत्रिकायामुपनिबध्य प्राकाश्यमानीयत इति महान् सन्तोषस्य विषयः । विशेषतः शब्दशास्त्रसौरभलोलुपानां शाब्दिक-मधुपानां कृते कस्मैचिदुत्सवाय स्ववसरं कल्पते वृत्तमेतत् ।

पत्रिकैषा शाब्दिकेभ्यः शिवाय भूयात् । शोधार्थिभ्यश्च मङ्गलाय वर्तिषीष्ट । कृतश्रमेभ्यः सम्पादकेभ्यः, प्रदत्तशोधलेखेभ्यो लेखकेभ्यश्च यशो वर्धिषीष्टेति सदाशिवं परमेश्वरं प्रार्थये ।

(प्रो. सुदेशकुमारशर्म्मा)
प्राचार्य्यः

Scanned with OKEN Scanner

# सम्पादकीयम्

कौमुदी यदि हृद्यायाति वृथा भाष्ये परिश्रमः ।
कौमुदी यदि नायाति वृथा भाष्ये परिश्रमः ॥

इत्यभ्युपगच्छतां शाब्दिकनव्यानां सम्मुखं व्याकरणमहाभाष्यस्य तृतीयं चतुर्थं पञ्चमञ्चाह्निकमुररीकृत्य राष्ट्रियायां शोधसङ्गोष्ठ्यां विमृश्य, [illegible] एकविंशतिसंख्यकेषु शोधनिबन्धेषु समवतार्य 'वाग्वै ब्रह्म' इत्यभिधेयया मूल्याङ्कितराष्ट्रियशोधपत्रिकया शब्दशास्त्रं समुपस्थापयतामस्माकं दृष्टिरियमेव ते पुनरेकवारं स्वात्मानमवलोकयन्त्विति । महाभाष्यं शब्दगभीरं रत्नाकरत्वं धत्ते यत्र भर्तृहरिकैयटदीक्षितनागेशादयो धीवराः स्वस्वसामर्थ्यानुगुणं रत्नानि बहूनि यद्यपि समुद्दधुः, तथापि वर्तत इदानीमपि महानवकाशः शोद्धुमिति नो दृढीयान् विश्वासः।

अत्र सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतीनामाचार्य्यप्रवराणामर्कनाथचौधरीवर्य्याणां शोधलेखः सौभाग्यादुपलब्धोऽपि प्रकाशित इति पत्रिकाया अस्या महते गौरवाय । अथ च सङ्गोष्ठ्यां समुपस्थापितशोधलेखानामाचार्य्याणां, शोधार्थिनां, व्याकरणशास्त्रारण्यविहरणनिपुणानां शाब्दिकानां शोधनिबन्धा अपि शब्दशास्त्रशेमुषीं समेधयितुं सामर्थ्यं दधतीति भावयामः ।

आशास्महे, शोधपत्रिकेयं महाभाष्यस्यानितरसाधारणमहत्त्वमद्यापि शतशः समुपलब्धेषु व्याख्यानग्रन्थेषु सत्स्वपि ख्यापयितुम्, गवेषणदुर्गममार्गगमनसामर्थ्यं निधापयितुम्, व्याकरण-शास्त्रीयपरिशीलनबुद्धिं विशदीकर्तुञ्च किमपि नूनमुपकुर्य्यादिति ।

सम्पादकपक्षतः

Scanned with OKEN Scanner

# अनुक्रमणिका


| क्र. सं. | विषयः | लेखकः | पृष्ठाङ्काः |
|---|---|---|---|
| 1 | [illegible], [illegible] वा ? अथवा [illegible] ? | प्रो. [illegible] | 01 |
| 2 | 'वृद्धिरादैच्' इतिसूत्रविमर्शः | प्रो. [illegible] | 04 |
| 3 | '[illegible]' इति सूत्र[illegible]विमर्शः | प्रो. [illegible] | 13 |
| 4 | [illegible]विमर्शः | डॉ. [illegible] | 24 |
| 5 | व्याकरणमहाभाष्यदृष्ट्या 'वृद्धिरादैच्' सूत्रविमर्शः | डॉ. अशोकचन्द्रगौडशास्त्री | 38 |
| 6 | महाभाष्यस्य 'हलोऽनन्तराः संयोगः' इति सूत्रविचारः | प. [illegible] | 43 |
| 7 | प्रगृह्यसंज्ञासूत्रविमर्शः | डॉ. [illegible]पाण्डेयः | 46 |
| 8 | भाष्योक्तदिशा [illegible] सूत्रविचारः | डॉ. [illegible]मिश्रः | 56 |
| 9 | भाष्यानुसारी 'वृद्धिरादैच्' सूत्रविमर्शः | सुश्री[illegible] | 65 |
| 10 | भाषाविज्ञानदृष्ट्या प्रयत्नविमर्शः | श्रीवेमटेश्वरः | 74 |
| 11 | 'इको गुणवृद्धी' इत्यत्र इग्ग्रहणविचारः | श्रीमती[illegible]पाण्डेयः | 88 |
| 12 | महाभाष्यदृशा 'इको गुणवृद्धी' सूत्रविमर्शः | श्रीसत्यराजशर्मा | 95 |
| 13 | 'तुल्यास्यप्रयत्नं सवर्णम्' इत्यस्मिन् सूत्रे सावर्ण्यविचारः | आ. पद्मराजशर्मा | 101 |
| 14 | महाभाष्ये शाबरभाष्ये च कृतः संज्ञाविचारः | श्रीधर अवधूतलोहोकरे | 106 |
| 15 | बाह्यप्रयत्नविवेकः | कु. सुधा चन्द्रकान्तदाते | 110 |
| 16 | महाभाष्यदृशा 'इको गुणवृद्धी' इति सूत्रविमर्श | श्रीसर्वेशकुमारतिवारी | 113 |
| 17 | 'न धातुलोप आर्धधातुके' इति सूत्रभाष्यविमर्शः | सुश्रीबिन्दुहासिनीमिश्रः | 117 |
| 18 | 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रभाष्यविमर्शः | सुश्री आशा छेडा | 119 |
| 19 | 'ष्णान्ता षट्' इति सूत्रभाष्यविमर्शः | श्रीश्यामकिशोरपाण्डेयः | 123 |
| 20 | 'बहुगणवतुडति संख्या' इति सूत्रभाष्यविमर्शः | श्रीचन्द्रमापीडयालः | 126 |
| 21 | 'निपात एकाजनाङ्' इति सूत्रभाष्यविमर्शः | श्रीउमेशत्रिवेदी | 130 |


Scanned with OKEN Scanner

# महाभाष्यस्थः 'हलोऽनन्तराः संयोगः' इति सूत्रविचारः

✍ प. सुभाषचन्द्रमीणा

योगो नाम सम्बन्धः । संयोगः समान सम्बन्धः । संयोगसंज्ञा सूत्रं पाणिनिविरचिता-ष्टाध्यायीस्थप्रथमाध्याये प्रथमपादे सप्तसंख्याकत्वेन महामुनिना भगवता स्वीकृतम् । इदमेवसूत्रं पतञ्जलिविरचितमहाभाष्ये चतुर्थाह्निके सम्यक् सविस्तृतं विवृतम् । तदेव अहं तेषां विचाराणां काञ्चन बिन्दून् प्रस्तौमि - अस्मिन् सूत्रे त्रीणि पदानि सन्ति - हलः, अनन्तराः, संयोगः इति । विद्यतेऽन्तरं येषां ते अनन्तराः, एकस्मिन् पदे अनेकहल्वर्णानाम् उत एकाधिकहल्वर्णानां मेलनं सम्मेलनं वा यत्र परिलक्ष्यते तत्र संयोगसंज्ञा शाब्दिकः परिगीयते । यथा - इन्द्रः, राष्ट्रः, क्षत्रिय इत्यादिषु पदेषु अचा रहित हल् वर्णानां एकाधिकानां मेलनं वर्तते, अतः इन्द्र इत्यत्र न् द् र् वर्णानां संयोगसंज्ञा, राष्ट्रम् इत्यत्र ष् त् र् वर्णानां संयोगसंज्ञा, क्षत्रिय क् ष् र् इत्येषां संयोगसंज्ञा । एवं रूपेण वाङ्मये विद्यमानानां पदानां पदेषु वा संयोगसंज्ञा वर्णत्रयस्य संयोगसंज्ञा अथवा पृथक्त्वेन संयोगसंज्ञा एकाधिकानां संज्ञा इति चेत् उच्यते । भिन्नजातीयैरज्भिरव्यवहिताः श्लिष्टोच्चारिता हलः संयोगसंज्ञा भवन्ति । समुदायः संज्ञी । जातौ चेदं बहुवचनम् । तेन द्वयोर् बहूनां च संयोगसंज्ञा सिद्धा भवति । यथा अग्निः इत्यत्र ग्नौ, अश्व इत्यत्र श्वा, कर्ण इत्यत्र र्णौ, इन्द्रः, चन्द्रः, मन्द्रः इत्यत्र नदराः । उष्ट्रः राष्ट्रम्, भ्राष्ट्रम् इत्यत्र षटराः । हल इति किम्? तितौच्छत्रम् संयोगान्तस्य लोपः ।[4] इति लोपः स्यात् । संयोगप्रदेशाः 'संयोगान्तस्य लोपः' इत्येवम् आदयः । 'अन्तर' शब्दोऽत्र व्यवधाने वर्तते । व्यवधानं च विजातीयेनैव । अविद्यमानमन्तरं व्यवधानं येषामिति विग्रहः ।

'नञोऽस्त्यर्थानां'मिति विद्यमानपदस्य लोपः तदाह अज्भिरित्यादिना । तत्र हलौ च हलश्च हल इत्येकशेषः । तेन द्वयोरपि संयोगसंज्ञा लभ्यते । ततश्च शिक्षेत्यत्र 'गुरोश्च' हलः इत्यप्रत्ययः सिद्ध्यति । अत्र च समुदायस्यैव संयोगसंज्ञा, महासंज्ञाकरणात् व्याख्यानाच्च । न तु प्रत्येकम् । तथा सति 'सृदृषत्प्रासादः' इत्यत्र पकारसन्निधौ तकारस्य संयोगत्वापत्तौ संयोगान्तलोपापत्तेः । यत्र तु बहवो हलः श्लिष्टास्तत्रापि द्वयोर्द्वयोः संयोगसंज्ञा न तु बहूनामेवैति शब्देन्दुशेखरं स्पष्टम् । गुणवृद्ध्याद्याः संज्ञाः यथा प्रत्येकं वर्णानां, तद्वत् प्रत्येकं हल्वर्णानां संयोगसंज्ञा उत समुदायस्य इति सन्देहः । अत्र समाधानं गर्गाः शतं दण्डयन्ताम् अर्थिनश्च राजानो हिरण्येन भवन्ति इति

समुदाये वाक्यपरिसमाप्तिन्यायेन संयोगसंज्ञा न तु प्रत्येकं हलः समुदासस्यैव । अपि च 'ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम्' इति ब्राह्मणभोजनन्यायः अत्र न प्रवर्तते 'अन्तरा' इति हलः विशेषणात् । अतः सृदृषद्भाति इत्यत्र 'संयोगान्तस्य लोपः' इति सूत्रेण लोपः न प्रवर्तते । संयुज्यन्ते वर्णाः यत्र असौ संयोग इति अन्वर्थसंज्ञाबलेन महासंज्ञाकरणाच्च संयोगसंज्ञा न प्रत्येकं किन्तु समुदायस्यैव कैयटाभिमतम् ।

तत्र नागेशमहाशयानां विचारः - संयोग संज्ञा अन्वर्थसंज्ञाबलेन प्रत्येकं संयोगसंज्ञा भवितुं नार्हति इति यदुक्तं तन्न । यतो हि घटपादौ संयुज्येते यत्र इत्यत्र संयुज्यमानपदातिरिक्तान्यपदार्थस्य प्रतीतिः । तद्वत् संयुज्यन्ते यत्र इत्यत्रापि संयुज्यमानातिरिक्तपदस्य वाक्यस्य वा प्रतीत्या तस्य संयोगसंज्ञा स्यात् । व्रीहयः संयुज्यन्ते यत्र राशौ इति यथा व्रीहीणां ग्रहणं भवति तद्वदत्रापि इति चेत् । तत्र व्यपदेशिवद्भावेन भेदप्रतीतिः । एवं च यत्रातिरिक्तान्यपदार्थस्य असम्भवः तत्र व्यपदेशिद्भावेन अदोषः । द्वयोः संयोगसंज्ञा उत बहूनाम् 'हलः' इति बहुवचननिर्देशात् बहूनां हलां संयोगसंज्ञा स्यात् न तु द्वयोः । तदा शिक्षधातोः 'गुरोश्च हलः' इति सूत्रेण अप्रत्ययाभावे 'शिक्षा' इति रूपं न सिध्येत् इति चेत् कौस्तुभकारः - हलः इति । 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्[6]' इति सूत्रेण जातौ बहुवचनम् अतः द्वयोरपि संयोगसंज्ञा तेन 'शिक्षा' इति रूपं च सिध्यति । हलः इति जातौ बहुवचनमिति वक्तुं न शक्यते यतो हि हल्शब्दरूपसंज्ञाशब्दत्वेन जातिवाचित्वाभावात् । हलः इति बहुवचनं सौत्रम् अथवा हलौ च हलश्च 'हलः' इति इत्येकशेषः । अत्र सन्देहः एकशेषः द्वन्द्वापवादः । द्वन्द्वसमासस्तु समानविभक्तावेव भवति । अतः अत्र कथमेकशेषः?

समाधानमत्र - एकशेषः समानविभक्तित्वं नापेक्षितमित्यत्र स्वरितात् संहितायामनुदात्तानाम् इति सूत्रे अनुदात्तस्य च अनुदात्तयोश्च अनुदात्तानाञ्च अनुदात्तानाम् इति भाष्यकारणाम् एकशेषनिर्देशोऽयम् इति वचनं प्रमाणम् अतः एकशेषे समानविभक्तिर्नापेक्ष्यते । तेन द्वयोरपि संयोगसंज्ञा सिध्यति । यत्र बहवः हलः संश्लिष्टाः तत्र द्वयोर्बहूनां वा अविशेषेण इति कैयटः । नागेशोपाध्यायस्तु यत्र बहवः संश्लिष्टाः तत्रापि द्वयोर्द्वयोरेव संयोगसंज्ञा न बहूनामित्याशेते । 'स्कोः संयोगाद्योरन्ते च[7]' इति सूत्रे झलि परे संयोगादिसकारककारयोः लोपविधानात् । तथा च वव्रष्ठ इत्यत्र 'वव्रश च थ' इत्यवस्थायां श्चुत्वस्यासिद्धत्वात् शकारचकारयोः संयोगसंज्ञायां तयोः आदिसकारस्य लोपो भवति चकारस्य अल्परत्वमाश्रित्य । यदि बहूनां हलां संयोगसंज्ञा तदा शकारचकारथकाराणां संयोगसंज्ञायां सत्यां झल्परकत्वाभावात् शकारस्य लोपो न स्यात् । अतः बहूनां संयोगसंज्ञा चिन्त्या प्रयोजनाभावात् । यत्र दोषाः प्रवर्तन्ते तत्र भाष्यकारैः दोषाणां

...। कौमुदीकारस्तावत् अभिधारित्यत्र 'चोः कुः[8]' इत्यनेन सूत्रेण कुत्वं प्राप्नोति, यतो भाष्यकारैरपि 'हयवरट्' सूत्रे भाष्ये अचोऽक्षु इति प्रयोगो दर्शितः । अतः स्वरैरव्यवहिता हलः ... प्रत्यपादयत ।

...विचारः

महाभाष्ये तावत् अनन्तरशब्दस्य अविद्यमानम् अन्तरं येषामिति, अविद्यमाना अन्तरा इति ... विग्रहं प्रदर्श्य अन्तरं कालस्य अन्तरा आधेयस्य वर्णस्य इति । तथा सति अवग्रहे ... संयोगसंज्ञा स्यात् इति सन्देहमुद्भाव्य नैव दोषो न प्रयोजनम् इत्युक्त्वा विग्रहद्वये दोषाभावः प्रदर्शितः एवं संयोगसंज्ञायां सहग्रहणं कर्त्तव्यमन्यथा एकैकस्य संयोगसंज्ञा स्यात् । तदा 'निर्यायात्' इत्यत्र 'वान्यस्यसंयोगादेः[5]' इति सूत्रेण एत्वं प्रवर्तेत इति दोष उदभावि । ततः सहग्रहणं नैव कर्तव्यम् इति उक्त्वा संयोगौ आदिः यस्य सः संयोगादिः तस्य संयोगादेः इति विग्रहं प्रदर्श्य सहग्रहणं प्रत्याख्यातम् । एवमेव बहूनां संयोगासंज्ञायां 'निर्ग्लेयात्' इत्यत्र एत्वं न प्रवर्तेत यदि द्वयोः संयोगसंज्ञा । इन्द्रिदिधिषति इत्यत्र नन्द्राः सयोगादयः इति सूत्रेण द्वित्वनिषेधः न स्यात् इति प्रतिपाद्य ततः द्वयोर्वा बहूनां संयोगसंज्ञायां कोऽपि न दोषः इत्यवादि भाष्यकारैः इति उक्त्वा विरमामि ।

सन्दर्भाः -

1. पा. अष्टाध्यायी 1/1/7 ।
2. महाभाष्ये चतुर्थाह्निके ।
3. वैयाकरणसिद्धान्तकौमुदी (संज्ञाप्रकरणम्) पृ. सं. 58 ।
4. पा. अष्टाध्यायी 8/2/23 ।
5. पा. अष्टाध्यायी 8/2/29 ।
6. पा. सू. 6/4/68 ।
7. वैयाकरणसिद्धान्तकौमुदी (हलन्तपुल्लिङ्गप्रकरणम्), पृ. सं. 453 ।
8. तत्त्वबोधिनी, पृ. सं. 39-40 ।
9. लघुसिद्धान्तकौमुदी (भ्वादिप्रकरणम्), पृ. सं. 333 ।

सहायकाचार्यः (व्याकरणविभागः)
राष्ट्रियसंस्कृतसंस्थानम्
क. जे. सोमैया संस्कृतविद्यापीठम्विद्याविहारः, मुम्बई



Scanned with OKEN Scanner



Scanned with OKEN Scanner

विक्रमाब्दः - 2075 खीस्ताब्दः - 2018 ISSN NO. 2457-0729
तृतीयोऽङ्कः

# वाग्वै ब्रह्म

सन्दर्भिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्त्रिका

Peer Reviewed Research Journal

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनीं या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या ।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु ॥

व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)
क०जे०सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई – 77

Scanned with OKEN Scanner

RNI No. MAHSAN/2017/73496
ISSN No. 2457-0729
मुद्रकः प्रो. बोधकुमारझाः
प्रकाशकः प्रो. बोधकुमारझाः
स्वामिनो नाम राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क. जे. सोमैया संस्कृतविद्यापीठम्,
विद्याविहारः (पूर्वः), मुम्बई, महाराष्ट्रम् - 400 077
मुद्रणम् वन्दना आर्टस्, बी-56, भूमितलम् स्टेशन प्लाझा, स्टेशन रोड,
भाण्डुपम् (पश्चिमम्), मुम्बई - 400 078, महाराष्ट्रम्, भारतम् ।
प्रकाशनम् राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क. जे. सोमैया संस्कृतविद्यापीठम्,
विद्याविहारः (पूर्वः), मुम्बई, महाराष्ट्रम् - 400 077
अङ्कः तृतीयः
अनुवृत्तयः 100
प्रकाशनसमयः दिसम्बर, 2018
संरक्षकः **प्रो. सुदेशकुमारशर्म्मा, प्राचार्य्यः,**
**रा. सं. सं., क. जे. सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई ।**
सम्पादकः **प्रो. बोधकुमारझाः**
सम्पादकमण्डलम्
**प्रो. बोधकुमारझाः**, आचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**डॉ.सुभाषचन्द्रमीणा**, सहायकाचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**डॉ. माधवदत्तपाण्डेयः**, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**डॉ. नवीनकुमारमिश्रः**, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**सुश्रीविदुषीबोल्ला**, शोधप्रज्ञा, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

पुनर्वीक्षकमण्डलम्

- **प्रो. दिलीपकुमारझाः,**
  कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः,
  दरभंगा, बिहारः, ।
- **प्रो. (श्रीमती) अर्चना दूबे,**
  श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातम् ।
- **प्रो. अशोकचन्द्रगौडः,**
  आचार्य्यचरः राष्ट्रियसंस्कृतसंस्थानम्, गरलीपरिसरः,
  हिमाचलप्रदेशः ।
- **डॉ. प्रियव्रतमिश्रः,**
  श्रीरामसुन्दरविश्वविद्याप्रतिष्ठानम्,
  रमौली, दरभंगा, बिहारः ।

मूल्याङ्कनकर्तृमण्डलम्

- **प्रो. मदनमोहनझाः,** आचार्य्यः, शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, श्रीरणवीरपरिसरः, जम्मूः ।
- **डॉ. देवदत्तसरोदे,** सहायकाचार्य्यः, शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- **डॉ. रा. गा. मुरलीकृष्णः,** सहायकाचार्य्यः,
  राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।
- **डॉ. मधुकेश्वरभट्टः,** सहायकाचार्य्यः,
  राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।

Printed by Prof. Bodh Kumar Jha, Published by Prof. Bodh Kumar Jha on behalf of Rashtriya Sanskrit Sansthan (Deemed University), Under MHRD, Govt. of India, K. J. Somaiya Sanskrit Vidyapeetham, Vidyavihar (E), Mumbai, Mahrashtra - 400 077 and Printed at Vandana Arts B-56, Ground Floor, Station Plaza, Station Road, Bhandup (West), Mumbai - 400 078, Maharashtra, India and Published at Rashtriya Sanskrit Sansthan (Deemed University), Under MHRD, Govt. of India, K. J. Somaiya Sanskrit Vidyapeetham, Vidyavihar (E), Mumbai, Maharashtra - 400 077, Editor Prof. Bodh Kumar Jha

[illegible]तीपरम्पराग्रणीभ्यः शाब्दिकधाराधराधरेभ्यो विविधशास्त्रपण्डितेभ्यो वाराणसेय-
[illegible]जलपानपवित्रेभ्यो राष्ट्रियसंस्कृतसंस्थानश्रीसदाशिवपरिसरपुर्य्यां प्रारब्ध-
[illegible]भ्यो मुम्बादेवीआदर्शसंस्कृतमहाविद्यालये प्राचार्य्यपदं सुशोभित-
[illegible]ष्ट्रियसंस्कृतसंस्थानस्य क. जे. सोमैयासंस्कृतविद्यापीठमुम्बई-
[illegible]रणविभागे नैकवर्षाणि शास्त्रचूडामणिरूपेण कृतयोगदानेभ्यः
'अतिदेशसूत्रविमर्शः' इति नामधेयपुस्तकप्रणेतृभ्यः
शिष्यवत्सलेभ्यो
आचार्य्यरामरूपमिश्रशर्म्मभ्यः




राष्ट्रियसंस्कृतसंस्थानस्य
क. जे. सोमैयासंस्कृतविद्यापीठस्य
व्याकरणविभागेन विद्यापीठपरिवारेण
चैषमो दिवङ्गतेभ्यो विद्वद्वरेण्येभ्यः सप्रश्रयं
साश्रु श्रद्धाञ्जलिकुसुमानि विभागीयपत्रिकामयानि
समर्प्यन्ते, संस्मर्यन्ते चास्मिन्नवसरे स्मितमुखाः पण्डितप्रवराः ॥

# शोधपत्रानुक्रमणिका


| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | भर्तृहरेः वाचां त्रयीत्वं वा, चतुष्टयीत्वं वा । | प्रो. बोधकुमारझाः | 1 |
| 2. | भर्तृहरिमते शब्दवैशिष्ट्यविमर्शः । | प्रो. अशोचन्द्रगौडशास्त्री | 8 |
| 3. | वाक्यपदीयब्रह्मकाण्डस्थविषयविमर्शः । | डॉ. राजधरमिश्रः | 15 |
| 4. | जगतः शब्दविवर्तत्वविचारः । | डॉ. देवदत्तः सरोदे | 20 |
| 5. | तुरीयवागुत्पत्तिविमर्शः - वाक्यपदीयसन्दर्भे । | डॉ. प्रियव्रतमिश्रः | 27 |
| 6. | भावविकारसन्दर्भे भावपदार्थः । | डॉ. दीपेशविनोदकतिरा | 33 |
| 7. | वाक्यपदीयस्य ब्रह्मकाण्डे जगतः शब्दपरिणामत्वम् । | डॉ. शरदचन्द्रसाहुः | 39 |
| 8. | Phonetics and Phonology : An Historical View. | Dr. Shweta Sood | 48 |
| 9. | शास्त्रेषु नञर्थविमर्शः । | डॉ. सन्तोषकुमारझाः | 55 |
| 10. | वाक्यपदीये शब्दब्रह्मणः स्वरूपम् । | श्रीसत्यराजरेग्मी | 60 |
| 11. | 'इष्यते पुत्रः' इत्यत्र क्यजभावस्य रहस्यम् । | ब्र. अजयः | 70 |
| 12. | उदात्तादि स्वरों का स्वरूप विवेचन । | आचार्य उदयन मीमांसक | 74 |
| 13. | भर्तृहरिदृशा अपभ्रंशशब्दविमर्शः । | सुश्रीविदुषीबोल्ला | 93 |
| 14. | वाक्यपदीयस्फोटविमर्शः । | डॉ. सुभाषचन्द्रमीणा | 99 |
| 15. | आगमप्रामाण्यविचारः । | डॉ. नवीनकुमारमिश्रः | 105 |
| 16. | शब्दार्थसम्बन्धनिरूपणम् । | डॉ. माधवदत्तपाण्डेयः | 111 |
| 17. | वाक्यपदीय-ब्रह्मकाण्ड में उपमा एवं उदाहरण का अन्वेषण । | डॉ. (श्रीमती)गीता दुबे | 119 |
| 18. | वाक्यपदीयब्रह्मकाण्डस्थविषयविमर्शः । | सौ. मैत्रेयी सुयोगपटवर्धन | 126 |
| 19. | वाक्यपदीये शब्दतत्त्वम् | श्रीरूपेशताटे | 132 |


Scanned with OKEN Scanner

# वाक्यपदीये स्फोटविमर्शः

डॉ. सुभाषचन्द्र मीणा

(स्फोटसिद्धान्तो हि शाब्दिकानां दार्शनिकचिन्तनस्य भूमिः । पत्रप्रस्तोता विषयान् संक्षिप्य तत्सिद्धान्तसम्बद्धान् विषयान् समुपस्थापयति । तत्र वेदादीनां प्रामाण्यमपि निरूप्य स्फोटस्य भेदान्, वाक्स्फोटस्य मुख्यत्वम्, ध्वनेः स्वरूपम्, शब्दनित्यत्ववादादिकं च प्रस्तौति । - स.)

स्फुट्यन्ते, अभिव्यज्यन्ते वर्णा अनेनेति स्फोटः, फुटति अभिव्यक्तीभवति अर्थः अस्मादिति वा स्फोटः ।




अर्थक्रियासु वाक् सर्वा समीहयति देहिनः ।
यदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥[1]
न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥[2]

अर्थं बुद्ध्वा शब्दरचनेति वक्ता अर्थज्ञानपूर्वकं श्रोतुः तद्बोधाय शब्दप्रयोगं करोति तदर्थं विदित्वा श्रोतुः प्रवृत्तिः निवृत्तिर्वा भवति । एवञ्च पदज्ञानं, पदार्थबोधः, ततः पदार्थसंसर्गात्मकवाक्यार्थबोधः इति क्रमोऽनुभवसिद्धः । पदार्थानां परस्परसंसर्गात्मकवाक्यार्था एव शाब्दबोध इत्युच्यते । अपदं न प्रयुञ्जीतेति वचनात् सुबन्तस्य तिङन्तस्य अर्थात् परिष्ठितस्यैव पदत्वव्यवहारः । यद्यपि शक्तं पदमिति प्रकृत्यादीनामपि पदत्वेन व्यवहारः नव्यनैयायिकैः क्रियते तथापि न्यायदर्शने गौतमः सुबन्ततिङन्तयोः पदत्वमन्वाचष्टे । पदज्ञानपूर्वकपदार्थज्ञानमात्रेण निराकाङ्क्षत्वभावात् पदसमुदायात्मकं वाक्यमपेक्ष्यते । न्यायभाष्यकारः वात्स्यायनः वदति पदसमूहो वाक्यमर्थ-

समाप्तौ इति । सुबन्ततिङन्तपदसमुदायात्मकः अर्थसमाप्तौ समर्थ इत्यर्थः । पदसमूहो नाम सुबन्तसमुदायः तिङन्तसमुदायः, सुबन्ततिङन्तसमुदायश्च । यथा चैत्रेण गन्तव्यम्, पचति भवति, चैत्रौ गच्छतः ।

शब्दनित्यतावादिनः वैयाकरणाः । नित्यस्यैव शब्दस्य वाचकत्वमिच्छन्ति । तस्य स्फोट इति व्यवहारः । वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदवाक्यस्फोटौ, वर्णपदवाक्यभेदेन त्रयः जातिस्फोटा इति अष्टौ पक्षाः सिद्धान्तिताः । तत्र वाक्यस्फोटो नाम वाक्यं वाचकमिति मुख्यसिद्धान्तः । अत एवोक्तं न्यायभाष्यकृता – 'पदसमूहो वाक्यमर्थसमाप्तौ' इति वाक्यस्य मुख्यत्वम् । वाक्यस्फोटात्मकवाक्यस्याखण्डस्य मुख्यत्वेऽपि प्रागुक्तनिर्वाहाय पदवर्णस्फोटकल्पना कृतेति बोध्यम् । वाक्यकल्पितपदतदेकदेशयोर्मध्ये वर्णस्फोटः शास्त्रप्रक्रियानिर्वाहकः । वर्णपदं पदैकदेशपरम् । प्रकृतिः प्रत्ययश्च ।

एवं वाक्यस्फोटात्कस्य वाक्यस्य मुख्यं वाचकत्वं सिद्धम् । अर्थान्तरवाचकस्य शब्दस्यार्थान्तरे प्रयोगे कृते श्रोतुः कथञ्चित् अर्थबोधे जातेऽपि न हि तस्य प्रमाणत्वम् । किन्तु आप्तोच्चारितस्यैव शब्दस्य प्रामाण्यम् । आप्तस्य लक्षणं चरके पतञ्जलिना उक्तम् आप्तो नामानुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवान्, रागादिवशादपि नान्यथावादी यः सः इति । रागादिपराधीनतयाऽन्यथाभाषणस्वभावरहितत्वे सति सर्व वस्तुयाथार्थ्यविषयका परोक्षसाक्षात्कार-जन्यसर्वांशिकनिश्चयवत्त्वम् आप्तत्वम् । 'आप्तोपदेशः शब्दः' इति सूत्रव्याख्याने न्यायभाष्यकारः – अर्थसाक्षात्कारवानाप्तः । सः यथा दृष्टार्थबुबोधविषया यं प्रयुङ्क्ते सः प्रमाणशब्दः इति ऋष्यार्यम्लेच्छानां समानमाप्तलक्षणम् इत्याह ।

स्फोटवादस्य प्रेरणास्रोतांसि सन्ति वेदब्राह्मणोपनिषद्महाभारतादीनि । स च स्फोटो नित्यो ब्रह्स्वरूपो निरुपाधिकः । तस्मादेव सम्पूर्णस्यार्थजातस्य विवर्तनम् । ध्वनितश्चायमर्थः –

**ऋचो अक्षरे परमे व्योमन् देवा अधि विश्वे निषेदुः ।**[3]

**चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।**[4]

**चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥**[5]

इत्येवं रूपेण वैदिकवाङ्मयादिषु ।

वैयाकरणसम्प्रदाये स्फोटवादस्य प्रचलनं कदा प्रभृति समारब्धमिति निश्चप्रचं न शक्यते वक्तुं तथापि पाणिनिना 'अवङ्स्फोटायनस्य' इति सूत्रनिर्माणादवगम्यते यत् पाणिनेः पूर्वमेवास्य प्रचारो वैयाकरणसम्प्रदाये संबभूव नागेशभट्टेनापि स्वकीयस्फोटवादनामके पुस्तके लिखितम् ।

**वैयाकरणनागेशः स्फोटायनऋषेर्मतम् ।**
**परिष्कृत्योक्तवांस्तेन प्रीयतां जगदीश्वरः ॥**[6]

एतद्वादानुसारं शब्दानां नित्यत्वमङ्गीकार्यम् । शब्दनित्यत्ववाद एवास्य वादस्याधारशिला अस्ति । यद्यपि पाणिनेरष्टाध्याय्याः कस्मिन्नपि सूत्रे स्फोटस्य नाम न दृश्यते । तथापि 'तदशिष्यं

संज्ञाप्रमाणत्वात्', 'पृषोदरादीनि यथोपदिष्टम्' इत्यादीनि सूत्राणि प्रणीय पाणिनिना शब्दरूपं नित्यत्वं स्पष्टमेवोद्घुष्टम् । 'सिद्धे शब्दार्थसम्बन्धे' इति वार्त्तिकमारभता कात्यायनेनापि स्पष्टमेव स्वीकृतं तत् तथ्यम् । महाभाष्यकारेण पतञ्जलिनापि 'नित्येषु शब्देषु' इत्याद्येवं रूपेण व्याहरता शब्दस्य नित्यत्वमङ्गीकृतम् । तदुक्तम् –

**नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः ।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥**[7]

एवं प्रकारेण प्राप्तमान्यताकस्यास्य सिद्धान्तस्य प्रौढं विवेचनं भर्तृहरेः वाक्यपदीये द्रष्टुं शक्यते । स्फोटस्य नित्यत्वं ब्रह्मरूपत्वं च स्पष्टीकुर्वतोक्तं तत्र –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**[8]

एवं लक्षणलक्षितस्य स्फोटस्य यद्यप्यस्ति निरुपाधिकत्वं तथापि व्यञ्जकवर्णपदादि-रूपेणैवास्माकं ज्ञानविषयता तस्य । ब्रह्मात्मकस्य तस्यैकत्वेऽपि व्यञ्जकध्वनीनामानन्त्येनानन्त्यं भवति । अस्माकं मुखेभ्यः क, ख, ग, इत्यादिवर्णरूपेण, घटपटादिपदरूपेण, निःसृतं तत् सर्वं ध्वनिरेव । तेन व्यक्तोऽत एव तदाकाराकारितः आन्तरः स्फोट एव शब्दः सः एव सर्वार्थवाचकः। वक्तुः मुखात् यादृशो ध्वनिः निःसरति तादृगेव श्रोतुरान्तरोऽभिव्यज्यते स्फोटः । ध्वनिश्च द्विविधो भवति प्राकृतो वैकृतश्च । तत्र प्राकृतस्यैव ध्वनेः कालः स्फोटे उपचर्यते । वैकृतध्वनिस्तु केवलं तत्र द्रुतमध्यविलम्बितादिवृत्तिभेदापादक एव भवति । तदुक्तम् –

**स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।**
**वृत्तिभेदे निमित्तत्वं वैकृतं प्रतिपद्यते ॥**[9]

स्फोटे ध्वनिप्रतिबिम्बसमर्पकाश्च स्थिराः संस्कारा एव भवति । वस्तुतस्तु स्फोटमन्तरा न शक्यते उपपादयितुं शब्दादर्थः प्रतिजानामि एकमिदं पदं, वाक्यं वेति सर्वानुभवसिद्धा प्रतीतिः । वर्णानां वाचकत्वे हि एकमिदं पदमिति कथं शक्यते वक्तुं, तेषां नानात्वात् ।

एवञ्चात्र स्फोटशब्दस्य व्युत्पत्तिद्वयं फलितं भवति – स्फुटति अर्थोऽस्मात् असौ स्फोटः, स्फुट्यते वर्णैरिति स्फोटः । प्रथमव्युत्पत्त्या तस्य वाचकत्वं, द्वितीयया च तस्य व्यङ्ग्यत्वं सिद्ध्यति ।

उक्तञ्च हरिणा – **द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।**
**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥**[10]

अयमाशयः – वाचकशब्दो द्विविधः । एकस्तु श्रोतग्राह्यवैखरीरूपः स्फोटरूपप्रकाशन-समर्थः । अपरस्तु आन्तरः स्फोटः अर्थप्रकाशनक्षमः । यथा शमीकाष्ठमध्यभागो वह्निः मन्थनादिनोद्बुद्धस्य बहिरुपलभ्यमानस्य वह्नेरूपादानं भवति, तथैव वक्तुं प्रयत्नेन विवृद्धः स्फोटो ध्वनिरूपरूषितः सन् परश्रवणग्राह्यो भवति । परेण श्रुतश्च हृत्स्थं स्फोटमभिव्यज्यार्थं व्यनक्ति नास्ति ध्वनिरहितस्य स्फोटस्य प्रत्यक्षम् । वाचचारम्भणं विकारनामधेयं मृत्तिकेत्येव

सत्यमितिवत् ध्वनिरूपोपाधिरेव भिन्नः स्फोटस्तु एक एव । अत एव सोऽयं गकारः इति जायते व्यवहारः ।

यच्चोक्तम् - बुद्ध्या कृत्वा सर्वाश्चेष्टाः कर्त्ता धीरस्तवन्नीतिः ।
शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम् ॥[11]

वस्तुतस्तु वैयाकरणसिद्धान्तानुसारं यदनादिनिधनं शब्दात्मकं ब्रह्म तज्ज्ञानार्थमेव प्रकृति-प्रत्ययादिविभागः काल्पनिकः कृतो वर्तते । स्फोटो ज्ञातमर्थं विवक्षोः पुंसः इच्छया जातेन प्रयत्नेन यदा मूलाधारे संस्कृतपवनेनाभिव्यज्यते तदा परा वाग् इत्युच्यते । प्राप्य कण्ठदेशे मूर्धानमाहत्य परावृत्तेन वायुना अभिव्यक्तो हि स्फोटो वैखरीनाम्ना प्रसिद्धः ।

तदुक्तम् - परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥[12]

नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्तं पराख्यं शब्दब्रह्मैव पश्यन्तीत्युच्यते । पश्यन्त्यां स्पन्दसामान्यमस्ति । स्पन्दविशेषस्तु मध्यमायाम् । अयं पश्यन्ती शब्दः मानसः प्रत्यक्षविषयः । परापश्यन्त्योर्मध्ये आद्यः योगिनां समाधौ निर्विकल्पकज्ञानविषयः, द्वितीयसविकल्पकज्ञानविषयः । ततो हृदयपर्यन्तमागच्छता तेन वायुना हृदयदेशे पार्थक्येन शब्दार्थविशेषप्रकाशकेनान्तःकरणेन विषयीकृता परश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा मध्यमा वागित्युच्यते । आस्यपर्यन्तं गच्छता तेन वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य परावृत्त्य तत्तत्स्थानेष्वभिव्यक्ता मध्यमैव वैखरी वागित्युच्यते ।

एतासु चतसृषु वाक्षु प्रणवस्वरूपा संस्कारयोग्या परा वाक् । यथा वाक्यपदीये -

**स्वरूपज्योतिरेवान्तः परा वागनपायिनी ।**
**तस्या दृष्टस्वरूपायामधिकारो निवर्तते ॥**[13]

शिष्टाः तिस्रः वाचः संस्कारयोग्याः । योगिनां तु पश्यन्त्यामपि प्रकृतिप्रत्यय-विभागावगतिरस्ति । अत एव हरिणा व्याकरणस्य त्रिविधा वाग्विषय इत्युक्तम् यथा -

**वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।**
**अनेकतीर्थभेदायास्त्रय्या वाचः परम्पदम् ॥**

अथेदानीमिदमप्यपेक्षते विवेचनीयतां वर्णोत्पतिविषयेऽभिव्यक्तिविषये वा प्रतीयमानो मतभेदो वैयाकरणानाम् ।

तद्यथा - पाणिनिनोक्तं शिक्षायाम् -

**आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।**[14]

भर्तृहरिणा च -

**वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।**
**कैश्चित् दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः ॥**[15]

इत्युपक्रम्य वायोः शब्दत्वापत्तिरेवं प्रादर्शि

**लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।**

स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥[16]

ज्ञानस्य च कथं शब्दत्वमिति विषये तेनोक्तम् -

अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मनास्थितम् ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥[17]

नागेशेन तु मञ्जूषायां वायोरणूनामिति श्लोको वैखरीपर इति स्वीकुर्वता मूलाधारस्थ-पराशक्तेरेव पश्यन्त्यादिक्रमेण शब्दरूपपरिणाम इति प्रत्यपादि ।

केचित्तु वायोरणूनामिति हरिकारिका शब्दकार्यवादाभिप्रायेणेति वदन्ति अत एवाणूनां शब्दत्वापत्तिः संगता भवतीत्यन्यदेतत् ।

यद्यपि - शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥[18]
अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थ भावेन प्रक्रिया जगतो यतः ॥[19]

इत्येवं प्रकारेण शब्दपरिणामवादः, शब्दविवर्तवादश्च वाक्यपदीये प्रदर्शितो हरिणा तथापि शब्दविवर्तवाद एव वैयाकरणसम्मत इति शक्यते वक्तुं निश्चप्रचम् ।

अत एव - वागेव विश्वा भुवनानि जज्ञे ।
वागेवार्थं पश्यति वाग् ब्रवीति ॥
वागेवार्थं निहितं सन्तनोति ।

इत्याद्युक्तिभिः जगतो वाङ्मयत्वप्रतिपादनं संगच्छते । ध्वनिव्यङ्ग्यः स्फोटो वैयाकरणमते शब्दः । ध्वनिः स्फोटस्य व्यञ्जकः अतः शब्दगुणः । पतञ्जलिनाऽप्युक्तं - स्फोटः शब्दः ध्वनिः शब्दगुणः । एवं स्थितेऽत्र केचिद् वदन्ति - वर्णानां क्षणिकत्वे मानाभावात् वर्णा एव सिद्ध्यति । ते चाकारादयो वर्णाः परमाण्वभिन्नाः शब्दाः । तेषामेव तत्तदर्थैः सह शक्तिरूपः सम्बन्धः । नित्याः ककारः इति प्रत्यभिज्ञायमानत्वेन तत्रैकत्वस्य सिद्धेः । वयवाः न शंकनीयम्, सोऽयं ककारः इति प्रत्यभिज्ञायमानत्वेन तत्रैकत्वस्य सिद्धेः ।

वर्णा वा ध्वनयो वापि स्फोटं न पदवाक्ययोः ।
व्यञ्जन्ति व्यञ्जकत्वेन यथा दीपप्रमादयः ।
नार्थस्य वाचकः स्फोटो वर्णेभ्यो व्यतिरेकतः ॥[20]

तस्मात् - अल्पकत्वादिधर्मवन्तो वर्णरूपा ध्वनय इव पदवाक्यरूपा अपि ध्वनयस्त-दाकाराकारितस्य स्फोटस्य व्यञ्जकाः । पारमार्थिकरूपेण यथा ब्रह्मणि नास्ति प्रपञ्चाध्यासः किन्तु शब्दब्रह्मणि ध्वनिधर्माणां व्यावहारिकमध्यस्तत्वमस्ति इति न काप्यनुपपत्तिः।

यद्यपि वैयाकरणसिद्धान्ते अष्टौ स्फोटाः स्वीकृतास्तथापि निराकांक्षार्थबोधजनकतया वाक्यस्फोटस्यैव तत्र मुख्यत्वम् । इमानष्टौ स्फोटान् पञ्चविभागे प्रविभज्यैषाम् अन्न-मयादिपञ्चकोशैः सह तुलना कृता वैयाकरणभूषणे कौण्डभट्टेन । यथा अन्नमयादयः कोशाः

आनन्दमयस्य शुद्धब्रह्मणः प्राप्त्युपायभूताः सन्ति, तथैवात्रापि वर्णपदवाक्यस्फोटाः अखण्डवाक्यस्फोटात्मकस्य शब्दब्रह्मणः परेत्यपरनामधेयस्य प्राप्त्युपायाः सन्ति। ।

यदर्थमुक्तम् - तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ॥[21]

सन्दर्भाः -

1. वाक्यपदीयम् ब्रह्मकाण्डम् - 128
2. वाक्यपदीयम् ब्रह्मकाण्डम् - 124
3. ऋग्वेदः 1.164.39 ।
4. ऋग्वेदः 1.164.45 ।
5. ऋग्वेदः 4.58.3 ।
6. स्फोटवादः पृ. 102 ।
7. वाक्यपदीयम् ब्रह्मकाण्डम् - 23
8. वाक्यपदीयम् ब्रह्मकाण्डम् - 01
9. वाक्यपदीयम् ब्रह्मकाण्डम् - 76
10. वाक्यपदीयम् ब्रह्मकाण्डम् - 44
11. वैयाकरणसिद्धान्तलघुमञ्जूषा - 44
12. वाक्यपदीय टीका - 142
13. वाक्यपदीयम् - 01
14. पाणिनीय शिक्षा
15. पाणिनीय शिक्षा
16. वाक्यपदीयं ब्रह्मकाण्डम् - 107
17. वाक्यपदीयं ब्रह्मकाण्डम् - 108
18. वाक्यपदीयं ब्रह्मकाण्डम् - 120
19. वाक्यपदीय स्वोपज्ञ टीका - 120
20. श्लोकवार्तिकम् - 131, 133
21. वाक्यपदीय स्वोपज्ञटीका - 142

सहायकाचार्यः, व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम्
क. जे. सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई ।

★★★



Scanned with OKEN Scanner

## व्याकरणविभागीयराष्ट्रियशोधसङ्गोष्ठ्या विशिष्टानि चित्राणि











Scanned with OKEN Scanner

[illegible] Approved Journal No. 40920

ISSN 2277-6443

सप्तमोऽङ्कः, 2018-19

विश्वविद्यालयानुदानायोगद्वारा स्वीकृतशोधपत्रिकासूच्यन्तर्गता

# विद्यारश्मिः

समीक्षिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका

**A Peer Reviewed Refereed Annual National Research Journal**

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः,
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥

**प्रधानसम्पादकः**

प्रो. सुदेशकुमारशर्म्मा

**सम्पादकः, संयोजकश्च**

प्रो. बोधकुमारझाः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 77

UGC Journal No. 40920

ISSN 2277-6443

सप्तमोऽङ्कः, 2018-19



विश्वविद्यालयानुदानायोगद्वारा स्वीकृतशोधपत्रिकासूच्यन्तर्गता

# विद्यारश्मिः

समीक्षिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका

A Peer Reviewed Refereed Annual National Research Journal

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः,
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥

**प्रधानसम्पादकः**

प्रो. सुदेशकुमारशर्म्मा

**सम्पादकः, संयोजकश्च**

प्रो. बोधकुमारझाः

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 77



# सम्पादकीयम्

भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य मानित - विश्वविद्यालयस्य मुम्बईस्थितस्य क. जे. सोमैया संस्कृतविद्यापीठस्य शोधप्रकाशनविभागेन प्रतिवर्षं संस्कृतविद्यान्तर्गतस्य ज्ञानस्य विज्ञानस्य प्रज्ञानस्य च लोकसुलभत्वसम्पादनाय समग्र - भारतवर्षस्योत्तरतो दक्षिणं यावत्प्रखरलेखनीमण्डितानां तत्तच्छास्त्रपण्डितानां शोधपराणां युव - विदुषाञ्च शोधपत्राण्यामन्त्र्य समीक्ष्य मूल्येनाकलय्य सम्पादकीयेन च विभूष्य 'विद्यारश्मि:' इति ख्यातनाम्नी समीक्षिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका, या विश्वविद्या-लयानुदानायोगस्य स्वीकृतशोधपत्रिकासूचीघटकीभूताऽप्यस्ति, सा आई.एस्.एस्.एन्. संख्या-युक्ताऽऽविर्भाव्यते । तस्यासौ सप्तमोऽङ्को भवतां करकमलयोरधुना विलसति, लसति च प्रयासोऽनेन संयोगेन ।

सप्तमेऽस्मिन् सुन्दरकुसुमे वेद-वेदाङ्ग-काव्या-धुनिकशिक्षा-भाषाविज्ञान-मीमांसा-राजविद्या-योगायुर्वेदादिवाङ्मयमन्थनोत्थशोधपत्राणि नैजं सौरभमातन्वन्ति । विद्यापीठीय: शोधप्रकाशनविभाग: स्पष्टं मनुते 'विद्या भाषामर्य्यादामतिशेते' इति । तस्मादत्र पत्रिकायां संस्कृतहिन्द्याङ्ग्लेति तिसृषु भाषाधारासु विदुषां वैदुष्यामृतं प्रवहति, समावहति च विविधविधान् पाठकविबुधान् पातुमेतत् ।

संरक्षकेभ्य: संस्थानस्य कुलपतिभ्य: आचार्य्यपरमेश्वरनारायणशास्त्रिभ्य:, प्रधान - सम्पादकेभ्य: प्राचार्य्येभ्य: आचार्य्यसुदेशकुमारशर्म्मभ्य:, समीक्षा-मूल्याङ्कन-सम्पादन - समितिसदस्येभ्य: सर्वेभ्य: कृपालुविद्वद्भ्य:, आचार्य्यकमलाकान्तत्रिपाठि, आचार्य्यप्रकाशचन्द्र, आचार्य्य ई. एम्. राजन्प्रभृतिभ्य: प्रदत्तशोधपत्रेभ्य: सरस्वतीप्रियेभ्यो मनीषिभ्यश्च विद्यापीठपक्षतो भूयोभूयो धन्यतावचो विस्तार्य्यतेऽस्मिन्नवसरे ।

(प्रो. बोधकुमारझा:)

सम्पादक:, संयोजकश्च

# शोधपत्रानुक्रमणिका


| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | शिक्षानीतिः सुखावहा | प्रो. कमलाकान्तत्रिपाठी | 01 |
| 2. | वाक्यार्थविमर्शः | प्रो. प्रकाशचन्द्रः | 07 |
| 3. | नैषधे पञ्चनलीसर्गस्य वैशिष्ट्यम् | प्रो. ई. एम्. राजन् | 18 |
| 4. | Curiosity : A Source of Research | Prof. D. N. Pandey | 23 |
| 5. | 'कर्तुरीप्सिततम' सूत्रशास्त्रार्थः | प्रो. बोधकुमारझाः | 35 |
| 6. | रसानां सुखदुःखात्मकत्वं | प्रो. अर्चना दुबे | 48 |
| 7. | वर्णान्तरत्व के सिद्धान्त | आचार्य उदयन मीमांसक | 52 |
| 8. | संस्कृतशास्त्रशिक्षणे अन्वयविधेरनुप्रयोगः | डॉ. रा. गा. मुरलीकृष्णः | 64 |
| 9. | शास्त्रतत्त्वसुखबोधाय तन्त्रयुक्तयः | डॉ. देवदत्तसरोदे | 74 |
| 10. | भाषोत्पत्तिसिद्धान्ताः संस्कृतञ्च | डॉ. कुलदीपशर्मा | 84 |
| 11. | शिक्षायां भूमण्डलीकरणस्य प्रभावः | डॉ. वी. एस्. वी. भास्कररेड्डी | 91 |
| 12. | नारायणीयकाव्ये लक्ष्ये वस्त्वलङ्कार-रसानुमितिलक्षणानि | डॉ. नारायणन् ई. आर्. | 97 |
| 13. | व्याकरणदिशा पुरुषार्थविमर्शः | डॉ. दयारामदासः | 105 |
| 14. | शब्दनित्यत्ववादः | डॉ. मधुकेश्वरभट्टः | 112 |
| 15. | भासनाटकेषु स्त्रीपात्राणि समायोजनस्य उत्कृष्टोद्धरणानि | डॉ. लीना सक्करवालः | 115 |
| 16. | शब्दार्थसम्बन्धविमर्शः | डॉ. सुभाषचन्द्रमीणा | 122 |
| 17. | कार्यशब्दवादे इदम् | डॉ. सुधाकरमिश्रः | 127 |
| 18. | अलङ्काराणामलङ्कारत्वम् | डॉ. स्वर्गकुमारमिश्रः | 133 |
| 19. | संयुक्त राष्ट्रसंघ में हिन्दी की स्थिति का मूल्यांकन | डॉ. गीता दुबे | 138 |
| 20. | Colonial Alienation in Ngugiwa Thiong 'O's Decolonising the Mind | Dr. Shweta Sood | 143 |


NK

Scanned with OKEN Scanner

# शब्दार्थसम्बन्धविमर्शः

डॉ. सुभाषचन्द्रमीणा

(लोके यथा परस्परं जनानां, परस्परं वस्तूनाञ्च सम्बन्धोऽनुभवविषयः, तथैव शब्दार्थयोरपि । शब्दानां त्रिविधत्वादर्थानाञ्च त्रिविधत्वात् तयोः सम्बन्धानामपि त्रिविधत्वम् - शक्तिलक्षणाव्यञ्जनात्मकमिति समुद्दिश्य पतञ्जलिभर्तृहरिकैयटदीक्षितनागेशप्रमुखाणामुद्धरणमुद्धृत्य गदाधरसम्मतं मतञ्चोल्लिख्य विशिष्य शक्तिस्वरूपं लेखकोऽत्र विविनक्ति । तन्त्रान्तरे 'अभेदोऽपि सम्बन्धः' 'एकं स्वत्वं, स्वामित्वं वा सम्बन्धः' इत्युपपाद्य शाब्दिकसिद्धान्तानुरोधेन तन्निरस्य च 'द्विष्ठ एव सम्बन्धः' इत्यपि प्रतिपादयति ॥ - स.)

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।[1]

नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥[2]

शब्दादर्थबोध इति सार्वजनीनोऽनुभवः । आचार्यपतञ्जलिर्महाभाष्ये भगवतः कात्यायनस्य 'सिद्धे शब्दार्थसम्बन्धे'[3] इति वार्तिकं व्याचक्षाणः 'सिद्धे शब्देऽर्थे सम्बन्धे चेति' इत्येवं पदविवेचनं विधाय सिद्धशब्दं नित्यपर्यायत्वेनाङ्गीकृत्य शब्दमर्थं तयोः सम्बन्धं च नित्यत्वेन स्वीचकार । सम्बन्धविषये कैयटो व्याख्याति - सम्बन्धस्यापि व्यावहारपरम्परयाऽनादित्वान्नित्यता । नागेशस्तु शब्दार्थनित्यतां स्वीकृतवान् । आचार्यभर्तृहरेः -

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥[4]

इति वचनाज्ज्ञायते यल्लोके सर्वोऽपि व्यवहारो न शब्दप्रयोगं विना भवितुमर्हति । जगति यत् किञ्चिद् वस्तु वर्तते तत् कदाचित् स्वसम्बद्धमन्यद् वस्तु ग्राहयति । सा च सम्बद्धता न सम्बन्धं विना भवितुमर्हति । यथा उच्चरितः घटः कम्बुग्रीवादिमद् वस्तु ग्राहयति । तेन ज्ञायते यद् घटशब्देन कम्बुग्रीवादिमतो वस्तुनः कश्चित् सम्बन्धो वर्तते तदैव घटः तद्वस्तु ग्राहयति नैव पटवस्तु । अतः सम्बन्धविषये भवत्येव जिज्ञासा सिद्धान्तजिज्ञासूनां मतिमताम् । तस्य सम्बन्धस्य ज्ञानं षष्ठीविभक्त्यन्तपदेन शाब्दबोधे दृश्यते । स च सम्बन्धः कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिरूपः यथा राज्ञः पुरुषः इत्यत्र राजपुरुषयोः स्वस्वामिभावसम्बन्धः, तस्य सम्बन्धस्य प्रतियोगी राजन्शब्दः तस्मात् षष्ठी शेषे 2/3/50 इति सूत्रेण षष्ठी विभक्तिर्नियम्यते ।

उक्तं च - शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥[5]

तत्र धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद् भवति । यथा पाचक शब्दस्य पाककर्ता इत्यर्थः । तत्र पच् धातोः पाकरूपोऽर्थः 'डुपचष् पाके' इति पाणिनेरनुशासनात् ।

उपमानात् शक्तिग्रहो यथा गोसदृशो गवयः इत्युक्ते गवयशब्दस्य संकेतः आरण्यकपशु-विशेषे कृत इति गवयशब्देन स एव गृह्यते । कोशादपि भवति शक्तिग्रहो यथा 'विष्णुर्नारायणः कृष्णः' इत्यादिपदानां विष्णुरूपेऽर्थे कृतः संकेतः कोशेन । आप्तवाक्यादपि शब्दस्य संकेतो गृह्यते । आप्तस्तु यथार्थविद् भवति । व्यवहारस्तु यथा - घटमानयति । वाक्यशेषात् शक्तिग्रहो यथा यवम-यश्चरुर्भवतीति उक्ते सति यवशब्देन, वाक्यशेषात् दीर्घशूके शक्तिं गृहीत्वा स एव बोध्यते । विवरणात् तत्समानार्थकपदेन यथा घटोऽस्ति इति पदस्य कलशोऽस्तीति अर्थात् घटपदस्य कलशे शक्तिग्रहः । सिद्धपदस्य प्रसिद्धपदस्य सान्निध्यादपि भवति शक्तिग्रहः । यथा 'इह सहकारतरौ मधुरं पिको रौति ।' इत्यत्र प्रसिद्धपदस्य सहकारस्य सान्निध्यात् पिकपदस्य कोकिले शक्तिरित्यवधार्यते । एवमुपर्युक्तरीत्या यत्रार्थे यस्य पदस्य संकेतो गृहीतो भवति, तदर्थनिरूपिता शक्तिस्तस्मिन् पदे तिष्ठतीति निश्चीयते ।

उपर्युक्तप्रकारेणेदं निश्चितं भवति यत् यस्यार्थस्य बोधिका शक्तिः बोधकः सम्बन्धो वा यस्मिन् पदेऽवतिष्ठते तेन पदेन तस्यैवार्थस्योपस्थितिः बोधश्च जायते । अत एव न येन केनापि पदेन यस्य कस्याप्यर्थस्य बोधः, वृत्त्योपस्थितस्य सम्बद्धस्य चार्थस्य बोधकः शब्द इति नात्र विसंवादः । अस्यां स्थितौ कस्तावत् शब्दार्थयोः सम्बन्ध इति जिज्ञासायामुच्यते पदपदार्थयोः वाच्यवाचकभाव एव सम्बन्धः । एतदवलम्ब्यैव शब्दो वाचकः, अर्थश्च वाच्य इत्युच्यते । तदग्राहकश्च इतरेतराध्यासमूलकं तादात्म्यम् । तादात्म्यमेव संकेतः । तादात्म्यञ्च भेदसहिष्णुरभेदः । तद्भिन्नत्वेऽपि तदभेदेन प्रतीयमानत्वमेव तादात्म्यम् । एतदनुसारम् अर्थः शब्दाद् भिन्नाभिन्नोः भवति। योऽर्थो येन शब्देन भिन्नाभिन्नः स एव बोध्यते तेन शब्देन । सर्वेषामर्थानां सर्वैः शब्दैः सह तादात्म्यं नास्तीति न जायते बोधः सर्वैः शब्दैः सर्वेषामर्थानाम् ।

उक्तं च- **सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।**
**श्रुतायामश्रुतायां वा क्रियायामभिधीयते ॥**[6]

अस्यां कारिकायां सम्बन्धः क्रियाकारकभावपूर्वकः कथितः । तत्र हेतुः क्रियाकारकसम्बन्धः शेषसम्बन्धस्तु फलितः । यथा देवदत्तस्य गृहमत्र देवदत्तगृहशब्दौ कर्त्रधिकरणरूपौ स्तः । देवदत्तः गृहे निवसति तदाधारेणोभयोः स्वस्वामिभावस्य भावात् कर्त्रादेः विशेषरूपेण ज्ञानं भवति । भर्तृहरिकारिकायां हि कारकशब्देन करणत्वादिकारकशक्तयः कथ्यन्ते । अत्र श्रवणगोचरा अधिकरणभवनादिक्रिया सम्बन्धरूपकार्यासिद्ध्या अनुमानेन ज्ञाता सती उपस्थिता भवतीति तद्द्वारैव समन्वयो भवति । सिद्धद्रव्याणां तां विना न परस्वं सम्बन्धो भवितुमर्हति । यतो हि क्रिया निःश्रयणेव सम्बद्ध्यते । एवं हि सम्बन्धिनौ अनुमीयमानक्रिया निमित्तरूपकारके भवतः ।

राज्ञः पुरुष इत्यादौ स्वस्वामिभावः षष्ठ्यर्थः स्वत्वस्वामित्वसमूहरूपः अखण्डोपाधिः । ये च स्वत्वं स्वामित्वं वा अत्र षष्ठ्यर्थसम्बन्धत्वेनाङ्गीकुर्वन्ति, तन्न समीचीनं, स्वत्वस्वामित्वादीनामे-



Scanned with OKEN Scanner

कमात्रव्यक्तिवृत्तित्वेन सम्बन्धत्वाभावात् । यतो हि सम्बन्धः सम्बन्धिभ्यां भिन्नः उभयाश्रितश्च भवति चेदुच्यते एकत्राश्रयतया परत्र निरूपकत्वेन विद्यमानत्वाद् भवति द्विष्ठत्वं, तन्न, आधारता वृत्ति-नियामकसम्बन्धेन भवति । आचार्यभर्तृहरिः कथयति च

**द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते ।**
**तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते ॥**[7]

अर्थात् सम्बन्धः प्रतियोगिनि अनुयोगिनि च यद्यपि विद्यते, तथापि गुणाः परार्थाः भवन्ति । ते च विशेषणत्वेन विवक्षिताः विशेष्यं प्रति अन्वियन्ति । सम्बन्धं विना विशेषणत्वेन विवक्षा न सम्भवति । अतो विशेषणविशेष्यभावस्याकाङ्क्षितत्वादत्र सम्बन्ध उद्भूततया प्रतीयते । तदा विशेषणवाचकात् शब्दात् सर्वत्र षष्ठी नियम्यते ।

राज्ञः इत्यत्र पदान्तरप्रयोगं विनापि विशेषणत्वप्रतीतिः कर्तुं शक्यते । राज्ञः इत्यत्र स्वामित्वं पुरुषे स्वत्वं ज्ञात्वैव भवति । अतः सम्बन्धस्य बहिरङ्गत्वात् पुरुषादन्तरङ्गा प्रथमैव न तु षष्ठी, राजनि च षष्ठ्येव एवं सर्वत्र सम्बन्धस्थले सम्बन्धिनोर्भेदे सम्बन्धिद्वयवृत्तिधर्मसमूहो भवति । "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"[8] इति भाष्ये लिखितमस्ति ।

अत्र भाष्यस्थे 'अधिब्रह्मदत्ते पाञ्चालाः' इति प्रयोगे ब्रह्मदत्ते सप्तम्या पाञ्चालाद् द्वितीया प्राप्नोति । यतो हि अधेर्द्योत्यस्य पाञ्चालनिष्ठसम्बन्धस्य सप्तमीविभक्त्या अभिहितत्वेऽपि तद्द्योत्यस्य पाञ्चालवृत्तिसम्बन्धस्य तया अज्ञानात् । "उपपदविभक्तेः कारकविभक्तिर्बलीयसी"[9] इति परिभाषया अग्रे भाष्ये समाहितं, तेन ब्रह्मदत्ते सप्तमी सिध्यति ।

इत्थं यत्र विशेष्यपदात् षष्ठी सम्भाव्यते तत्र षष्ठीवारकयुक्त्या समाधानं करणीयम् । अत एव लोकव्यवहारे शास्त्रे च स्वस्वामिभावः अवयवावयविभावः, आधाराधेयभावः, प्रतियोग्यनु-योगिभावः विशेषणविशेष्यभावः इत्यादीनां भूयसां सम्बन्धानां व्यवहारो भवति ।

इत्थं च षष्ठ्याः सम्बन्धो, विशेषणत्वमिति चार्थद्वयम् । षष्ठी च विशेषणादेव । तत्रैका जिज्ञासोदेति यत् यथा पित्रा सह पुत्रस्य जन्यजनकभावसम्बन्धो भवति तर्हि उभयोः भ्रात्रोर्मिथः कः सम्बन्धः यथा देवदत्तस्य भ्राता इत्यत्र? एतस्मिन् विषये महाभाष्यकारः "अनेकमन्यपदार्थे"[10] इति सूत्रभाष्ये ।

वस्तुतस्तु 'देवदत्तस्य भ्राता' इत्यत्र 'स्वजनकजन्यत्वभावसम्बन्धोऽत्र' समाश्रयणीयः । यतो ह्यत्र वाक्यार्थबोधानुकूलः सम्बन्धः कल्पनीय इति भाष्यतात्पर्यम् 'अत्र चेद् युक्तः षष्ठ्यर्थो दृश्यते, इहापि युक्तो दृश्यताम्' इत्युक्त्या ज्ञायते । यतो हि कल्पनापि तादृशी एव भवति यत्र तादृशी योग्यता स्यात् स्वभ्रातरि न कदाचित् अवयवावयविभावसम्बन्धयोग्यता भवति । विकल्पात्मक-ज्ञानविषयः सम्बन्धोऽपि कश्चित् तादृशो न स्फुटः । एवमेव 'पुरुषस्य चैतन्यम्' इत्यत्र 'आत्मात्मीयभावसम्बन्धोऽङ्गीकरणीयः ।' यतो हि तत्र तादृशी सम्बन्धयोग्यता वर्तते अतस्तत्र तादृशः सम्बन्धः कल्प्यते । अतो देवदत्तस्य भ्राता इत्यत्र पूर्वोक्तसम्बन्ध एव योग्यतां लभते । एवमेव 'अन्नस्य हेतोर्वसति' इत्यत्र हेतुहेतुमद्भावः षष्ठ्यर्थः । हेतुशब्दश्चात्र तात्पर्यग्राहको भवति ।

Scanned with OKEN Scanner

कृष्णस्य कृतिरित्यत्र कर्त्ता, जगत: कर्ता कृष्ण इत्यत्र च कर्म एव षष्ठ्यर्थ: । कश्चिदत्र कर्तृकर्मणो: षष्ठ्या: लक्षणेति उक्तवान् । तन्नोचितम् । 'कर्तृकर्मणो: कृति'[11] इत्यादिसूत्राणां शक्तिग्राहकाणां सत्त्वात् । लक्षणाया: कल्पना तत्र नाङ्गीकरणीया भवति ।

आचार्यो गदाधरो व्युत्पत्तिवादे सम्बन्धविषये कथयति यत् 'शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्ग: संसर्गमर्यादया भासते ।' स च सम्बन्ध: क्वचिदभेद: क्वचिच्च तदतिरिक्त एवाधाराधेय-प्रतियोग्यनुयोगिविषयविषयिभावादिसम्बन्ध: । अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्य-हितपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया (आकाङ्क्षया) भासते । यथा - नीलो घट: इति (व्यस्तस्थले), नीलघटमानय इत्यादौ (समस्तस्थले) च । अभेदपदार्थ: क:? विषयेऽस्मिन् गदाधर: कथयति 'अभेदस्तादात्म्यम् । तच्च स्ववृत्त्यसाधारणो धर्म: । असाधारण्यं चैकमात्रवृत्ति-त्वम् ।' इत्येवं भेदविशिष्टमेव घटत्वादिसर्वो धर्मो भवति तदन्यत्वं तद्व्यक्तित्वे एव । एवं 'नीलो घट' इत्यादौ स्ववृत्तिनीलत्वादिसम्बन्धेन घटाद्यंशे नीलपदार्थस्यान्वयबोधो भवति । इत्येवं तत्र विषयोऽयं विचारितोऽस्ति ।

शाब्दिकास्तावदभेदस्य कथमपि सम्बन्धत्वं नाङ्गीकुर्वन्ति । कथयन्ति च ते यदि तत्र सम्बन्धत्वं स्यात् तर्हि नीलो घट: इत्यादौ नीलस्याभेदसम्बन्धेन घटेऽन्वये स्वीकारे विशेषणे नीलपदे सम्बन्धप्रतियोगिवाचकात् शब्दात् 'षष्ठी शेषे'[12] इति षष्ठी विधानात् तत्र षष्ठी स्यात् । अतो 'नीलो घट' इति प्रयोगोच्छेदापत्ति: स्यात् । किञ्चाभेदस्य सम्बन्धत्वे[13] 'कृत्तद्धितसमासेभ्य: 1/2/46 सम्बन्धाभिधानम् भावप्रत्ययेन' इति सिद्धान्ताद् 'राजपौरुष्यम् इत्यादौ भावप्रत्ययेन सम्बन्धस्येव उद्घाट्यते ।'

महाकविना कालिदासेन कृतोऽस्यां दिशि संकेत: - वागर्थाविव सम्पृक्ताविति स्वोक्त्या[14]

तदुक्तं भूषणकारेण -

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।**
**अनादिरर्थै: शब्दानां सम्बन्धो योग्यता तथा ॥**[15]

शब्दानामर्थै: सह वर्ततेऽनादिकालिक एव तादात्म्यमूलको वाच्यवाचकभावसम्बन्ध इति तात्पर्यम् ।

शब्दार्थयोर्मध्ये य: खलु स्वीकृत: सम्बन्ध: स तु तयो: सहज: सम्बन्ध:, किन्तु कदाचि-दायाति एतादृशी स्थितिर्यदा सहज-सम्बन्धेन कार्यं न चलति । यथोक्तं केनापि 'गङ्गायां घोष:' इति । गंगा तु जलप्रवाहात्मिका तत्र घोष: आभीरपल्ली कथं स्थातुं शक्नुयात्? अस्यां स्थिताविदमेव निर्णीयते यत् नात्र गङ्गाशब्द: स्वकीयं शुद्धार्थं प्रवाहात्मकं बोधयितुमुच्चारितं किन्तु तत्समीपवर्तिनं तीरं बोधयितुमेवोच्चारितम् । किन्तु शब्दस्य सहजसम्बन्धेन तीरार्थस्य बोधस्तु भवितुं नार्हतीति सहजसम्बन्धातिरिक्तो लक्षणात्मकसम्बन्धोऽपि स्वीक्रियते । तदुक्तं भाष्यकारेण तात्स्थ्यात्, तत्सामी-प्यात्, तत्साहचर्यात्, ताद्धर्म्याच्च अतस्मिन् स इत्येतद्भवति । मञ्चस्थबालकेषु मञ्चत्वारोप:

तात्पर्यात् भवति । गौरे प्रभाकरत्वारोपः सत्कामिव्याप्त् क्रियते । अग्नावपि शीतत्वारोपः सह सादृश्येन क्रियते । सिंहो माणवकः 'इत्यत्र माणवके सिंहत्वारोपः सादृश्येन क्रियते ।'

एतत्सम्बन्धद्वयातिरिक्तो व्यञ्जनानामकः सम्बन्धोऽपि व्याकरणशास्त्रीयव्यञ्जनावादिभिः मुख्यार्थबाधग्रहनिरपेक्षबोधजनिका मुख्यार्थसम्बद्धबोधजनिका स्वीकृतो वर्तते । सा चेयं व्यञ्जना मुख्यार्थबाधग्रहनिरपेक्षबोधजनिका मुख्यार्थसम्बद्धसाधारणप्रसिद्धाप्रसिद्धार्थविषयिका, अत एव निपातानां द्योतकत्वं स्फोटस्य व्यञ्जकत्वं च सिद्धं भवतीत्यलं विस्तरेण ।

सन्दर्भाः


1. वाक्यपदीयम् 'ब्रह्मकाण्डम्' ।
2. वाक्यपदीयम् 'ब्रह्मकाण्डम्' ।
3. महाभाष्यम् प्रथमं पस्पशाह्निकम्, पृ. सं. 76 ।
4. वाक्यपदीयम् 'ब्रह्मकाण्डम्' ।
5. परमलघुमञ्जूषा ।
6. वाक्यपदीयम् ।
7. वाक्यपदीयम् (तृतीयकाण्डम्) ।
8. व्याकरणमहाभाष्ये पृष्ठ संख्या 106 ।
9. सिद्धान्तकौमुदी 'कारकप्रकरणम्' पृष्ठ संख्या 750 ।
10. अनेकमन्यपदार्थे 2/2/24 पृष्ठ संख्या 76 समासप्रकरणे ।
11. सिद्धान्तकौमुदी कारकप्रकरणे 2/3/65 पृष्ठ संख्या 785 ।
12. सिद्धान्तकौमुदी कारकप्रकरणे 2/2/50 ।
13. लघुसिद्धान्तकौमुदी पृष्ठ संख्या 57 ।
14. रघुवंशमहाकाव्यम्, श्लोक 1 ।
15. वाक्यपदीयम् साधनसमुद्देशः (तृतीयकाण्डम्) ।



सहायकाचार्यः (व्याकरणविभागः)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ४०००७७


★★★

Scanned with OKEN Scanner

## …ापीठे प्रतिष्ठिताः विभागाः

- व्याकरणविभागः
- साहित्यविभागः
- ज्यौतिषविभागः
- शिक्षाशास्त्रविभागः
- आधुनिकविभागः
- शोधप्रकाशनविभागः
- मुक्तस्वाध्यायपीठम्
- अनौपचारिकसंस्कृतशिक्षणकेन्द्रम्
- वास्तुज्यौतिषपरिचयपाठ्यक्रमः

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं,
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम् ।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्,
सोमैयाभुवि भासते परिसरो मुम्बापुरे संस्थितः ॥

राष्ट्रियसंस्कृतसंस्थानम्
( मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम् )
(मानितविश्वविद्यालयः)
क.जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - 77

Scanned with OKEN Scanner

षष्ठोऽङ्कः, 2018-19

ISSN 2395-7921

# शिक्षारश्मिः

समीक्षिता मूल्याङ्किता च वार्षिकशोधपत्रिका

**A Peer Reviewed Refereed Annual Research Journal**

**प्रधानसम्पादकः**

प्रो. सुदेशकुमारशर्म्मा

**सम्पादकः**

डा. देवदत्तसरोदे

**शिक्षाशास्त्रविभागः**

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 77

# विषयानुक्रमणिका


| क्रं.सं | शोधपत्रस्य शीर्षकम् | लेखकः | पृष्ठसंख्या |
|---|---|---|---|
| 1. | शिक्षणाधिगमयोः मनोवैज्ञानिकप्राविधिकतत्त्वानामनुप्रयोगः | श्री. पी. नागमुनिरेड्डी | 1 |
| 2. | संस्कृतशास्त्रेषु विद्यमानाधिगमतत्त्वस्य तदुपकारकोपायानाञ्च विचारः | डॉ. देवदत्तसरोदे | 6 |
| 3. | अन्तर्जालाश्रित-शिक्षणाधिगमप्रक्रिया | डॉ. हरिप्रसादः के. | 17 |
| 4. | शिक्षणाधिगमयोः मनोवैज्ञानिक-प्राविधिकतत्त्वानामनुप्रयोगः | डॉ. वेङ्कटरमणभट्टः | 22 |
| 5. | शिक्षणाधिगमयोः प्राविधिकतत्त्वानां प्रयोगे गुणदोषविमर्शः | डॉ. कुमारः | 25 |
| 6. | व्यक्तित्वम् | डॉ. विनोदकुमारशर्मा | 30 |
| 7. | संस्कृतभाषाधिगमे मोबाइलसहकृतभाषाधिगमस्य अनुप्रयोगः | डॉ. सचिनकुमार | 35 |
| 8. | भाषायाः उद्गमे विविधसिद्धान्ताः | डॉ. बिचित्ररञ्जनपण्डा | 41 |
| 9. | भर्तृहरिकृते वाक्यपदीये भाषावैज्ञानिकतत्त्वानि | डॉ. मनीषजुगरान | 47 |
| 10. | शिक्षणाधिगमयोः मनोवैज्ञानिकप्राविधिक-तत्त्वानामनुप्रयोगे शिक्षकः | डॉ. डम्बरुधरपतिः | 57 |
| 11. | शिक्षणाधिगमप्रक्रियायाम् अधिगमसिद्धान्तानां विनियोगः | डॉ. रुद्रनारायणनरसिंहमिश्रः | 62 |
| 12. | शिक्षणाधिगमयोः शास्त्रेषु उपनिषत्सु च वर्णिताः मनोवैज्ञानिकाभिगमाः | डॉ. गणपति वि. हेगडे | 66 |
| 13. | भारते अध्यापकशिक्षा | डॉ. महेशकुमारपाणिग्राही | 73 |
| 14. | साम्प्रतिकशिक्षाक्रमे मूल्यसम्वर्धने गैर्वाण्याः उपादेयता | डॉ. प्रभलविद्याधरः | 83 |
| 15. | शिक्षणकर्मणि अन्तर्जालस्य विनियोगः | Dr. S.T.P Kanakvali | 88 |
| 16. | शिबिरविधिः | एस्.वैष्णवी | 95 |
| 17. | शारीरिक शिक्षा में आईसीटी | Dr. Shankar B. Andhale | 101 |
| 18. | Implematation of Inclusive Education in India : Issues and Challenges | Dr.V.S.V. Bhaskar Reddy | 106 |

19. Application of MOOCs & SWAYAM in Teaching Learning Process — Dr. J. K. Rayaguru — 113
20. Use of Internet in Teaching Learning Process — Dr. Manish K. Chandak — 119
21. Role of SWAYAM in Online Teaching-Learning Process — Dr. Prem Singh Sikarwar — 126
22. Virtual Classroom: An Interactive Model for E-learning — Dr. Shweta Sood — 132
23. Innovative Perspective of Applying Technology in Sanskrit Education — Dr. Namrata Patel — 137

## प्रज्ञानखण्डः

24. शास्त्रशिक्षणविधयः शास्त्रसंरक्षणोपायाश्च — गान्धिवर्गः — 144
25. विविधमनोवैज्ञानिकानां मतानुसारं व्यक्तित्वस्य सिद्धान्ताः — भामहवर्गः — 155
26. भारतीयपाश्चात्यदर्शनयोः संवर्णितानां शैक्षिकतत्त्वानां समालोचनम् — दण्डिवर्गः — 165
27. आधुनिकभारते संस्कृतशिक्षणस्य आवश्यकता उपहुतयश्च — कुन्तकवर्गः — 176
28. शिक्षणे अधिगममूल्याकलनयोः महत्त्वम् — सावरकरवर्गः — 182
29. केन्द्रीय हिंदी निदेशालय का हिंदी के विकास में योगदान — जगन्नाथवर्गः — 187

**********

# शारीरिक शिक्षा में आईसीटी

✍ Dr. Shankar Baburao Andhale*

**शारीरिक शिक्षा का परिचय (Introduction of Physical Education):**

मनुष्य प्राणी जन्म से मृत्यु तक किसी न किसी रूप से शिक्षा ग्रहण करता है। शिक्षा के माध्यम से व्यक्ति का शारीरिक, मानसिक, बौध्दिक, सामाजिक एवं आध्यात्मिक विकास होता है। प्राचीनकाल में शिक्षा का मुख्य उद्देश्य व्यक्ति का सर्वांगीण विकास करना था, जिससे शारीरिक विकास तथा स्वास्थ्य विकास भी सम्मिलित था।

शारीरिक शिक्षा का शाब्दिक अर्थ देखा जाये तो स्पष्ट परिलक्षित होता है कि इसमें मूलतः दो शब्द निहित हैं। प्रथम शारीरिक दूसरा शिक्षा। शारीरिक शिक्षा वह शिक्षा है, जो स्वस्थ शारीरिक विकास हेतु विविध आंगिक क्रियाओं एवं कार्यक्रमों द्वारा दी जाती है, जो न केवल बालक के शारीरिक पक्ष को ही प्रबल व पुष्ट बनाती है अपितु शारीरिक शिक्षा से व्यक्तित्व के मानसिक, संवेगात्मक, सामाजिक एवं नैतिक पक्ष भी सुविकसित होते हैं।

**आईसीटी का परिचय (Introduction of ICT):**

डिजिटल युग में होने के नाते, ICT प्रौद्योगिकी ने शैक्षिक क्षेत्र में एवं शारीरिक शिक्षा के क्षेत्र में कई परिवर्तनों के लिए जिम्मेदार है। तकनीकी आविष्कार मानव के विकास में विशेष प्रभाव डाल रहे हैं। तकनीकी विज्ञान बढ़ रहा है और इतनी तेजी से फैल रहा है कि भविष्यवाणी करना मुश्किल है। कि इसका अन्तिमक्षोर क्या है ? पूरे मानव जीवन में इतने नए मोड़ और मोड़ जैसे अनुभव पहले कभी नहीं हुए हैं और इसलिए मानव व्यवहार के नकारात्मक पक्षों में भी परिवर्तन हुआ है।

भविष्य में, शारीरिक शिक्षा को आमूल परिवर्तन से गुजरना होगा। यदि प्रौद्योगिकी का सामान्य शिक्षा में सीखने पर प्रभाव पड़ता है, तो क्या यह पी.ई. प्रौद्योगिकी के क्षेत्र में नए विकास शारीरिक शिक्षा पाठ्यक्रम को सकारात्मक रूप से प्रभावित करेंगे ? उदाहरण के लिए, तकनीकी विकास का उपयोग समाज की भविष्य की मांगों और अपेक्षाओं के लिए शारीरिक शिक्षकों को तैयार करेगा। इसके अलावा, शिक्षा मंत्रालय माध्यमिक विद्यालयों में शिक्षण और सीखने की प्रक्रिया में आईसीटी को एकीकृत करने पर अधिक जोर दे रहा है। कंप्यूटर हमें अपनी कार्य योजना और पाठ योजनाओं को लगातार संशोधित करने



* अतिथि-अध्यापक, शारिरिक शिक्षा विभाग, क.जे.सोमैया संस्कृत विद्यापीठ, मुम्बई.

और अपडेट करने की अनुमति देते हैं। स्कूलों में सभी छात्रों के डेटाबेस का निर्माण, स्कूल प्रशासकों का आकलन, खेल पुरस्कार और पाठ्येतर उपलब्धियों के विस्तृत रिकॉर्ड को बनाए रखने में सक्षम बनाता है।

**शारीरिक शिक्षा में आईसीटी के सामान्य अनुबंध :**

**(GENERAL CONTRIBUTION/BENEFITS OF ICT IN PHYSICAL EDUCATION)**

शारीरिक शिक्षा में आईसीटी का उपयोग खेल के विज्ञान के साथ शारीरिक और मानसिक दोनों गतिविधियों से जुड़कर जीवन में आता है। यह उन पूर्ण छात्रों को बनाने में भी मदद करता है जो व्यावहारिक और सैद्धांतिक दोनों कार्यों पर बेहतर ध्यान केंद्रित करने में सक्षम हैं। इसके अलावा, यह छात्रों को अपने स्वयं के शरीर के अंगों और सामान्य रूप से मानव शरीर की बेहतर समझ विकसित करने में मदद करता है। यह विषय को न केवल रोचक, बल्कि आकर्षक और प्रभावी बनाकर प्रतिष्ठान के भीतर शारीरिक शिक्षा की प्रतिष्ठा को बढ़ाता है। इसके अलावा शारीरिक शिक्षा शिक्षकों और छात्रों दोनों के लिए उत्साह और प्रेरणा लाता है।

शारीरिक स्कूल प्रशासनिक कार्य के संबंध में आईसीटी भी बहुत महत्वपूर्ण है। वास्तव में, डेटा को विश्लेषणात्मक उद्देश्यों के लिए आसानी से एकत्र और साझा किया जा सकता है, उदाहरणार्थ एथलीटों के प्रदर्शन का इलेक्ट्रॉनिक रिकॉर्ड। आईसीटी स्वयं सीखने की प्रकृति को बदलकर स्कूल संगठन के भीतर शिक्षण और सीखने को बढ़ावा देता है। छात्र प्रेरित होते हैं और आवश्यक अवधारणाओं को समझने में सक्षम होते हैं, विभिन्न तरीकों से सोचने की अपनी क्षमताओं को विकसित करके छात्र प्रदर्शन का मूल्यांकन करने और बढ़ाने के लिए कौशल, रणनीति और विचारों का चयन कर सकते हैं।

आईसीटी के साथ, विद्यार्थियों को अधिक विस्तृत जानकारी की पहुंच, चयन और व्याख्या करने में आसानी होती है। वे उपयुक्त तकनीकी सॉफ़्टवेयर का उपयोग करके पैटर्न और व्यवहार को पहचानने में भी सक्षम हैं। इसके अलावा, मॉडल, भविष्यवाणियों और यहां तक कि परिकल्पना आईसीटी के आगमन के साथ छात्रों द्वारा बनाई जा सकती है। वीडियो प्रदर्शन के माध्यम से गुणवत्ता प्रदर्शन की छवियों तक पहुंच प्राप्त की जा सकती है। इसलिए, छात्र अपने काम की समीक्षा करने और गुणवत्ता में सुधार करने के लिए इसे संशोधित करने में सक्षम हैं। आईसीटी उपकरण विश्वसनीयता के द्वारा कार्यों का मूल्यांकन और सटीकता भी की जा सकती है। आईसीटी आगे संगठन के भीतर लोगों के बीच संचार का एक बहुत विश्वसनीय स्रोत प्रदान करता है। ईमेल, फ़ैक्स, फ़ेसबुक यहां तक कि स्काइप का उपयोग पी.ई.ई. कर्मचारियों और यहां तक कि अन्य स्कूलों के छात्रों के बीच , बैठक और कई अन्य प्रासंगिक मामलों में

त्वरित और प्रत्यक्ष संचार को सक्षम करता हैं। इसलिए, जानकारी की सटीकता केवल व्यस्त स्कूल सचिव पर निर्भर नहीं करती है।

आईसीटी उपकरणों के दौरान, विद्यार्थियों को अपने अवलोकन और विश्लेषण कौशल में सुधार करने के लिए तत्काल प्रतिक्रिया का लाभ मिल सकता है। हालांकि, मुख्य लाभ यह है कि अधिकांश विद्यार्थियों के कार्य के प्रदर्शन स्तर में सामान्य सुधार बना रहता है, क्योंकि वे विशेष रूप से प्रभावशाली दिखने के लिए अपने तरीके से संघर्ष करते हैं । प्रौद्योगिकी के संबंध में शारीरिक शिक्षकों के लिए कई अच्छे विकल्प उपलब्ध हैं। इनमें से कई प्रौद्योगिकियां आसानी से सुलभ हैं और आसानी से पाठ्यक्रम में शामिल हो जाती हैं। इनमें से कुछ का संक्षिप्तपरिचय अधोलिखित हैं -

## कुछ तकनीकी उपकरण -पेडोमीटर

**(SOME TECHNOLOGICAL TOOLS- Pedometers)**

आज, यह कहा जा सकता है कि शारीरिक गतिविधि को मापने के लिए पेडोमीटर एक मान्य स्वीकार्य उपकरण बन गया है। छात्र एक पेडोमीटर पहन सकते हैं और अपने गतिविधि स्तर के बारे में तत्काल और निरंतर प्रतिक्रिया प्राप्त कर सकते हैं। स्कूल में पेडोमीटर का उपयोग माता-पिता को भी दिखा सकता है कि छात्र एक निश्चित स्तर की शारीरिक गतिविधि प्राप्त कर रहे हैं। पेडोमीटर का उपयोग करके छात्र निर्धारित लक्ष्य की ओर प्रगति देख पाएंगे और फलस्वरूप कक्षाओं में अधिक प्रेरित होंगे।

## हार्ट रेट मॉनिटर (Heart Rate Monitors):

पूरी तरह से छात्र की क्षमता के स्तर और फिटनेस के वर्तमान स्तर के आधार पर, हृदय गति की निगरानी सीखने को अधिक छात्र केंद्रित बनाती है। यह तत्काल प्रतिक्रिया भी प्रदान करता है । जैसे-जैसे फिटनेस स्तर बढ़ता है, छात्र को लगता है कि उनकी हृदय प्रणाली काम कर रही है और अधिक प्रभावी ढंग से काम करने के लिए व्यक्तिगत लक्ष्य निर्धारित कर सकते है। हार्ट रेट मॉनिटर वास्तविक समय डेटा भी प्रदान करेगा जो छात्रों को यह देखने की अनुमति देगा कि विभिन्न व्यायाम और गतिविधियां हृदय गति को कैसे प्रभावित करती हैं। इसलिए हृदय गति की निगरानी एक सुविधाजनक उपकरण है, जो छात्रों को हार्ट रेट मॉनिटर प्रौद्योगिकी का उपयोग करने की अनुमति देता है। प्रत्येक छात्र के लिए अधिकतम हृदय गति के चार्ट बनाए जा सकते हैं और उनकी हृदय गति में वृद्धि या कमी हो सकती है।

## डिजिटल वीडियो कैमरा और दृश्य विश्लेषण सॉफ्टवेयर

**(Digital Video camera and visual analysis software)**

गतिविश्लेषण प्रणाली का उपयोग निश्चित रूप से अनुसंधान और शिक्षण दोनों में शारीरिक शिक्षा पाठ्यक्रम के कई क्षेत्रों को बढ़ाएगा। डिजिटल वीडियो कैमरा का उपयोग करना वास्तव में डेटा के संग्रह को सरल बनाता है। इन परिणामों को छात्रों में घटकों को तोड़ने के कौशल की बेहतर समझ और तकनीकों में सूक्ष्म भिन्नता के परिणामों के साथ इंटरैक्टिव मल्टीमीडिया प्रस्तुति देने के लिए उपयोग किया जा सकता है। दृश्य विश्लेषण सॉफ्टवेयर छात्रों को कैप्चर किए गए स्पर्धाओं को देखने और उनका विश्लेषण करने की अनुमति देता है। यह विशेष तकनीक शिक्षकों को मोटर कौशल लक्ष्यों के प्रति छात्र की प्रगति को नियंत्रित करने में मदद कर सकती है; प्रतिक्रिया के अवसर प्रदान करना और सीखने वाले छात्रों का मूल्यांकन करना।

उदाहरण के लिए टेबल टेनिस में विद्यार्थियों के प्रदर्शन को रिकॉर्ड करने के लिए डिजिटल वीडियो कैमरा का उपयोग करना, छात्रों को उनकी तकनीकों को बेहतर बनाने में मदद करने के लिए एक उपयोगी उपकरण हो सकता है। गति विश्लेषण सॉफ्टवेयर के अलावा, विद्यार्थियों के पास एक पेशेवर सहायक उपकरण है। उदाहरण के लिए, एक प्रशिक्षण सत्र के दौरान, एक - रोबोट - पोंग ', जो एक विशेष तकनीकी उपकरण है जो अलग-अलग दिशा और गति से पिंग पोंग गेंदों को वितरित करता है, एक छात्र का सामना करने के लिए उपयोग किया जाता है। शारीरिक शिक्षा शिक्षक  क्रियाओं का अधिक बारीकी से विश्लेषण करने के लिए डिजिटल वीडियो कैमरा का उपयोग कर सकता है। यह टेबल टेनिस के शिक्षण और सीखने में सुधार करने के उद्देश्य से किया जाता है। डिजिटल वीडियो क्लिप का उपयोग साप्ताहिक रूप से उचित और अनुचित तकनीकों पर जोर देने के लिए किया गया और फिर विद्यार्थियों को अपनी तकनीक और दूसरों की तकनीक का मूल्यांकन करने का अवसर दिया गया।

**शारीरिक शिक्षा में आईसीटी के लाभ :**

- आज के डिजिटल युग मे शारीरिक शिक्षा प्रतियोगिता की जानकारी तथा संगणकीय उपकरण द्वारा इन्टरनेट के माध्यम से खिलाडी  कम खर्च में अच्छी तरह से प्रतियोगिता का आनंद ले पा रहे है।
- शारीरिक शिक्षा खेल नियम, नयी कुशलता आने की जानकारी संगणकीय इन्टरनेट के माध्यम से खिलाडियों को, मार्गदर्शक एवं शारीरिक-शिक्षा अध्यापक शिक्षकों को जल्दी मिल जाती है। खेल कूद में जो बदलाव आये है उसकी जानकारी भिन्न-भिन्न खेल संघटन की वेब साईट पर मिल जाती है।

- संशोधन कार्य जो शारीरिक शिक्षा में हो गया है वह जानकारी शासकीय वेब साईट शोधगंगा में उपलब्ध है। जो नवीन संशोधन करने हेतु प्रस्तावित मार्गदर्शक को उसका लाभ इन्टरनेट द्वारा घर बैठे मिलता है।
- शारीरिक शिक्षा सम्बन्धित छात्र, अध्यापक, मार्गदर्शक, डिजिटल इंडिया से इंटरनेट के माध्यम से क्रीडा सामग्री खरीदना, ऑडर करना, शारीरिक शिक्षा की पुस्तके खरीदना, डाउनलोड करके पढना आदि से पैसे व समय की बचत कर पाता है।
- शारीरिक शिक्षक के व्यावसायिक विकास में मदद के लिये सतत एवं नियमित मदद आवश्यक है। आय.सी.टी. के उपयोग के माध्यम से यह प्रदान की जा सकती है। उदा.- रेडियो, टी.वी. प्रसारण से, चर्चा समूहो आदि के रूप में।

**निष्कर्ष (Conclusion):**

डिजिटल युग में विश्व में आय.सी.टी. द्वारा शारिरीक शिक्षा नियमों में, कौशल्य प्रामाणिकता, उपयोग सामग्री में सुधार एवं नये-नये उपकरणों की निर्मिती हुई है। शारीरिक शिक्षा विकास में आय.सी.टी. आज महत्वपूर्ण स्थान पर रहा है। तकनीकी उपकरण यथा पिडोमीटर, हार्टरेट मौनिटर, डिजिटल वीडियो कैमेरा, सी.सी.टी.वी., लेजर स्टार्ट, डिजिटल घडी आदि उपकरणों से खेल कूद में बदलाव आया है। शारीरिक शिक्षा में प्रामाणिकता लाने में एवं नये शोध् कार्य करने में आय.सी.टी. ने बडा योगदान दिया है।

**********

**संदर्भ (References):**

1. https://www.businesstoday.in/technology/news/data-thefts-increased-783-percent-.india-2017-gemalto-breach-level-index-study/story/277905.html
2. Singh A. and Bains J (2012), Essentials of Physical Education, Kalyani Publishers, 1/1 Rajindar Nagar, Ludhianna 141008.
3. https://www.identityforce.com/blog/identity-theft-odds-identify-theft-statistics
4. Chavan and Mahale (2003) Information and communication technology, Pradnya Publication, Nasik.
5. श्रीवास्तव अजय कुमार (2012), शारीरिक शिक्षा, दनिका पब्लिशिंग कंपनी, 4352/4C. अन्सारी रोड, दर्यागंज, नई दिल्ली - 110002

6.डॉ.सुभाषचन्द्रमीणा शोधदृष्टि 0976-6650 अन्ताराष्ट्रियम् क्रियास्वरुपविमर्शः

UGC Approved Journal No. 49321 Impact Factor : 2.591 ISSN : 0976-6650

# Shodh Drishti

An International Peer Reviewed Refereed Research Journal

Vol. 10, No. 6.3 Year - 10 June, 2019

PEER REVIEWED JOURNAL

*Editor in Chief*
**Prof. Abhijeet Singh**

*Editor*
**Prof. Vashistha Anoop**
**Department of Hindi**
**Banaras Hindu University**
**Varanasi**

**Dr. K.V. Ramana Murthy**
**Associate Professor of Commerce**
**and Vice Principal**
**Vijayanagar College of Commerce**
**Hyderabad**

*Published by*
**SRIJAN SAMITI PUBLICATION**
**VARANASI**
**Mob.** 9415388337, **E-mail :** shodhdrishtivns@gmail.com, **website :** shodhdrishtijournal1.com

UGC Approved Journal No. 49321
Shodh Drishti (An International Peer Reviewed Refereed Research Journal), Vol. 10, No. 6.3, June, 2019
Impact Factor : 2.591
ISSN : 0976-6650


| | | |
|---|---|---|
| ☛ | अमित कल्ला की कूची के रंग आध्यात्मिकता के संग<br>**डॉ0 अनुपमा चौधरी** | 73-77 |
| ☛ | प्रेमचन्द की दृष्टि में भारतीय मजदूर और किसान<br>**गायत्री** | 78-80 |
| ☛ | India-Nepal Relations in Present Context<br>**Dr. Karunendra Singh** | 81-83 |
| ☛ | Guarantee System an Impetus to Development or Colonization of Railways?<br>**Dr. Shreya Pathak** | 84-92 |
| ☛ | जनपद गोपालगंज (बिहार) में जनसंख्या की संरचना का एक भौगोलिक अध्ययन<br>**डॉ0 प्रमोद कुमार** | 93-99 |
| ☛ | व्यवसाय तथा प्रबन्ध में प्रभावी संदेशवाहन का महत्व<br>**डॉ0 दिनेश कुमार तिवारी** | 100-102 |
| ☛ | भारत में किसान जीवन समस्या : समस्या संदर्भ<br>**डॉ0 रविसेन सिंह** | 103-104 |
| ☛ | क्रियास्वरूपविमर्शः<br>**डॉ0 सुभाष चन्द्र मीणा** | 105-109 |
| ☛ | गैर सरकारी संगठनों की समाज में आवश्यकता<br>**निशांत वर्मा** | 110-112 |
| ☛ | अग्निपुराण में वर्णित हस्त मुद्रायें<br>**यास्मीन सिंह** | 113-116 |

मासिकी

ISSN 2278-0416

# हरिप्रभा

वर्षम् : १२ अंक : २-३, फरवरी-मार्च २०१५

अन्ताराष्ट्रिया मूल्याङ्किता मासिकी शोधपत्रिका

An International Refereed Monthly Research Journal

२०७२ नवसंवत्सरस्य भूयो भूयो वर्धापनानि

समेषामानन्दं शुभगुणकुलं सौख्यमतुलम्
बलं कीर्तिं धान्यं ननु नवनवोल्लासमपरम् ।
नवीनोऽयं वर्षो भवतु खलु दातेति नितरां
शुभाकाङ्क्षां याचे वरमथ च सर्वेभ्य इति शम् ॥

हरियाणा संस्कृत अकादमी, पंचकूला

Scanned with OKEN Scanner

मासिकी साहित्यिक-पत्रिका
ISSN 2278-0416

देशोऽस्ति हरियाणाख्यः
पृथिव्यां स्वर्गसन्निभः

# हरिप्रभा

वर्षम् -१२, अङ्क :-२-३, २०१५

**प्रधान-संरक्षकः अध्यक्षश्च**
*श्री मनोहरलालः*
मुख्यमन्त्री, हरियाणा

**प्रधानसम्पादकः**
*श्री राजेशकुमारः खुल्लरः, आई.ए.एस.*
*कार्यकारी उपाध्यक्षः, अकादमी*

**मुख्यसम्पादकः**
*डॉ0 सुधीरकुमारः*
*निदेशकः, हरियाणा संस्कृत अकादमी*

**सम्पादकः**
*विकासः शास्त्री*

**उपसम्पादिका**
*डॉ. प्रतिभा वर्मा*

प्रतिपत्रिका मूल्यम्- दशरुप्यकाणि
वार्षिकशुल्कम्- विंशत्युत्तरशतं रुप्यकाणि

सम्पर्कः
**हरियाणा संस्कृत अकादमी**
अकादमी भवनम्, पी-16, सैक्टर-14,पञ्चकूला (हरियाणा)
दूरभाषम्-0172-2570979
अणुसङ्केतः-hariprabhaskt@gmail.com



Scanned with OKEN Scanner

# अनुक्रमणिका


| | | पृष्ठसंख्या |
|---|---|---|
| सम्पादकीयम् | | ३ |
| वेदार्थावबोधने स्वराणामुपादेयत्वम् | डॉ. वेदव्रत: | ०७ |
| व्याकरणशिक्षणे वृत्तिपद्धते: स्वरूपम् | डॉ. देवदत्त: सरोदे | १३ |
| संस्कृतभाषाया: संवर्धनोपाया: | हरीशचन्द्र: कुकरेती | १६ |
| महर्षिदयानन्दसम्मतम् ईश्वरस्य सृष्टि-रचनम् | मञ्जू मान | २३ |
| महाभारते दान-माहात्म्यम् | डॉ. कामदेवो झा | ३१ |
| गौणमुख्यन्यायविचार: | डॉ. नवीनकुमारो मिश्र: | ३९ |
| पर्यावरणसमस्यानां वेदेषु समाधानम् | शिवदेवार्य: | ४३ |
| न्यायवैशेषिकयोरनुमानचिन्तनम् | डॉ.हेमानन्द: | ४८ |
| संयुक्तपरिवार:, सहदायिकी सम्पत्ति:- स्त्रीधनं नारीसम्पत् च | डॉ. वेदप्रकाश उपाध्याय: | ५४ |
| श्रीत्रयम्बकशर्मा विरचित: विवेकानन्द-चरितमहाकाव्यस्य महाकाव्यत्वम् | डॉ. ऋतु वाला | ७० |
| हरियाणाराज्ये रचितं वेदवेदाङ्गसाहित्यम् | डॉ.नरेशो वत्रा | ७५ |
| वैदिकपरम्परायां पुनर्जन्मवाद: | श्री गौतमकुमार: | ८७ |
| पाणिनीयशिक्षायां काश्चन विप्रतिपत्तय:, तासां समाधानञ्च | सुश्री मौनिका बोल्ला | ९१ |
| शिक्षा घ्राणन्तु वेदस्य | श्री महीपालसिंह: | ९५ |
| न्याय-वैशेषिकदर्शनानुसारं प्रत्यक्षविवेचनम् | डॉ. सुधांशुकुमार: षडङ्गी | ९८ |
| नागेश-भट्टोजिदीक्षितमते धात्वर्थ: | श्री दीपककुमार: कोठारी | १०४ |

| | | |
|---|---|---|
| वैदिकदर्शनेष्वात्मस्वरूपविमर्शः | श्री रेशमानन्दः शास्त्री | १०८ |
| अच्युतरायस्य शब्दशक्तिविवेचनम् | रक्षिता | ११४ |
| पाणिनीय-शिक्षासम्मतः वर्ण-विचारः | श्री विशम्बरदासः | ११९ |
| महाकविकालिदाससाहित्ये ऋतुमाहात्म्यम् | डॉ. दलबीरसिंहः चाहलः | १२६ |
| वर्तमानयुगे गुरुकुलशिक्षाप्रणाल्याः प्रासङ्गिकता | डॉ. कंवरसिहः | १३० |
| आधारोऽधिकरणम् | डॉ. रमेशो झा | १३३ |
| सर्वमङ्गलकारकमग्निहोत्रम् | श्री विकासः शास्त्री | १३७ |
| सहृदयमनः प्रीतये | डॉ. स्वर्गकुमारो मिश्रः | १४३ |
| आचार्यबच्चूलालावस्थिनः प्रतानिनीकाव्ये भाषाशैलीविवेचनम् | डॉ. व्रजेन्द्रकुमारसिंहदेवः | १४७ |
| विडम्बना | श्री सत्यकाम आचार्य | १५३ |



Scanned with OKEN Scanner

# गौणमुख्यन्यायविचारः

डॉ. नवीनकुमारो मिश्रः

परिभाषेन्दुशेखरस्य शास्त्रसम्पादकत्वप्रकरणे नागेशो न्यायोऽयम् अपीपठत्। अयमेव न्यायोऽत्र ऋजुमार्गेण विचार्यते। तथाहि-

पदार्थो द्विविधो गौणो मुख्यश्च। तत्र मुख्यार्थगतगुणसजातीयगुणादिहेतुकारोपविषयीभूत-प्रवृत्तिनिमित्ताश्रयो गौणपदार्थः। गौणार्थस्य प्रतीतेः पूर्वं मुख्यार्थस्य प्रतीतिरावश्यकी अन्वयानुपपत्तिप्रति-संघातस्य तात्पर्यानुपपत्तिप्रतिसंघातस्य वा लक्षणाहेत्वन्यतमत्वात्। तत्प्रतिपत्तये च मुख्यार्थबाधज्ञानाय तत्कुक्षि-प्रविष्टस्य मुख्यार्थस्य प्रतीतेरावश्यकत्वात्। यथा गौर्जल्पति इत्यादौ जाड्यमान्द्यादिगुणयोगादिह प्रतीयमानो वाहीकार्थो गोशब्दस्य गौणार्थः सास्नादिमानमेव मुख्यार्थः। लक्षणया प्रतीयमानोऽर्थः गौणः। अप्रसिद्धश्च संज्ञादिरपि गौणार्थप्रतिपादक एव। पित्रादिना यदा पुत्रादे रामकृष्णेति नामक्रियते तदा रामगतपितृभक्तिशौर्यादिकगुणास्ते न तेषुगुणादिहक्षुणा तत्रारोप्यन्ते। अतो रामादिसंज्ञादिरपि गुणप्रतिसंधानयोगादेवार्थबोधकत्वाद्गौणार्थस्य प्रतिपादकः। गौर्जल्पति, गौर्वाहीकः, रामोऽसौ भाषते इत्यादौ गौणार्थप्रत्यायकतासाम्येऽपि पूर्वत्र गुणप्राप्तिसंधानं परमात्मकमपरत्र चारोपात्मकमित्येव।

शक्यतावच्छेदकस्य समवायो येन पदार्थेन सहान्वेति स च शब्दो मुखः उत अभिधया प्रतीयमानोऽर्थो मुखमिव प्रधानत्वात् मुख्यः। यथा- गो शब्दस्य प्रवृत्तिनिमित्तं सास्नादिमत्वं गोरूपं न तु गोगते जाड्यादि गुणः। गोणमुख्ययोरर्थयोर्मुख्ये एवार्थे कार्यप्रवृत्तिरिति।

अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमिति न्यायाश्रयणेऽपि महद्भूतश्चन्द्रमा इत्यत्र न शंकापरिहारः कलङ्किन्यपि चन्द्रे महत्वारोपाद् कलङ्की चन्द्रो न वस्तुतो महान् किन्तु विलक्षणशिरोवहनकर्मत्वस्य चन्द्रे दर्शनात् तद्गुणयोगात्सोऽपि महद्भूत उच्यते यथा पित्तलमयमाभूषणमपि राज्ञा धृतं सुवर्णमयं महामूल्यकं प्रतीयते। तादृशमहच्छन्द्रोऽत्र गौणार्थः। शास्त्रेण च्विप्रत्यये तस्य सर्वापहारलोपे 'महद्भूतश्चन्द्रमा इत्यत्रारोपितमहत्वविशिष्ट इत्यर्थके 'आन्महतः समानाधिकरणजातीययोः (६/३/४६) इत्यात्वापत्तिः, अर्थवत्त्वस्य तत्रापि सत्वात् इति चेन्न गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः। अतो गौणार्थके महद्भूतश्चन्द्रमा' इत्यत्र महच्छब्दे नात्वमित्यर्थः।

गौणेऽर्थे शब्दः प्रयुज्यमानो मुख्यार्थारोपेण प्रवर्तते इति। इत्थं सिद्धं यत् योऽप्रसिद्धोऽर्थः सोऽत्र गौणो यश्च गुणप्रयोज्यलक्षणाविषयः सोऽपि चार्थो गौणः। तेन प्रियास्त्रयो येषां ते प्रियत्रयस्तेषां प्रियत्रयाणामित्यत्र बहुव्रीहावन्यपदार्थप्रधानतया त्रिशब्दार्थस्य मुख्यत्वे निरुक्तगौणत्वाभावादस्याः परिभाषाया अप्रवृत्या त्रेस्त्रय इति त्रयादेशः प्रियत्रयाणामित्यत्र भवत्येव। अमहाब्राह्मणा इत्यत्र नञस्तत्सादृश्यार्थकस्या-रोपार्थकतया आरोपितमहत्वस्य महच्छब्देन प्रतीतौ आरोपस्य गुणनिमित्तकताभावेन गौणत्वाभावात्

आत्वं सम्पद्यते। द्विविधोऽर्थ प्रतिपादकस्य शब्दस्वरूपस्यापि सम्पद्यते।

न्यायोऽयं पदार्थोपस्थित्या शब्दे प्रतीतावेव प्रवर्तते। गौणत्वप्रतीतिस्तु पदान्तरसम्बन्धे हि गौर्वाहीकः, गां पाठय इत्यादौ गौणत्वम् न तु प्रातिपदिकसंस्कारकालायाम् अत एव वाहीकपदेन असम्बद्धं गोपदस्य गौणत्वं तु न।

अपदं न प्रयुञ्जीत इति नियमेन वाक्यसंस्कारपक्षे विपक्वयुत्पन्नस्य गां पाठय इत्यादे गोपदस्य विवक्षार्थे गौणत्वप्रतीतिः न पदनिष्पत्तेः प्राक् प्रातिपदिकसंस्कारवेलायामित्यन्तर ... बाधायोगः प्रातिपदिककार्ये अस्य न्यायस्य प्रवृत्त्यभावे बीजम्।

अग्निषोमावित्यत्र ईत्वषत्वविचारे गौणार्थ प्रतीतौ 'अग्नेः स्तुत्स्तोमसोमाः (८/३/८२) इति शास्त्रेण अग्निसोमयोर्विशिष्टरूपोपादानमप्रतीति परिभाषायाः प्रवृत्त्या कथमन्वयस्य ... इति न वाच्यम् प्रसिद्धदेवतावाचिनो अग्निपदस्य सोमपदस्य च द्वन्द्वे द्वन्द्वावस्थायां गौणत्वप्रतीत्यभावात् रङ्गत्वादीत्वषत्वयोर्जातयोः पश्चान्माणवकावित्यनेन सहान्वयकालेऽन्वयानुपपत्तिमूलकगौणलक्षणया तत्सदृशपरत्वे गौणत्वाप्रतीतावपि 'भुक्तवन्तं प्रति मा भुक्थाः' इति निवृत्तेरभावात्। यत्र च द्वन्द्वात् पूर्वमेव गुणयोगादग्निपदस्य सोमपदस्य च तत्सदृशे लक्षणा क्रियते। ततश्च द्वन्द्वसमासे तत्कार्यं न भवतो गौणलाक्षणिकत्वात्, गुणप्रयोज्यलक्षणाविषयत्वात् एवमेवाग्निमाणवकस्य बोधस्य अग्निशब्दस्य सोमशब्दस्य च द्वन्द्वे एवमेवाग्निमाणवकस्य बोधस्य अग्निशब्दस्य सोमशब्दस्य च द्वन्द्वे स्व गौणत्वाप्रतीत्या नेत्वषत्वे।

तत्रत्यं भाष्यम्- अग्नेदीर्घात्सोमस्य। अग्नेदीर्घासोमस्येति वक्तव्यम्। अग्नीषोमौ। इतरथा ह्यनिष्टप्रसङ्गः प्रसज्येत अग्निसोमौ माणवकाविति। तत्तर्हि वक्तव्यं। न वक्तव्यम्। गौणमुख्ययोर्मुख्ये कार्यसम्प्रतिपत्तिः तद्यथा गौरनुबन्ध्योऽग्नीषोमीय इति न वाहीकोऽनुबध्यते। कथं तर्हि वाहीके वृद्ध्यात्वे भवतः- गौस्तिष्ठति गामानयेति अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति।

कैयटस्तु लौकिको न्यायोऽयं स्वं रूपं शब्दस्येति रूपग्रहणार्थवद्रूपमाश्रीयते। स चार्थो मुख्य एव गृह्यते न तु गौणः। तत्र प्रसिद्धाप्रसिद्धाभ्यां मुख्यगौणव्यवस्थेति माणवके संज्ञात्वेन विनिर्मुक्तौ अग्निसोमशब्दौ गौणार्थाविति षत्वाभावः।

विभक्त्यनिमित्तकत्वे सति स्त्रीत्वानिमित्तकं पदकार्यत्वम् पदकार्ये प्रवृत्तौ प्रातिपदिककार्येऽप्रवृत्तिरिति निषेधलाभः। अत एव अत्वं त्वं सम्पद्यत इति त्वद्भवति इत्यादौ प्रयोगस्थे गौण युष्मच्छब्दे एकवचनविभक्तिनिमित्तकत्वे त्वादेशः सम्पद्यते। प्रातिपदिककार्ये अप्रवृत्तौ स्त्रीत्वानिमित्तकत्वस्य विशेष्यांशस्य प्रमापकः 'जानपदकुण्डगोणं' इति शास्त्रे स्थौल्य गुणारोपितो जातिवाचको नागशब्दो गृहीतः।

स्त्रीनिमित्तकेऽस्य न्यायस्य नागशब्दे प्रवृत्तौ प्रकृतसूत्रे नागग्रहणं व्यर्थं स्याद् तर्हि मुख्यनागशब्दात् ङीष् विधानेन जातेरस्त्री इति शास्त्रेण सिद्धे इदं ज्ञायते यत परिभाषेयं नियत गौण

शब्देभ्यो भिन्नेषु शब्देषु स्त्रीत्वनिमित्तककार्येऽपि प्रवर्तते। यतो हि गौण शब्दोऽपि [illegible] स्त्रीनिमित्तकं कार्यमसङ्गतम्। पदकार्येऽपि नाऽस्य सर्वत्र प्रवृत्तिः किन्तु [illegible] विषयताप्रयोजकपदस्य यस्मिन्पदकार्यविधायके उपादानेऽस्य न्यायस्य प्रवृत्तिः। अत एव [illegible] विशिष्टरूपतया विशिष्टार्थोपस्थापकत्वस्य च सत्वेऽपि न तस्य कथं चिदपि [illegible] इञित्यस्य निरुक्तपदकार्यत्वस्य अभावात्तद्विषये न्यायस्याप्रवृत्त्या [illegible] इञि श्वशुरिरित्यादिरूपसिद्धिरिति बोध्यम्। किन्तु ओत् सूत्रभाष्ये अगौः गौः सम्पद्यत इति गोऽभवदित्यत्र च्विप्रत्ययान्तत्वेन निपातत्वादोत् (१/१/१५) इति प्रगृह्यसंज्ञाप्राप्तौ [illegible] तद्वारणपरकभाष्यासङ्गतिः, प्रातिपदिकपदवन्निपातपदस्यापि तद्वर्णोच्चारतद्वर्णोत्तरानुपूर्व्या विशिष्य अर्थोपस्थापकत्वाभावादिति वाच्यं चादिगणं निर्माय चादयोऽसत्वे (१/४/५७) इति [illegible] दीनामानुपूर्वीरूपत्वान्निपातशब्दोच्चारणे ओत् (१/१/१५) इत्यादौ विशिष्टरूपोपादानसत्वात्। प्रातिपदिकानि न तथा गणविशेषं निर्माय पठितानि यथा निपातानीति वर्तते तत्र भेदः।

पदकार्ये न्यायप्रवृत्तौ मुनित्रयविचारः- गौणमुख्यन्यायस्य पदकार्यविषयकत्वं पाणिनिकात्यायनपतञ्जलीनां त्रयाणामप्याचार्याणां सम्मतम्। अत एव 'पूर्वपरावर' (१/१/३४) इति सूत्रे पाणिनिनाऽसंज्ञायामिति संज्ञापर्युदासः कृतः, कात्यायनेन च संज्ञोपसर्जनप्रतिषेध इति वार्तिकं कृतम्, पतञ्जलिना च सर्वनामेति महासंज्ञाकरणसामार्थ्यादन्वर्थतामाश्रित्य सर्वेषां नामानीति चातः सर्वनामानि इति व्याख्यानात्मकं प्रयासं विधाय वार्तिकं प्रत्याख्यातम्। अन्यथा अनेन न्यायेन संज्ञायां संज्ञावारणे आचार्याणां ते ते प्रयत्नाः विफलाः स्युः।

किञ्चेत्यादिना उच्यते भाष्याशयो देवदत्तेत्युक्ते कर्ता निर्दिष्टः, कर्मक्रिये चानिर्दिष्टे। अभ्याजेत्युक्ते क्रिया निर्दिष्टा कर्तृकर्मणी अनिर्दिष्टे। शुक्लामित्युक्ते गुणो निर्दिष्टः। कर्तृकर्मणी क्रिया चानिर्दिष्टा तथापि भीष्मं कटं कुर्वित्यादौ कटोऽपि कर्म भीष्मादयोऽपीत्यन्यत्र 'कर्तुरीप्सि०' भगवतोक्तत्वेनात्र शुक्लस्यापि कर्मत्वम्। गामिति शब्दवाच्यमेव कर्म नान्यादित्वादिक्रमेणार्थः। कारकादि इत्यादौ आदिशब्दः क्रियापरकः तथैव योग्यसैवक्रियेतित्यादिना कारकस्यापि ग्रहणम्। मात्रपदेन विशेषक्रियाव्यावृत्तिः।

पदकार्ये प्रसिद्धश्लोकस्य प्रमाणं विद्यते-

**अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः।**
**शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु॥**

ये शब्दाः स्वतन्त्राः गुणयोगादिकारणमूलकलक्षणादिव्यापारमनपेक्षमाण्य लोकव्यवहारादिना प्रसिद्धिं प्राप्ता अत एवाभिव्यक्तपदार्थाः सन्ति तेषु शब्देषु मुख्यार्थादन्येऽर्था उच्यन्ते यैस्तेषु तदुक्तिषु शास्त्रार्थः सूत्रप्रवृत्तिरूपो न कर्तव्यः। अतः पदकार्ये एवास्य न्यायस्य प्रवृत्तिः।

न्यायोऽयं शब्दाश्रये प्रवर्तते उत अर्थाश्रये इति चेदुच्यते शेखरे ओत् (१/१/१५) इति

सूत्रभाष्ये गौणमुख्ययोर्मध्ये वा पठनेऽस्मिन् गौणमुख्यन्यायप्रवृत्त्या णित्वप्रयुक्तवृद्धेरशब्दत्वस्य चाभावमाशङ्क्य "अर्थाश्रये एतदेवं भवति शब्दाश्रये च वृद्ध्यात्वे" इति समाधत्तम्। तथा च प्रातिपदिककार्यत्वेन परिभाषाप्रवृत्तिवारणमसङ्गतमिति न वाच्यं लौकिकार्थवाचकत्वस्य पदे एव सत्त्वेन अर्थाश्रय इत्यस्य पदाश्रय इति तात्पर्यनिर्धारणात् शब्दाश्रय इत्यस्य च प्रातिपदिकाश्रय इति तात्पर्यनिश्चयात् 'गोतोणिदिति' सूत्रे विशिष्टरूपोपादानसत्वादर्थोपस्थित्या वृद्ध्यात्वयोरप्यर्थाश्रयत्वेन परिभाषाप्रवृत्तेरशक्यवारणेन पदकार्य इत्येव सुवचम्। न तु अर्थाश्रये न्यायस्य अस्य प्रवृत्तिरिति।

**सारांशः**- नन्वर्थवद्ग्रहणपरिभाषास्वीकारेऽपि कलङ्किन्यपि चन्द्रे महत्वारोपाद् अमहान् महानभूत इति 'महद्भूतश्चन्द्रमा' इत्यत्रारोपितमहत्वविशिष्ट इत्यर्थके 'आन्महत०' इत्यात्वापत्तिरिति अर्थवत्त्वात्।

गौणमुख्ययोर्मध्ये: मुख्य एवार्थे कार्यप्रवृत्तिः। तथा हि-मुख्यार्थ-बोधक एव शब्दे शास्त्रप्रवृत्तिः। मुखमिव प्रधानत्वं मुख्यत्वम्। गुणादागतो गौणः।

न्यायसिद्धेयं मुख्यार्थारोपाय तदर्थस्य समुपस्थितेरावश्यकतया तदर्थमादाय कृतार्थस्य शास्त्रस्य गौणेऽर्थे प्रवृत्तौ नास्ति किमपि मानमिति।

**उपसंहारः**- गौणमुख्यन्यायोऽयं लोकेऽपि दृश्यते, न्यायेऽस्मिन् गौणमुख्ययोः लक्षणपुरस्सरं गौणत्वविमर्शः, न्यायप्रवृत्तिविचारः, भाष्ये कैयटादिमतं न्यायविषये मुनित्रयाणामभिप्रेतं शब्दाश्रयार्थाश्रयविचारः, अन्नीयेनी इत्यत्र इत्वधत्वकार्यविचारः। एतैः विचारैः ज्ञायन्ते न्यायोऽयं प्रातिपदिकार्थे न प्रवर्तते किन्तु-उपात्तविशिष्यार्थोपस्थापकं विशिष्टरूपं यत्र, तादृशपदकार्य एव। यथा- 'आन्महत०' इत्यत्र प्रवृत्तिः 'अत इञ्' इत्यादौ तु नेति।

राष्ट्रियसंस्कृतसंस्थानम्, क.जे.सोमैयासंस्कृतविद्यापीठम्,
मुम्बई परिसरः, महाराष्ट्र

---

**सन्दर्भग्रन्थसूची-**

१. परिभाषेन्दुशेखरः (दुर्गा टीका) पृ.सं.-१११/१२३.
२. नागेशभूषणदीपिका-गौणमुख्यपरिभाषा.
३. वैयाकरणसिद्धान्तदिग्दर्शनम् चतुर्थपटलम् .
४. परिभाषेन्दुशेखरस्य भावबोधिनी हिन्दी टीका.
५. शेखरस्य सुबोधिनी हिन्दी टीका.
६. वैयाकरणसिद्धान्त कौमुदी .
७. व्याकरणमहाभाष्यम् ओत्, गोतो णित् सूत्रम्.
८. बृहद्धातुरूपाकरः.
९. अद्भुतधातुरूपावली.
१०. काशिका न्यासपदमञ्जरी टीकोपेतम्.
११. तर्कभाषा.

पंजीयन संख्या–एच.ए.आर., एस.ए.एन 17577/2005

## एका समसाहित्यिकी मासिकी पत्रिका

विविधविषय-संवलित-साहित्यस्य मूल्याङ्कनार्थं विभिन्न-वैचारिकी प्रस्तुतिः,
भारतस्य विशेषतश्च उत्तरभारतस्य तत्रापि हरियाणाप्रदेशस्य
प्रसिद्धानां विदुषां सुललित-सर्जनधर्मि-साधकानां नवोदितानां
प्रतिभानां कवीनाञ्च सशक्तलेखनीनां
संयुक्ता सम्पृक्ता संस्कृतिः

# हरिप्रभा

देववाण्याः संस्कृतभाषायाः सत्साहित्यस्य च समभ्युदयार्थं समुन्नयनार्थं प्रयासरता साहित्यिकी पत्रिकेयं हरियाणा-संस्कृत अकादम्याः सततं प्रकाश्यते। या मानव-संवेदनानां शोध-निबन्धानाम् उदात्तजीवनमूल्यानाञ्च संगमस्वरूपे प्रतिवर्गस्य पाठकानां मनोरञ्जनार्थं तेषां ज्ञानविवर्धनाय च पठनीया संग्रहणीया च विद्यते।

मूल्यम् प्रतिपत्रिका १० (दश) रुप्यकाणि
वार्षिकं शुल्कम् १२० (विंशत्युत्तरशतम्) रुप्यकाणि
सविनयं सादरमनुरोधोऽस्ति यत् हरिप्रभायाः पत्रिकायाः वार्षिक-सदस्या भवेयुः।
सम्यग् बोधाय सम्पर्कं साधयेयुः

निदेशकः

**हरियाणा संस्कृत अकादमी**
अकादमी भवन, पी-16, सैक्टर-14
पंचकूला (हरियाणा) 134112
टेलीफोन एवं फैक्स - 0172-2570979
ई. मेल - hariprabhaskt@gmail.com

Scanned with OKEN Scanner